ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ/1219/450/છ, તા.03/07/2019-થી મંજૂર

# आयुर्वेदः १

## मध्यमा १

## ( ધોરણ 11 )

**प्रतिज्ञापत्रम्**

भारतं मम देशः।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति।
मम मानसे देशस्पृहा अस्ति। समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि।
प्रत्येकेन सह शिष्टव्यवहारं करिष्यामि।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति।

**मूल्यम् : ₹ 34.00**

**गुजरातराज्यशालापाठ्यपुस्तकमंडलम्**
**'विद्यायनम्', सेक्टर 10-ए, गांधीनगरम् - 382010**

© गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, गान्धीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यपाठ्यपुस्तकमण्डलहस्तकाः सन्ति। अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रुपेण गुजरातराज्य-पाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषयमार्गदर्शनम्**
डॉ. अपर्णा प्रविण देशपांडे

**लेखनम्**
डॉ. गजानन चाटुफले (कन्विनर)
डॉ. दिक्षिता दवे
श्री वसिष्ठ रावल
श्री हित शुक्ल

**समीक्षणम्**
श्री नीतिन आचार्य
श्री विष्णुभाई रावल

**भाषाशुद्धिः**
श्री ललित पटेलः

**संयोजनम्**
डॉ. क्रिष्णा दवे
(विषय-संयोजकः -अंग्रेजी)

**निर्माणायोजनम्**
श्री हरेन शाह
(उपनियामकः - शैक्षणिकः)

**मुद्रणसंयोजनम्**
श्री हरेश एस. लीम्बाचीया
(उपनियामकः- उत्पादनम्)

## प्रास्ताविकम्

प्राच्यगुरूकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयोः अध्ययनाध्यापनयोः पद्धत्योः समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चातर माध्यमिक शिक्षणसमितिः (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिताः मानिताः च अभ्यासक्रमाः सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यतायाः **आयुर्वेदः १, मध्यमा १ (धोरण 11)** इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञैः सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भिः सूचिताः सूचनाः सादरं स्वीकरणीयाः एव।

**पी. भारती** (IAS)
नियामकः
ता.06-07-2019

कार्यवाहकःप्रमुखः
गान्धीनगरम्

**प्रथमावृत्ति : 2019**
**प्रकाशक :** गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन पी.भारती, नियामकः
**मुद्रक :**

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

( क ) संविधान प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

( ख ) स्वातन्त्र्याय अस्मीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

( ग ) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं च।

( घ ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

( च ) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

( छ ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

( ज ) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

( झ ) वैज्ञानकिमानसाय मानवतावादाय जिज्ञासायै भावनाभिगमाभिबोधः।

( ट ) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

( ठ ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६. तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

* भारतीय संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | | |
|---|---|---|
| १. | आयुर्वेदस्य इतिहासः | १ |
| २. | टीकाः टीकाकाराश्च | ९ |
| ३. | चरकसंहितायाः परिचय | ११ |
| ४. | सुश्रुतसंहिता परिचयः | १५ |
| ५. | अष्टांगसंग्रहः अष्टांगहृदयञ्च | १८ |
| ६. | आयुर्वेदस्य निरुपणम् | २२ |
| ७. | आयुर्वेद दर्शन निरुपणम् | २५ |
| ८. | द्रव्यविज्ञानम् | २९ |
| ९. | गुणः विज्ञानम् च | ३६ |
| १०. | स्वस्थवृतपरिचय | ४३ |
| ११. | दिनचर्या | ४७ |
| १२. | रात्रिचर्या | ५४ |
| १३. | ऋतुचर्या | ५६ |
| १४. | सद्वृतम् | ६४ |
| १५. | द्रव्यगुणशास्त्रपरिभाषा | ६८ |
| १६. | द्रव्यम् | ७० |
| १७. | गुणः | ७६ |
| १८. | रसः | ८१ |
| १९. | विपाकः | ८७ |
| २०. | वीर्यम् | ९१ |
| २१. | प्रभाव | ९५ |
| २२. | कर्म | ९७ |

# १ आयुर्वेदस्य इतिहासः

**इतिहासशब्दस्य निरुक्तिः व्युत्पत्तिः व्याख्या च**

त्रिभिः घटकैः निष्पन्नोऽयम् इतिहासः शब्दः । तद्यथा - इति + ह + आस । संस्कृतव्याकरणदृष्ट्या 'इति' च 'ह' अव्यये स्तः। 'आस्' इति क्रियापदम् । यत् अस्तित्त्वद्योतकः शब्दः वर्तते। इतिहासशब्दस्य व्युत्पत्तिः अनेन प्रकारेण भवति।

- इति अर्थात् अनेन प्रकारेण।
- ह अर्थात् निश्चितम्।
- आस अर्थात् अस्तित्त्वद्योतकः।

समग्रतया पश्यामः चेत् निश्चितरुपेण घटिता घटना इतिहासः कथ्यते। आयुर्वेदेतिहासे भूतकाले समुद्‌भूतायाः घटनायाः व्यक्तित्त्वविकासाय क्रियमाणस्य कर्मणः तथा लिखितसाहित्यवाङ्मयस्य विस्तृतं वर्णनम् अस्ति।

**व्याख्या**

व्यक्तेः समाजस्य देशस्य च महत्त्वपूर्णं विशिष्टं - सार्वजनिकं च तथ्यं, कस्यचित् विषयवस्तुतः उत्पत्तेः विकासः एवं च कालक्रमेण लिखितं विवरणम् 'इतिहासः' कथ्यते।

**इतिहासः**

इतिहासे न केवलं भूतकाले घटित -घटनासु मानवानां नामोल्लेखः परिचयः च प्राप्यते अपि तु वर्तमानपरिप्रेक्ष्ये प्रेरकविचाराणां विकासश्रृंखलायाः अन्वेषणम् एवं विस्तृतीकरणं वर्तते। वाङ्मयः, - शिलालेखः दानपत्रम्, मुद्रोत्खननं - यात्राविवरणादि इतिहासस्य साधनानि वर्तन्ते। एतैः इतिहासस्य प्रामाणिकं विवरणं क्रियते।

अतः आयुर्वेदेतिहासे अपि भूतकालेषु घटितघटनायाः व्यक्तित्त्वस्य योगदानस्य वाङ्मयस्य च समुचितं वर्णनं प्राप्यते। अत्र समयानुरूपं नवीनस्तोत्राणाम् अन्तर्भावात् आयुर्वेदस्य उपबृहणं वर्तते। येन आयुर्वेदस्य युगानुरूपं परिवर्तनं स्वीक्रियते।

**आयुर्वेदस्यावश्यकता महत्त्वञ्च**

अनादिकालात् आयुर्वेदस्य शाश्वतधारा प्रवाहिता वर्तते। सततः समयानुरूपं नवीन स्तोत्राणां स्वीकृत्या उपबृंहणम् अभवत् । मूलस्तोत्राणाम् अन्वेषणं कृत्वा विश्लेषणेन वैचारिकविकासक्रमस्य श्रृंखलाबद्‌धम् उद्‌घाटनम् इतिहासस्य प्रमुखकार्यं वर्तते। इतिहासः पुरातनघटनायाः एकः प्रामाणिकः अभिलेखः विद्यते।

''इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।''

आयुर्वेदेतिहासे वैदिककालात् आरभ्य आधुनिककालपर्यन्तं विद्यमान-परिस्थितेः संपूर्णं विवेचनं प्राप्यते। तद्यथा - स्वास्थ्यसम्बधित- विवरणं,कालक्रमानुसारं नूतना औषधयःनूतना चिकित्सापद्धति इत्यादीनां विवरणं प्राप्यते।

- आयुर्वेदविषये विदेशेषु लिखिताः वाङ्मयग्रन्थाः तस्य टीकाग्रन्थाः तदनुरूपं साहित्यम्, तस्य लेखकः एवं तस्य अस्मिन् विषये योगदानादिविषयस्य ज्ञानम् आयुर्वेदेतिहासे प्राप्यते।
- आयुर्वेदस्य शैक्षणिकचिकित्सासम्बद्धि - ग्रन्थाः तस्य लेखकाः तथा च तेषां योगदानादीनां ज्ञानम् आयुर्वेदेतिहासे ज्ञातुं शक्यते।
- आयुर्वेदविषये शैक्षणिक-चिकित्सकीय-अनुसंधानक्षेत्रेषु जायमान-विकासेषु पूर्वघटित-शासकीय योजनादीनां विज्ञप्तिः आयुर्वेदितिहासे प्राप्यते।
- इतिहासद्वारा लिखित-घटनादिभिः भविष्यवर्तमानकालयोः स्वीकरणीयतथ्यानां मूलाधारत्वं वर्तते।

**आयुर्वेदस्यावतरणम्**

महर्षि-चरकः आयुर्वेदं शाश्वतं कथयति। यतः आयुः अर्थात् जीवनस्य प्रारम्भः भवति तथा च यतः जीवस्य अस्तित्त्वस्य ज्ञानं प्राप्यते तस्मात् कालात् एव आयुर्वेदस्य सत्तायाः प्रारम्भ भवति।

सुश्रुतसंहितायां सृष्टेः पूर्वमेव ब्रह्मणा आयुर्वेदस्य प्रादुर्भावस्य उल्लेखः विद्यते। यथा शिशोः जन्मनः पूर्वमेव मातुः स्तने स्तन्यं (दुग्धं) प्रादुर्भवति तद्वत् सृष्टेः उत्पत्तेः पूर्वमेव आयुर्वेदामृतस्य अस्तित्वम् आसीत्। ब्रह्मणा आयुर्वेदस्य लक्ष श्लोकमयसंहितायाः निर्माणम् अभवत्। तद्यथा-

ब्रह्मणा हि यथाप्रोक्तमायुर्वेदं प्रजापतिः।
जग्राह निखिलेनादावाश्विनौ तु पुनस्ततः ॥
अश्विभ्यां भगवाञ्छक्रः प्रतिपेदे ह केवलम्।
ऋषिप्रोक्तो भरद्वाजस्तस्माच्छक्रमुपागमत् ॥
अथामैत्रीपरः पुण्यमायुर्वेदं पुनर्वसुः ।
शिष्येभ्यो भगवान् षड्भ्यः सर्वभूतानुकम्पया॥
अग्निवेशश्च भेलश्च जतूकर्णः पराशरः ।
हारीतः क्षारपाणिश्च जगृहुस्तन्मुनेर्वचः ॥

च. सू. ॥ 3/२८.

ब्रह्मा आयुर्वेदस्य ज्ञानं दक्षप्रजापतये अदात् , दक्षप्रजापतिः अश्विनीकुमाराभ्याम् अदात्, अश्विनीकुमाराभ्यां च इन्द्रः इदं ज्ञानं प्राप्नोत्।

महर्षिचरकस्य मतानुसारं विविधरोगेभ्यः पीड्यमानानां प्राणिनां कष्टमयजीवनेन दुःखिताः करुणार्द्राः महर्षयः हिमपार्श्वे एकां सभाम् आह्वयन्। यस्यां प्राणिनः रोगमुक्ताः भूत्वा स्वस्थाः दीर्घायुषः च कथं भवेयुः इत्येतद्विषयिकी चर्चा अभवत् । चर्चाया अन्ते चेदं निर्णीतं यत् - एतदर्थम् आयुर्वेदीयज्ञानस्य आवश्यकता अस्ति। इदानीम् इदं ज्ञानम् इन्द्रस्य पार्श्वे अस्ति। यदि अस्मत् कश्चित् इन्द्रात् इदं ज्ञानम् आनयति चेत् अस्माकं हेतुः सिद्धः भवेत्। दुष्करमिदं कार्यं कर्तुं भारद्वाजेन स्वतः स्वेच्छा प्रकटिता। इन्द्रसमीपं गत्वा च स इंद्रमवोचत् यत्-पृथिव्यां भयंकराः व्याधयः उद्भूताः सन्ति तेषां शमनोपायं दर्शयत। अतः इन्द्रो भरद्वाजर्षि सूत्ररुपेण ब्रह्मपरम्परया प्रवाहितं शाश्वतं त्रिसूत्रं, स्वस्थातुरपरायणम् आयुर्वेदम् उपादिशत्। भरद्वाजश्चेदं ज्ञानम् आत्रेयादिमहर्षिभ्यः प्रादात्। आत्रेयः षट्-शिष्येभ्यः प्रादात्। एते षट् शिष्याः च स्वीयाः स्वतंत्रसंहिताः अरचयन्। तेषु अग्निवेशतन्त्रस्य निर्माणं सर्वप्रथमम् अभवत्। ऋषिपरिषद् च तं मान्यम् अकरोत् ततः तस्य लोके प्रचारः जातः।

सुश्रुतसंहितायां सृष्टेः पूर्वमेव ब्रह्मणा आयुर्वेदस्य प्रादुर्भावस्य उल्लेखः विद्यते। अत्र आयुर्वेदावतरणस्य यः क्रमः वर्णितोऽस्ति सः चरकानुसारम् अस्ति। केवलं तत्र भरद्वाजस्य स्थाने धन्वन्तरेर्नाम विद्यते। धन्वन्तरिश्च सुश्रुतादीन् स्वशिष्यान् एतद् ज्ञानं प्रायच्छत्।

काश्यपसंहितानुसारं ब्रह्मा आयुर्वेदस्य ज्ञानं दक्षप्रजापतये अयच्छत् दक्षप्रजापतिः अश्विनिकुमाराभ्याम् अयच्छत्। अश्विनिकुमाराभ्यां च इन्द्रः ज्ञानं प्राप्नोत्। कश्यपः- वशिष्ठः- अत्रिः- भृगुश्च इति चत्वारः ऋषयः प्राप्नुवन्।

अष्टांगसंग्राहानुसारम् आत्रेयपुनर्वसोः प्रामुख्येन् धन्वन्तरि- भरद्वाज-निमि-कश्यपादयः ऋषयः इन्द्रसमीपं गत्वा आयुर्वेदस्य स्मरणं कृत्वा प्रजापतये इदं ज्ञानं दत्तवन्तः। प्रजापतिः अश्विनिकुमाराभ्यां तौ च इन्द्राय, इन्द्रश्च आत्रेयादिभ्यः ऋषिभ्यः ज्ञानिमदं ददौ। एभिः मुनिवरैः अग्निवेशादि - शिष्याय इदं ज्ञानम् अदीयत। ते पृथक्-पृथक् अनेकतन्त्राणां रचनाम् अकुर्वन्।

चरकसंहितायां सुश्रुतसंहितायां च वर्णितम् आयुर्वेदावतरणं क्रमशः आत्रेयसंप्रदायस्था धन्वन्तरिसम्प्रदायः कथ्यते। ब्रह्मवैवर्तपुराणे एकस्य अधिकस्य भास्करसंप्रदायस्य उल्लेखः प्राप्यते। पुराणानुसारं दक्षप्रजापतिः चतुर्वेदानाम् आधारेण पञ्चमं वेदम् अरचयत्। सः च इदं ज्ञानं भास्कराय अददत्। अस्य आधारेण भास्करः स्वीयां स्वतन्त्रां भास्करसंहिताम् अरचयत्। १६ शिष्यान् ज्ञानमिदम् अध्यापितम्। ते शिष्याः तैः शिष्यैः पुनः स्वीया संहिताः अरचयन्। एतेषु विभिन्नेषु आख्यानेषु स्पष्टं ज्ञायते यत् आयुर्वेदः जीवनरक्षा-सम्बन्धी शाश्वतः परम्पराप्राप्तः ग्रन्थः विद्यते। एषा ज्ञानपरम्परा समयानुगुणं विकासशीला अभवत्। येन अद्य वयम् एतादृशं विशालम् आयुर्वेदवाङ्मयं प्राप्तवन्तः।

## आयुर्वेदस्यावतरणम्

**दक्षप्रजापतिः**

↓

- अश्विनीकुमारौ
  - ↓ इन्द्रः
    - ↓ अत्रिः (संप्रदायः)
      - ↓ अत्रिः/ पुनर्वसुः
        - ↓ अग्निवेशः भेलः जतुकर्णः पाराशरः हारितः -क्षारपाणिः
    - ↓ धन्वन्तरिः
      - ↓ सुश्रुतः औषधेनुः-करवीर्यः वैतरणः - औरभ्रः- पौष्कलावन्तः गोपुररक्षितः- भोजः
- भास्करः
  - ↓ धन्वन्तरिः (भास्करसंप्रदायः)

**संहिताग्रन्थस्य परिचयः**

आत्रेयसम्प्रदाये अग्निवेशादयः तथा च धन्वन्तरिसम्प्रदाये सुश्रुतादयः स्वीयाः संहिताः अरचयन्। अनेन प्रकारेण संहिताग्रन्थानां रचनायाः आरम्भः जातः। अस्मात् पूर्वं ब्रह्मसंहितायाः धन्वन्तरिससंहितायाः भास्कारसंहितायाः च उल्लेखः प्राप्यते। परन्तु इमाः संहिताः ग्रन्थरूपेण निबद्धाः न आसन् अपि तु अस्य विषयस्य क्रमबद्धविवेचनं मौखिकरूपेण परवर्तीनां सन्ततीनां हस्तान्तरितं कृतम्। यस्यै संहिता इति संज्ञा पदत्ता।

विषयस्य समग्राणि अङ्गानि यस्मिन् समाविष्टानि भवन्ति सा 'संहिता' कथ्यते। एतादृशी एकस्याः एव संहिताया पठनेन समस्तविषयाणां बोधः भवति। अस्याः कृते अन्येषां ग्रन्थानाम् आवश्यकता नास्ति।

प्रारम्भिककाले एव विभिन्नैः महर्षिभिः आयुर्वेदस्य नैकसंहितानाम् रचनाः कृताः। यस्य अस्तित्त्वस्य ज्ञानम् अस्माभिः परिवर्तिग्रन्थेषु उपलब्धेन उदाहरणेन प्राप्यते। तदानीं इमाः संहिताः 'तन्त्र' इति नाम्ना प्रसिद्धा आसन्। अत्र वयम् अस्याः संहितायाः कालक्रमानुसारं विवेचनं कुर्मः।

**प्राचीनकालः**

प्राचीनसंहितासु चरकसंहिता-सुश्रुतसंहिता-भेलसंहिता-काश्यपसंहिताः सम्प्रति आयुर्वेदस्य मूलाधाररूपेण उपलब्धाः सन्ति। यासु प्रथमे द्वे संहिते पूर्णतया तथा अन्ये द्वे संहिते खण्डिते उपलभ्येते। हारितसंहितायाः अपि एकः ग्रन्थः प्रकाशितः यस्य मौलिकत्त्वं संदिग्धं वर्तते। एतदतिरिच्य वाग्भटस्य अष्टांगसंग्रहः तथा अष्टांगहृदयं चापि संहिते मन्येते।

आयुर्वेदशास्त्रे चरकसंहिता-सुश्रुतसंहिता-अष्टांगहृदयानि इति त्रयः ग्रन्थाः बृहत्त्रयीषु गण्यन्ते। वाग्भट्टस्य कालः संहिता कालस्य अन्तिमचरणम् आसीत्।

ऋषीणां प्रतिभा एवं च ज्ञानबलेन प्राप्तानां प्रकीर्णोपदेशानां सामूहिकरूपेण एकत्रीकृत्य ग्रन्थस्य स्वरुप-प्रदानम् अर्थात् संहिता। संहितायाः अपेक्षया तन्त्रस्य स्वरूपं संक्षिप्तं वर्तते। तद्यथा अग्निवेशस्य रचना मूलरूपेण अग्निवेशतन्त्रम् यस्य बृंहणं कृत्वा चरकेण चरकसंहितायाः स्वरूपं प्रदत्तम्। अनेन प्रकारेण धन्वन्तरिसंप्रदायस्य सम्बद्धा सुश्रुतसंहिता अस्ति। तथैव काश्यपसंहिताया अपि निर्माणं जातम्।

संहितायाः निर्माणकार्यं ऋषिभिः कृतम्। तस्मिन् काले तान् उपदेशान् शब्दशः तैः शिष्यैः स्वीकृत्य तस्य अर्थावबोधस्य भावार्थस्य च प्रथा प्रचलिता। शिष्यैः निर्माणकार्यान्तरम् अपि ऋषीणां मूलभावानां तत्र समावेशो भवति अतः संहितायाः मूलनामकरण मूलाचार्यानुगुणं भवति। अनन्तरं प्रतिसंस्कर्तुः नामानुगुणं संहितायाः नामाभिधानम् अभवत्। यथा चरकसंहिता-सुश्रुतसंहितादयः। अनेन प्रकारेण एकेनैव विषयाङ्गेन सर्वेषां वर्णनीयविषयाणां वर्णनं कृत्वा संहितायाः स्वरुपं प्रदत्तम्। एवं तस्य विषयस्य संहितायाः अध्ययनेन तस्य विषयस्य संपूर्णम् अध्ययनम् अर्हति। पुनः अन्यायाः संहितायाः अध्ययनस्यावश्यकता न भवति।

संहितायाः निर्माणं वैदिककालस्य अन्तिम्चरणाद् आरभ्य सम्भवतः प्रथमशताब्दि-पर्यन्तं प्रचलितं जातम्। तदनन्तरं संग्रहः एवं च व्याख्या-पद्धतिः प्रारभत्।

अस्याः संहितायाः सूक्ष्मनिरीक्षणेन ज्ञायते यत् गुरु-शिष्यसंवादः-वादविवादः संहितायाः समानत्वादिवर्णनेन इमाः सर्वाः समकालीनाः प्रतीयन्ते। आत्रेय-संप्रदाय-धारा कायचिकित्सा-प्रधान-संहितायाः अग्निवेशतंत्रस्य भेलसंहितायाः हारीतसंहितायाः पराशरसंहितायाः जतुकर्णसंहितायाः क्षारपाणी-संहितायाः रचना जाता। अग्निवेशतन्त्रं प्रति संस्करणं भूत्वा सम्प्रति चरकसंहितानाम्ना उपलभ्यते। एवं प्रकारेण धन्वन्तरिसंप्रदायः शल्यचिकित्साप्रधानं सुश्रुतसंहितायाः रचना कृता। कश्यपः मरिचः कौमारभृत्यः प्रधानायाः काश्यपसंहितायाः रचनाम् अकुर्वन्। विदेहाधिपति-द्वारा शालक्यतंत्र-प्रधान-संहितायाः रचना जाता या सम्प्रति उपलब्धा नास्ति। भेलसंहिता खण्डितरूपेण उपलब्धा अस्ति। पराशर-क्षारपाणि-जतुकर्णसंहिताः अनुपलब्धाः सन्ति। हारित इति नामाभिधाना एका संहिता प्राप्यते यथाः मूलं नोपलभ्यते। इमाःविहाय भारद्वाजसंहिता-खरनादसंहिता-विश्वामित्रसंहिता-अगत्स्यसंहिता-अत्रिसंहितानां निर्माणं जातम्। दुर्भाग्यवशात् अद्य इमाः अनुपलब्धाः। आयुर्वेदे भावप्रकाशसंहिता शार्ङ्गधरसंहिता- माधवनिदानमिति नाम्ना लघुत्रयीति सुप्रसिद्धग्रन्थाः सन्ति।

| → संहिताः | लेखकाः |
|---|---|
| भावप्रकाश संहिता | भावप्रकाशः। |
| शार्ङ्गधरसंहिता | शार्ङ्गधरः। |
| माधवनिदानसंहिता | माधवकरः। |

*** संहिताग्रन्थस्य लेखकानां परिचयः**

**१. आत्रेयः**

महर्षि आत्रेयः अत्रिऋषेः पुत्र आसीत्। सः कायचिकित्सायाः विशेषज्ञः आसीत्। इदम् आयुर्वेदस्य ज्ञानं भारद्वाजस्य सकाशात् प्राप्तवान्।आत्रेयः स्वीयान् षड्शिष्यान् आयुर्वेदस्य ज्ञानं अदात् ते यथा अग्निवेशः, भेलः, जतुकर्णः, पराशरः, हारितः, क्षारपाणिः च। आत्रेयः भगवान् आत्रेयः, पुनर्वसुःआत्रेयः, कृष्णात्रेयःचान्द्रभागादि नाम्ना अपि ज्ञायते। अस्य जन्म पुनर्वसुनक्षत्रे अभवत् अतः पुनर्वसुआत्रेय इति नाम्ना अपि ज्ञायते। अयं कृष्णयजुर्वेदस्य अनुगामी आसीत्। अतःसः कृष्णात्रेयः कथ्यते। अस्य मातुः नाम चन्द्राभागा आसीत् अतः सः चान्द्रभागः कथ्यते। अत्रिः महर्षि-ब्रह्मर्षि-भगवानादिभिः विशेषणैः सम्बोध्यते। अयम् अग्निहोत्री अपि कथ्यते। अयम् आयुर्वेदवित्सु श्रेष्ठः भिषग्विद्यायाःप्रवर्तकः च आसीत्। सम्प्रति उपलब्धायाः चरकसंहितायाः मूलकर्ता आत्रेय पुनर्वसुः आसीत्।अस्य संप्रदायः आत्रेयसंप्रदायः इति नाम्ना प्रसिद्धः। अस्य कालः इ.स. पू.३००० इति मन्यते।

**२. धन्वन्तरि :**

भगवान् धन्वन्तरिः आयुर्वेदस्य देवता-रूपेण प्रसिद्धः अस्ति। धन्वन्तरि-शब्दस्यार्थः धनु+अंतरि। धनुः अर्थात् शल्यशास्त्रं तथा अन्तरि अर्थात् विशेषज्ञः कुशलः च। यः शल्यशास्त्रे कुशलः सः धन्वन्तरिः। धनुः शल्यशास्त्रं तस्य अन्तं पारमियति गच्छति इति धन्वन्तरिः। पौराणिककाले सुराः असुराः च अमृतप्राप्त्यर्थं समुद्रमन्थनं कृतवन्तः। तस्मिन् समये अन्तिमचतुर्दशरत्नरुपेण अमृतकलशेन सह धन्वन्तरिः प्रादुर्भूतः। धन्वन्तरिः विष्णोः अवतारः मन्यते। अयं काशिनरेशः दिवोदास रूपेण जन्म अलभत् । धन्वन्तरि-दिवोदासेन शल्यतंत्रस्य ज्ञानं स्वीयेभ्यः सप्तशिष्यान् सुश्रुतः, औषधेनवः, वैतरणः, औरभ्रः, पौष्कलावन्तः, करवीर्यः, गोपूररक्षितःइति तेभ्यः च प्रदत्तम्। धन्वन्तरिः आयुर्वेदस्य ज्ञानं इन्द्रात् प्राप्नोत्। भगवान् धन्वंतरिः चर्तुभुर्जयुक्तः तस्य प्रत्येकं हस्ते शखः चक्रं-जलौका अमृतकलशः च धृतः अस्ति एतादृशं वर्णनं प्राप्यते। प्रतिवर्षं संपूर्ण देशे आश्विनकृष्णत्रयोदश्यां वा धनत्रयोदश्यां धन्वन्तरिजयन्तिरूपेण मन्यते।

नमामि धन्वन्तरिमादिदेवं सुरासुरैर्वन्दितपादपद्मम्।

लोके जरारुग्भयमृत्युनाशे दातारमीशं विविधौषधीनाम्॥ काशिराजः दिवोदासरूपेण धन्वन्तरेः समयः इ. स. पू.१५०० मन्यते। दिवोदासधन्वन्तरेः उपदेशान् सुश्रुतेन स्वीयां संहितायां निबद्धाः येन शल्यतंत्रस्योपजीव्यनामकग्रन्थः अभवत्।

**३. कश्यपः**

कश्यपः वृद्धजीवकतन्त्रस्य उपदेशकः अस्ति। वृद्धजीवकतन्त्रं काश्यपसंहिता इति नाम्ना प्रसिद्धम्। ऋचिकपुत्रः वृद्धजीवकः तेषाम् उपदेशानाम् ग्रन्थरुपेण निबन्धनमकरोत्। मारिचः कश्यपनाम्ना प्रसिद्धः आसीत्। एषः इन्द्रात् आयुर्वेदस्य ज्ञानं प्राप्तवान्। एवं च जीवकनामकं स्वशिष्यम् आयुर्वेदस्य ज्ञानं प्रदत्तवान्। कश्यपस्य समयः ६०० शताब्दी मन्यते। जीवकः स्वीय-गुरोः समीपतः आयुर्वेदस्य ज्ञानं प्राप्य बालरोगः इति विषये एकं ग्रन्थम् अरचयत् यश्च वृद्धजीवकीयतन्त्रम् इति नाम्ना प्रसिद्धः। कालक्रमेण एषा

संहिता यदा लुप्ता जाता तदा वात्स्यनाम्ना आचार्येण तस्याः प्रतिसंस्कारः कृतः। या कश्यपसंहितानाम्ना प्रसिद्धा। काश्यपसंहितायां कश्यपः जीवकः वात्त्स्यःच एषां त्रयाणाम् ऋषिणां योगदानं दत्तं वर्तते। बालरोगः अस्याः संहितायाः मुख्यविषयः अस्ति। सांप्रतकाले उपलभ्यमानायां संहितायां–

| | | | |
|---|---|---|---|
| २०० | अध्यायाः | ०८ | शारीरः |
| ०८ | स्थानम् | १२ | इन्द्रियाणि |
| ३० | सूत्राणि | १२ | चिकित्साः |
| ०८ | निदानाः | १२ | सिद्धयः |
| ०८ | विमानाः | १२ | कल्पाः |
| ८० | खिलस्थानानि प्राप्यन्ते | | |

**४. अग्निवेशः**

अग्निवेशः आयुर्वेदस्य ज्ञानं पुर्नवसुआत्रेय समीपतः प्राप्तवान्। सः पुनर्वसु आत्रेयस्य शिष्यः आसीत्। आत्रेयस्य शिष्यपरम्परासु सर्वप्रथमम् अग्निवेशस्य समावेशो भवति। तद्यथा – अग्निवेशः भेलः जतुकर्णः– पराशरः – हारितः– क्षारपाणिः च । सर्वेषु शिष्येषु अयं बुद्धिमान् आसीत्। शिष्यत्वेन अनेन आत्रेयमुनिना उपदेशाः ग्रन्थरूपेण निबद्धाः यस्य नामकरणं अग्निवेशतन्त्रं कृतम्, तत् हुतावेशं तथा वन्हिवेशः नाम्नाऽपि ज्ञायते। महर्षिचरकेण अस्य तंत्रस्य प्रतिसंस्कारं कृत्वा तत् अधिकं लोकप्रियं कृतं तथा च तस्याः चरकसंहिता इति नामाभिधानं कृतम्। अस्य ग्रन्थस्य संहितायाः स्वरूपं महर्षिचरकेण प्रदत्तम्, अस्य मूलरूपम् अग्निवेशविरचितम् अग्निवेशतन्त्रम् आसीत्। अग्निवेशस्य समयः १००० शताब्दी मन्यते मूलम् अग्निवेशतन्त्रम् १२००० श्लोकेषु निबद्धम्। मूलम् अग्निवेशतन्त्रं दुर्भाग्यवशात् इदानीम् अनुपलब्धम् ।

**५. सुश्रुतः**

सुश्रुतः विश्वामित्रस्य पुत्रः आसीत्। सुश्रुतेन आयुर्वेदस्य एवं शल्यतंत्रस्य ज्ञानं काशीनरेशदिवोदासात् वा धन्वन्तरे प्राप्तम्। धन्वन्तरेः शिष्यरूपेण अस्य कालः इ. स. पू. १५०० मन्यते । सुश्रुतसंहितायाः निर्माणकाले सुश्रुतानामानौ द्वौ आचार्यौ मिलतः। १ वृद्धसुश्रुतः २ सुश्रुतः सुश्रुतसंहितायाः निर्माणे धन्वन्तरिः, वृद्धसुश्रुतः, सुश्रुतः, नागार्जुनः, चन्द्रटश्च इति आचार्याणां महत्त्वपूर्णं योगदानम् अस्ति। सुश्रुतः आधुनिकशल्यतन्त्रस्य पिता मन्यते। सुश्रुतसंहितायाः शारीरस्थानम् शारीरस्थानेषु सर्वश्रेष्ठं मन्यते।

**‘निदाने माधवः श्रेष्ठः सूत्रस्थाने तु वाग्भटः ।**
**शारीरे सुश्रुतः श्रेष्ठः चरकस्तु चिकित्सिते ॥**

सुश्रुतेन मृतशरीरस्य रक्षणं तथा च शवविच्छेदनप्रक्रियायाः वर्णनं कृतम्। तदतिरिच्य त्वक्‌प्रत्ययारोपणप्रक्रियाः अपि वर्णनं कृतम् वर्तते। शल्यतन्त्रज्ञानां कृते शल्यार्थे योग्यविधीनां वर्णनं कृतम्। तथा च आायुर्वेदे अवशिष्टानाम् अष्टांगानाम् अपि वर्णनं कृतम् । सुश्रुतसंहितायाः ०६ स्थानम् १८६ अध्यायाः वर्तन्ते ।

**६. भेलः**

भेलः गान्धारप्रदेशस्य निवासी आसीत् च अद्य अफघानिस्ताने कंदहारः इति नाम्ना ज्ञायते। भेलस्य समयः ई. पू. १००० इति मन्यते। भेलः पुनर्वसु आत्रेयस्य प्रमुख्येषु शिष्येषु एकः तथा अग्निवेशस्य सहाध्यायी आसीत्। भेलेन भेलसंहितायाः रचना कृता। यस्योल्लेखः प्रायः तन्त्रेषु एवं सर्वासु टीकासु उपलभ्यते। वर्तमाने प्राप्यभेलसंहितायां ०८ स्थानानि तथा ७२० अध्यायाः सन्ति। भेलसंहितानुसारम् ‘आलोचकपित्तस्य’ द्वौ प्रकारौ स्तः। १ चक्षुवैशेषिकः। २ बुद्धिवैशेषिकः।

मनः शरीरस्य शिरोपरि वर्तते इति भेलः मन्यते। भेलसंहितायां तत्कालीनस्य अगदतन्त्रस्योल्लेखः प्राप्यते। सुश्रुतसंहितायाः तथा भेलसंहितायाः समानत्वम् अपि कुत्रचित् दृश्यते।

**७. हारितः**

पुनर्वसुआत्रेयस्य षड्शिष्येषु एकः मुख्यः शिष्यः हारितः आसीत्। अस्य नाम्ना हारितसंहिता प्रसिद्धा या वाग्भटेनः तथा परवर्तिव्याख्याकारैः उद्धृता वर्तते। अस्य समयः इ. पू. १००० मन्यते। मूलहारितसंहिता अद्य अनुपलब्धा। वर्तमानकाले उपलभ्यमानायाः हारितसंहितायाः लेखकः अन्यः प्रतीयते। येन ‘हारितः’ इति नाम्ना हारितसंहितायाः रचना कृता। अस्य ग्रन्थस्य प्रथमसंस्करणं कलकत्तायां इ.१८८७ वर्षे अभवत्। अस्य द्वितीय–संस्करणं सूत्रस्थानम् फ्रेंचअनुवादेन सह विस्तृतटीकया च सह १९७४ वर्षे पोण्डिचेरी इत्यस्मिन् स्थाने प्रकाशितम्ः अभवत्।

**८. वात्स्यः**

वात्स्यः वृद्धजीवकस्य वंशे तथा वत्स नामके गोत्रे उत्पन्नः अभवत् । अयं वत्स्यदेशं न्यवसत् इति मन्यते । सः वेदानाम् अध्ययनं वृद्धजीवकतंत्रस्य (काश्यप संहितायाः) पुनः प्रतिसंस्करणं कृत्वा प्रसिद्धम् अकरोत् इति अनुमीयते। कालक्रमेण काश्यपसंहितायाः नाशः भवति तदा वात्स्याचार्येण आमासेन यक्षात् सा संहिता पुनः प्राप्ता ।

**९. दृढबलः**

केचन विद्वांसः मन्यन्ते यत् चरकस्य संहितानिर्माणकार्यम् अपूर्णम् अवशिष्टम् आसीत् सा संहिता दृढबलेन पूर्णा कृता। किन्तु अधिकतमा सम्भावना सा अस्ति यत् चरकेण एव संहितायाः संपूर्णं प्रतिसंस्करणं कृतं स्यात् किन्तु राजकीयैः अन्यै-वा कारणैः सा कालक्रमेण खण्डिता यस्याः च पूर्तिः दृढबलेन कृता। एतस्याः प्रबलं प्रमाणम् इदमेवास्ति यत् स्वयं दृढबलः स्वकृत-प्रतिसंस्कृत-स्थानानाम् अन्ते ''अग्निवेश कृते तंत्रे चरकसंस्कृते'' इत्येव निर्देशयति। यदि एषः भागः चरकेण प्रतिसंस्कृतः न स्यात् तर्हि सः चरकस्य नामापेक्षया स्वस्यैव नाम अलेखयिष्यत्। वर्तमानचरकसंहितायाः अन्ते एषः उल्लेखः प्राप्यते यत् १/३ भागः तस्मिन् समये अनुपलब्धः आसीत्। यं च दृढबलः अन्यतंत्राणाम् आधारेण अपूरयत्। अस्मिन् भागे-

| | | | |
|---|---|---|---|
| १. चिकित्सास्थानस्य | - | १७ | अध्यायाः |
| २. संपूर्णकल्पस्थानस्य | - | १२ | अध्यायाः |
| ३. सिद्धस्थानस्य | - | १२ | अध्यायाः |
| आहत्य | - | ४१ | अध्यायाः भवन्ति। |

दृढबलस्य कालः गुप्तकालः इ. स. ४ वा ५ शताब्दी मन्यते।

**१०. वृद्धवाग्भटः**

**१. आयुर्वेदे वृद्धवाग्भटः** लघुवाग्भटः च एतौ द्वौ उपलब्धौ स्तः। वाग्भटः प्रथमः वा वृद्धवाग्भटः अष्टांगसंग्रहस्य रचयिता आसीत् । यस्य पितुर्नाम सिंहगुप्तः तथा पितामहः वाग्भटः आसीत्। येन अष्टांगानां व्यावहारिकज्ञानं सुलभतया प्राप्तं भवेत्। अपि तु येन आयुर्वेदस्य विशेषज्ञानं पित्रा प्राप्तम् सः भिषग्वरः आसीत्। अस्य समयः इ. ५५० मन्यते।

**२. लघुवाग्भटः** लघुवाग्भटः द्वितीयः एव लघुवाग्भटः। अस्य रचना अष्टांगहृदयम्। अस्य कालः इ. ७०० मन्यते। 'अष्टांगहृदयम्' अष्टांगसंग्रहस्य सारग्राही संक्षिप्तः च संस्करणं वर्तते। अस्य अध्ययनेन संग्रहस्य बोधः सरलतया भवति। अत्र केवलं संक्षिप्तकरणम् एव न अपि तु अनेकतथ्यानां सारलेखनं संकलनं च कृत्वा पृथक्ग्रन्थरुपेण विस्ताररुपेण निर्मितः अयं ग्रन्थः।

अष्टांगहृदये १२० अध्यायाः ०६ स्थानानि वर्तन्ते। लघुवाग्भटरचितः अष्टांगहृदयः आयुर्वेदस्य लघुत्रयीषु एकं महत्त्वपूर्णः भागः वर्तते। अयं कायचिकित्सायाः प्रधानः ग्रन्थः वर्तते। अस्मिन् ग्रन्थे अनेकछन्दसां प्रयोगः दृश्यते। वाग्भटस्य वंशावली एतादृशी कल्पिता वर्तते।

वाग्भटः
↓
सिंहगुप्तः
↓
प्रथमवाग्भटः
↓
सिंहगुप्तः
↓
द्वितीयवाग्भटः

द्वितीयवाग्भटः वृद्धवाग्भटस्य प्रपौत्रः आसीत् इति मन्यते। गुप्तकालीनपरम्परायां पितामहस्य नामानुगुणं पौत्रस्य नामाकरणं भवति। द्वितीयवाग्भटः ब्राह्मणधर्मावलम्बी आसीत्। अस्योपरि बौद्धधर्मस्य अधिकः प्रभावः आसीत्।

**११. नागार्जुनः**

नागार्जुननामकाः अनेके आचार्याः उल्लिखिताः प्राप्यन्ते। तेषां सुश्रुतसंहितानाम् प्रतिसंस्कर्ता नागार्जुनः गुप्तकालीनः मन्यते। तस्य समयः इ. स. ५०० मन्यते। मूलसुश्रुतसंहितायाः १२० अध्याययुक्तः प्रधानग्रन्थः शल्यतंत्रम् आसीत्। यस्मिन् नागार्जुनेन उत्तरतंन्त्रे संयोजितम्। तत्र तस्मात् अतिरिक्ताः ६६ अध्यायाः आसन्।

(१.) उपायहृदयस्य रचयितुः नागार्जुनस्य कालः प्रथमशताब्दी मन्यते।

(२.) सिद्धनागार्जुनस्य कालः अष्टमी–नवमी वा शताब्दी मन्यते।

(३.) गुप्तकालीनस्य रसवैशेषिकस्य नागार्जुनस्य कालः चतुर्थी–पंचमीशताब्दी मन्यते।

(४.) हर्षचरितयस्य नागार्जुनस्य कालः द्वितीया––तृतीया च शताब्दी मन्यते।

एतेषु गुप्तकालीनः रसवैशेषिकः नागार्जुनः सुश्रुतसंहितायाः प्रतिसंस्कर्ता मन्यते कारणं सुश्रुतसंहितायाम् अपि खनिजानां केषाञ्चित् धातुद्रव्याणां च उल्लेखः प्राप्यते।

**१२. जीवकः**

आयुर्वेदे जीवकनामनौ द्वौ आचार्यौ मिलतः १ वृद्धजीवकः २ जीवकः। उभौ जीवकौ बौद्धस्य समकाल इ. पू. ५ वा ६ मध्ये अभवताम्। यस्मिन एकः जीवकः काश्यपसंहितायाः रचयिता वर्तते। यस्य महर्षिः काश्यपः उपदेष्टा आसीत् तथा ऋचीकपुत्रः वृद्धजीवकः तान् उपदेशान् ग्रन्थरुपेण निबद्धवान्।

ऋचिकतनयस्य नाम जीवकः आसीत्। अल्पवयस्त्वात् तस्य कथनस्योपरि ऋषिः विश्वासं न करोति। अतः पञ्चवर्षीय–जीवकेन ऋषीणां समक्षं कनखलस्य गङ्गायाः अवगाहनं कृतम् यदा सः बहिः आगतः तदा वृद्धः अभवत्।

द्वितीय–वृद्धजीवकस्य उद्धरणं शैल्यवैद्यस्य जीवकनाम्नः प्राप्यते। सः तक्षशिलायाः विद्वान् मन्यते। सः आत्रेयनामकात् शल्यविशेषज्ञात् प्राध्यापकात् शल्यकर्मणः शिक्षणम् प्राप्नोत्। सः तक्षशिलायाः विश्वविद्यालयस्य स्नातकः आसीत्। येन देशविदेशेषु चिकित्साक्षेत्रे ख्यातिः प्राप्ता।

**स्वाध्यायः**

**१. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत।**

१. अष्टांगहृदयस्य रचयिता कः ?
(क) अरुणदत्तः (ख) वाग्भटः (ग) लघुवाग्भटः (घ) वृद्धवाग्भटः

२. आयुर्वेदावतरणानुसारम् आयुर्वेदस्य ज्ञानं इन्द्रः कस्मात् प्राप्तवान् ?
(क) प्रजापतेः (ख) अश्विनीकुमाराभ्याम् (ग) भास्करात् (घ) ब्रह्मणः।

३. काश्यपसंहितायाः मूलतन्त्रकारः कः ?
(क) सुश्रुतः (ख) काश्यपः (ग) वृद्धवाग्भटः (घ) वात्स्यः

४. धन्वन्तरेः कालः ख्रीष्टाब्द्याः पूर्वं कः मन्यते ?
(क) १५०० (ख) १००० (ग) २००० (घ) १४००

५. शल्यतंत्रस्य पिता कः मन्यते ?
(क) चरकः (ख) वाग्भटः (ग) सुश्रुतः (घ) कणादः

६. चरकसंहिता कस्य विषयस्य ग्रन्थः वर्तते ?
(क)कायचिकित्सायाः (ख) शल्यतन्त्रस्य (ग) ज्योतिषशास्त्रस्य (घ) धर्नुविद्यायाः

७. आयुर्वेद परम्परायाः प्रारंभः कस्मात् भवति ?
(क)दक्षप्रजापतेः (ख) ब्रह्मणः (ग) धन्वन्तरेः (घ) भास्करात्

८. आयुर्वेदस्य पञ्चम–वेद रूपेण केन रचना कृता ?
(क) प्रजापतिना (ख) भास्करेण (ग) अश्विनिकुमाराभ्याम् (घ) ब्रह्मणा

९. वन्हिवेशः कस्य नाम वर्तते ?
(क) चरकस्य (ख) सुश्रुतस्य (ग) अग्निवेशस्य (घ) वाग्भटस्य

१०. काश्यपसंहिता मुख्यरूपेण कस्य विषयस्य ग्रन्थः अस्ति ?
(क) शल्यतन्त्रस्य (ख) बालरोगस्य (ग) धनुर्विद्यायाः (घ) दर्शनशास्त्रस्य

**२. संक्षेपेण उत्तराणि प्रयच्छत।**

१. अग्निवेशस्य विषये ज्ञापयत।

२. चरकसंहितायाः निर्माणप्रक्रियायाः क्रमं लिखत ।

३. आयुर्वेदेतिहास – शब्दस्य व्याख्यां स्पष्टयत।

४. वाग्भटस्य विषये वर्णयत।

**३. एकेन वाक्येन उत्तरत।**

१. जीवकः वृद्धजीवक इति नाम्ना किमर्थं सम्बोध्यते ?

२. चरकसंहितायाः निर्माणे दृढबलस्य योगदानं स्पष्टयत।

३. वात्स्यस्य विषये ज्ञापयत।

४. सुश्रुतसंहितायां कति स्थानानि अध्यायाः च सन्ति ?

५. 'खिलस्थानम्' कस्याम् संहितायां वर्तते ?

**४. टिप्पणीं लिखत।**

१. आयुर्वेदेतिहासस्य महत्त्वम् ।

२. आयुर्वेदावतरणम् ।

३. संहिताकारद्वयम् ।

**५. उचितेन सह योजयत।**

| (अ) | (ब) |
|---|---|
| १. जीवकः | शल्यतन्त्रम् |
| २. सुश्रुतः | कायचिकित्सा |
| ३. चरकः | बालरोगः |

# २ टीका: टीकाकाराश्च

**१ चक्रपाणि:**

एष: चक्रपाणिदत्त: इति नाम्ना ज्ञायते। अनेन चरकसंहिताया: 'आयुर्वेददीपिका' इति नाम्ना व्याख्या कृता। या सम्प्रति पूर्णरूपेण उपलब्धा अस्ति अत: अस्या: टीकाया: प्रचार: अपि अधिक: अस्ति। अनेन सुश्रुतसंहितोपरि 'भानुमती' नाम्ना व्याख्या लिखिता या केवलं सूत्रस्थानपर्यन्तं लभ्यते। एतद् अतिरिच्य चक्रदत्त: तथा द्रव्यगुणसंग्रह: अस्य प्रसिद्ध: ग्रन्थ: विद्यते। चरकसुश्रुतयो: व्याख्या-लेखनेन अयं चरकचतुरानन: 'तथा च सुश्रुतसहस्त्रनयन:' पदेन विभूषित: कृत:। एष: बंगालप्रान्तस्य लोध्रवली कुलोत्पन्न: आसीत्। अस्य पितुर्नाम नारायणदत्त: तथा गुरु: नरदत्त: आासीत्। अस्य समय: इ. ११०० शताब्दी मन्यते।

**२ डल्हण:**

डल्हण: सुश्रुतसंहिताया: व्याख्याकार: आसीत्। सुश्रुतसंहितोपरि अस्य निबन्धसंग्रह: व्याख्या च प्रसिद्धा वर्तते। अयं मथुरासमीपे अंकोला नाम स्थानस्य निवासी आसीत्। अस्य पितुर्नाम भरतपाल: आसीत्। स: सौरवंशज: ब्राह्मण: आसीत्। अस्य काल: इ. १२०० शताब्दी मन्यते। अयं तत्कालीनानां बहुविधग्रन्थानां टीकाया: उपयोगं कृतवान् यस्याम् तत्कालस्य वाङ्मयस्य महत्त्वपूर्णा सूचना प्राप्यते। अस्यां टीकायाम् औषधीद्रव्याणां विवरणं प्राप्यते।

**३ विजयरक्षित:**

एष: माधवकरकृतस्य 'रोगविनिश्चयस्य' वा माधवनिदानस्य सुप्रसिद्धाया: व्याख्याया: मधुकोषटीकाया: रचयिता आसीत्। अस्य समय: १२ शताब्दी मन्यते। श्रीकण्ठदत्त: अस्य शिष्य: आसीत्। अयं 'मधुकोषटीकाम्' अश्मरीनिदान-पर्यन्तं लिखितवान्। अनन्तरं श्रीकण्ठदत्तेन इयं टीका पूर्णा कृता। अयं पूर्ववर्तिन्या: टीकाया: उपयोगं कृत्वा अस्यां व्याख्यायां स्वीयं स्वतन्त्रचिन्तनं प्रस्तुतं कृतवान्।

**'भट्टारजेज्जटगदाधरवाज्यचन्द्रश्रीचक्रपाणि बकुलेश्वर सेनभा:।'**

**ईशानकार्तिकसुकीरसुधीर वेधैर्मैत्रेयमाघवमुखैर्लिखितं विचिन्त्य॥**

**४ अरुणदत्त:।**

एष: बंगालनिवासी मृगाङ्कदत्तस्य पुत्र आसीत्। अनेन अष्टांगहृदयोपरि 'सर्वांगसुन्दरा' टीकाया: रचना कृता। नामानुगुणं एषा टीका संपूर्णेषु अङ्गेषु परिपूर्णा आसीत्। सम्प्रति अष्टांगहृदयस्य संपूर्णटीका उपलब्धा अस्ति। अस्य समय: इ. १३ शताब्दी मन्यते। अयं स्वीयां व्याख्यायाम् अनेकछन्दश: प्रयुक्तवान्। तस्य नामोल्लेख: अपि कृत:। सूत्राणां व्याकरणदृष्ट्या विवरणम् अपि तत्र कृतं वर्तते। अनेन सुश्रुतसंहितोपरि अपि व्याख्या कृता, अपि तु सा इदानीम् अनुपलब्धा।

**५ हेमाद्रि:-**

हेमाद्रि: अष्टांगहृदयोपरि 'आयुर्वेदरसायनं' नाम्ना सुप्रसिद्धां व्याख्यां लिखितवान्। अस्य पितुर्नाम कामदेव: आसीत्। १३०० अस्य समय: मन्यते। आयुर्वेदे रसायनटीकाया: सूत्राणि एवं कल्पस्थानानि पूर्णरूपेण उपलब्धानि सन्ति परं शरीरस्थानम् एवम् उत्तरतन्त्रोपरि इयं टीका अनुपलब्धा। एतदतिरिच्य अयं चतुवर्ग 'चिन्तामणी' नाम-सुप्रसिद्धं ग्रन्थम् अलिखत्। बोपदेवस्य रचना मुक्ताफलं इन्द्रस्य तथा हरिलीलाया: उपरि हेमाद्रि: टीकाग्रन्थम् अलिखत्।

**६ गङ्गाधर:**

गङ्गाधर: चरकसंहितोपरि 'जल्पकल्पतरु:' नाम्नां विद्वद्पूर्णां व्याख्यां लिखितवान् अस्यां टीकायां दार्शनिकविषयाणां गूढमीमांसा कृता वर्तते। अस्य कार्यक्षेत्रं बंगालप्रान्ते मुर्शिदाबाद: आसीत्। आयुर्वेदं विहाय तंत्रम् व्याकरणम् साहित्यम् दर्शनम् उपनिषद् धर्मशास्त्रम् ज्योतिषादिविषयेषु च अस्य ग्रन्था: वर्तन्ते। अस्य आहत्य ७६ कृतय: ज्ञायन्ते। अस्य समय: १८०० वा १९०० शताब्दी मन्यते। अयंकविराज इति उपनाम्ना ज्ञायते। तेन लिखिता जल्पकल्पतरुटीका संपूर्णा उपलब्धा वर्तते। एतद् अतिरिच्य तेन नैके: ग्रन्था: लिखता: वर्तन्ते।

## स्वाध्याय:

**१. अधोलिखितभ्य विकल्पेभ्य: समुचितम् उत्तरं  चिनुत।**

१. गङ्गाधरेण चरकसंहितोपरि  लिखिता टीका का?

(क) चरकपञ्जिका (ख) जल्पकल्पतरु: (ग) आयुर्वेद: (घ) आयुर्वेददीपिका

२. हेमाद्रि: कस्या: टीकाया: टीकाकार: ?

(क) सुश्रुतसंहिताया: (ख) काश्यपसंहिताया: (ग) अष्टांगहृदयस्य (घ) अष्टांगसंग्रहस्य।

३. चतुर्वर्गचिन्तामणी ग्रन्थ: कस्य विद्यते?

(क) सुश्रुत (ख) हेमाद्रे: (ग) डल्हणस्य (घ) गंङ्गाधरस्य।

४. अरुणदत्तेन अष्टांगहृदयोपरि लिखिता टीका का?

(क) सर्वाङ्गसुन्दरा (ख) आयुर्वेदरसायणम् (ग) मधुकोषटीका (घ) जल्पकल्पतरु:

५. विजयरक्षित: कस्या: टीकाया: टीकाकार: ?

(क) अष्टांगसंग्रहस्य (ख) सुश्रुतसंहिताया: (ग) चिकित्सासारसंग्रहस्य: (घ) माधवनिदानस्य।

६. डल्हणस्य काल: क: मन्यते?

(क) १२०० (ख) १३०० (ग) १००० (घ) ८००

७. डल्हणेन सुश्रुतसंहितोपरि का व्याख्या लिखिता ?

(क)सर्वाङ्गसुन्दरा (ख) आयुर्वेदरसायणम् (ग) निबन्धसंग्रह: (घ) जल्पकल्पतरु:।

**२. निम्नलिखितासु व्याख्यासु तस्या: काल: तस्या: व्याख्याकर्तृणां नामानितेषां समय: तथा तस्या: वैशिष्ट्यं  निरूपयत।**

१. आयुर्वेदरसायनम् २. जल्पकल्पतरु:

३. मधुकोषटीका ४. सर्वाङ्गसुन्दरा

**३. एकेन वाक्येन उत्तरत।**

१. सुश्रुतसंहितााया: टीकाकार: क: ? तेन लिखिता  टीका का?

२. अष्टांगहृदयस्य टीकाकारा: के?

३. चक्रपाणि: केन उपाधिना सम्मानित: ?

४. अरुणदत्तस्य  व्याख्याया: वैशिष्ट्यं किम्?

५. मधुकोषटीकाया: वैशिष्ट्यं किम्?

**४. सविस्तरम् उत्तरत।**

१. चक्रपाणि:

२. डल्हण:

**५. उचितं मेलनं कुरुत।**

| (अ) | (ब) |
|---|---|
| १. हेमाद्रि: | चरकसंहिता |
| २. चक्रपाणि: | अष्टांगहृदयम् |
| ३. डल्हण: | अष्टांगसंग्रह: |
| ४. अरुणदत्त: | सुश्रुतसंहिता |

# ३ चरकसंहितायाः परिचयः

**संहिताकारः**

सम्प्रति उपलभ्यमाना चरकसंहिता अनेकैः परिवर्तनैः अनन्तरं प्राप्ता। प्रस्तुतं परिवर्तनं सूत्र-भाष्य-संग्रहक्रमेण प्राप्तम्। कालान्तरे चरकसंहितायाः निर्माणं त्रिभिः सोपानैः क्रमशः जातम्।

यथा। १. उपदेष्टा आत्रेयः तथा तन्त्रकर्ता अग्निवेशः

२. प्रतिसंस्कर्ता भाष्यकारः चरकः

३. अंतिमः प्रतिसंस्कर्ता दृढबलः

आयुर्वेदस्य ज्ञानं पुनर्वसु-आत्रेयः भरद्वाजस्य समीपतः प्राप्नोत्। आत्रेयः स्वशिष्यान् आयुर्वेदस्य ज्ञानम् अध्यापयत् तेषु प्रत्येकं स्वनाम्ना तन्त्रम् अलिखत्। तस्मिन् अग्निवेशनामकेन तेजस्विना मेधाविना च शिष्येण लिखितम् अग्निवेशतन्त्रम् आर्ष परिषद अनुमोदितं तथा तन्त्रमेतद् लोके प्रसिद्धम् अभवत्। किन्तु अग्निवेशतन्त्रं सूत्रात्मकं कठिनं च आसीत् अतः बहुजन-समाजः तदवगन्तुं न पारयत्। अस्मिन् समये महर्षिणा चरकेण अस्य तन्त्रस्य प्रतिसंस्कारं कृत्वा तत् अधिकं लोकप्रियं कारितं तस्य च चरकसंहिता इत्यैवं नामाभिधानम् अभवत्। अग्निवेशतन्त्रे यानि सूत्राणि कठिनान्यासन् यानि च संक्षिप्तानि तेषां विस्तारः कृतः, तस्य तन्त्रस्य भाषा च सरला कृता। चरकसंहितायाः अध्यायस्य अन्ते ''इति-अग्निवेश-विरचित--चरकप्रतिसंस्कृते'' इति प्राप्तम् अस्ति। तत् चरकसंहितायाः मूलम् अग्निवेशतन्त्रम् अस्ति एवं सिद्धं करोति। दृढबलेन चरकसंहितायां १/३ भागः योजितः प्रतिसंस्करणकृतञ्च दृढबलेन।

चरकसंहितायाम् ४१ अध्यायाः योजिता - येषु-

| | | |
|---|---|---|
| चिकित्सास्थाने | - | १७ |
| संपूर्णकल्पस्थाने | - | १२ |
| संपूर्णसिद्धस्थाने | - | १२ |

**अस्मिन् सप्तदशाध्यायाः कल्पसिद्धयः एव च।**
**नासाद्यन्तेऽग्निवेशस्य तन्त्रे चरकसंस्कृते ॥**
**तानि तान् कपिलबलिःशेषान् दृढबलोऽकरोत् ।**
**तन्त्रस्यास्य महार्थस्य पूरणार्थे यथातथम् ॥**

**च / चि** / ३०/२८९/२९१

अनेन प्रकारेण संपूर्णचरकसंहितायाः विषयवस्तु गुरुसूत्रे शिष्यसूत्रे प्रतिसंस्कर्तासूत्रे च एकीयसूत्रे विभक्ते वर्तते।

**चरकसंहितायाः कालः**

चरकसंहितायाः निर्माणं त्रिभिः स्तरैः जातम्। यथा - अग्निवेशः चरकः दृढबलश्च।

१. मूलतन्त्रकारस्य अग्निवेशस्य समयः इ. स. पू. १२०० इति मन्यते।

२. प्रतिसंस्कर्ता आचार्यः चरकः शृंगकालीनः मौर्य- शृंगकालयोः संधिरेखायाम् स्थापितः अस्ति। तस्य समयः इ. स. पू. २-३ शताब्दी इति गण्यते।

३. दृढबलः गुप्तकालीनो विद्यते। तस्य कालः इ. स. ४ शताब्दी विद्यते तेन च चरकसंहितायाः अन्तिमः प्रतिसंस्कारः कृतः।

**अध्यायविभाजनम् :-**

चरकसंहितायाः विषयाः ०८ स्थानेषु १२० अध्यायेषु च विभक्ताः वर्तन्ते।

तद्यथा -

**चरकसंहिता**

| **क्रमः** | **स्थानानि** | **अध्यायाः** |
|---|---|---|
| १. | सूत्रस्थानम् | ३० |
| २. | निदानस्थानम् | ०८ |
| ३. | विमानस्थानम् | ०८ |
| ४. | शारीरस्थानम् | ०८ |
| ५. | इन्द्रियस्थानम् | १२ |
| ६. | चिकित्सास्थानम् | ३० |
| ७. | कल्पस्थानम् | १२ |
| ८. | सिद्धिस्थानम् | १२ |
| | आहत्य | १२० |

पाणिनेः अष्टाध्याय्याः अनुसारं चरकसंहितायाः चतुष्पाद रचना शैली जाता। अस्मिन् सूत्रस्थानेऽपि चतुर्णाम् अध्यायानां चतुष्कं निर्मितम्ः। तद्यथा –

१. औषधचतुष्कम्
२. स्वस्थचतुष्कम्
३. निर्देशचतुष्कम्
४. कल्पनाचतुष्कम्
५. रोगचतुष्कम्
६. योजनाचतुष्कम्
७. अन्नपानचतुष्कम्।

अन्तिमभागयोः द्वौ अध्यायौ संग्रहाध्यायौ कथ्येते। अध्यायानाम् अधिका संख्या सूत्रस्थाने चिकित्सास्थाने च वर्तते। अनेन स्पष्टं भवति यत् चरकेण मौलिकसिद्धान्तानां तथा च कायचिकित्सायाः प्रमुखं विवेचनं कृतं वर्तते। संशोधनचिकित्सायां विशेषं बलं प्रदत्तम् अस्ति। तस्मिन् काले चिकित्साकार्यं धमार्थम् आसीत् न तु अर्थप्राप्तये।

अत्र इन्द्रियस्थाने अरिष्टलक्षणानां वर्णनं शरीरस्थाने प्रमुखदर्शनम् एवं शारीररचनायाः वर्णनं वर्तते। एवं प्रकारेण चरकसंहिता मौलिकसिद्धान्तानां कायचिकित्सायाः च प्रधानग्रन्थः वर्तते। अयम् आत्रेयसंप्रदायस्य प्रमुखग्रन्थः मन्यते। आयुर्वेदस्य बृहत्त्रयीषु चरकसंहिता मूर्धन्या मन्यते।

चरकसंहितोपरि एतैः संस्कृतटीकाः कृताः।

| **क्रम** | **आचार्यः** | **टीका** |
|---|---|---|
| १. | भट्टारः हरिचन्द्रः | चरकन्यासः |
| २. | स्वामिकुमारः | चरकपञ्जिका |
| ३. | जेज्जटः | निरन्तरपदव्याख्या |
| ४. | चक्रपाणिः | आयुर्वेददीपिका |
| ५. | शिवदाससेनः | तत्त्वचन्द्रिका |
| ६. | गंगाधरराय: | जल्पकल्पतरुः |
| ७. | योगीन्द्रनाथसेनः | चरकोपस्कारः |
| ८. | ज्योतिषचन्द्रसरस्वती | चरकप्रदीपिका |

**चरकसंहितानिर्माणे आचार्याणां योगदानम् :**

**३. अग्निवेशस्य योगदानम् :-**

- चतुष्पादसिद्धांतः
- षोडशकलापुरुषस्य वर्णनम्
- प्राचीनसांख्ययोगदर्शनस्योल्लेखः
- त्रिदोषसिद्धान्तस्य प्रतिपादनम् । तेषु वातमहिम्नः विशेषवर्णनम्।
- इन्द्रियविषये चिन्तनम्।
- हृदयस्य वर्णनं तस्य पुण्डरीकाकारस्य च वर्णनम्।

- दशप्राणायतनस्य कल्पना
- भूतविद्या- मधुविद्या- रसोत्पत्तिः- एषणा सदसत्  परलोकः एतेषां कल्पना वर्णनम् च
- ऋषिपरिषदायोजना।
- मानवस्य परमायुः तथा वैद्यस्य तृतीयजातिविषये वर्णनम्।
- लेखनशैली उपनिषद्कालीना।
  यथा - इति ह स्माह भगवान् आत्रेयः इत्यनेन अध्यायस्य प्रारम्भः।
- देश-प्रदेशस्य वर्णितानि स्थानानि उपनिषदकालीनानि वर्तन्ते।
  यथा - पाञ्चालक्षेत्रम्।
  - काम्पिल्यक्षेत्रम्।

**२. चरकस्य योगदानम्**

- आयुर्वेदावतरणम्
- प्रौढाभाषाशैली
- क्षणिकविज्ञानवादः तया स्वभावोपरमवादः
- नास्तिकतायाः खण्डनम्
- वादमार्गः तथा सम्भाषाविधिः
- तर्कः तथा प्रमाणविचार :
- पदार्थविचार :
- अष्टांगविभाग :
- पश्चिमोत्तरप्रदेशानाम् उल्लेख :
- वर्णाश्रमव्यवस्था
- संस्कारानां सद्वृत्तीनां वर्णनं
  राजव्यवस्थादयः च।

**३. दृढबलस्य योगदानम्**

- शुभमंगलद्रव्याणाम् उल्लेखः।
- मद्यपानवर्णनम्।
- विष्णुसहस्त्रनाम्नः तथा विषमज्वरस्य उल्लेख :।
- तन्त्रस्य वर्णनम्।
- कायशास्त्रसम्बन्धितविषयाणां वर्णनम्।
- दृढबलेन ग्रन्थस्य अन्ते निरूपितं यत् -
  'यदिहास्ति तदयन्त्र यन्नेहास्ति न तत् क्वचित् '

**स्वाध्यायः**

**१. बहुविकल्पाः प्रश्नाः समाधेयाः ।**

१. चरकसंहितायाः उपदेशकः कः ?

(क) आत्रेयः (ख) धन्वन्तरिः (ग) दिवोदासः (घ) काश्यपः

२. चरकसंहितायां दृढबलेन कति अध्यायाः संपूरिताः ?

(क) १७ (ख) ४१ (ग) ५१ (घ) १५

३. चरकसंहितायाः सूत्रस्थानं कति चतुष्केषु विभाजितम् ?

(क) ७ (ख) ६ (ग) ५ (घ) ४

४. चरकसंहितोपरि भट्टारहरिश्चन्द्रेन लिखिताया: टीकाया: नाम किम् ?

(क) चरकन्यास: (ख) चरकजीवीका (ग) तत्वचन्द्रिका (घ) जल्पकल्पतरु:

५. चरकसंहिताया: मूलतन्त्रकारस्य: अग्निवेशस्य समय: क: ?

(क) इ. पू. १००० (ख) इ. पू. १५०० (ग) इ. पू. १६०० (घ) इ. पू. २०००

६. चरकसंहिताया: अन्तिम-द्वयो: अध्यायियो: नाम किम् ?

(क)संग्रहाध्याय: (ख) सूत्राध्याय: (ग) बृहताध्याय: (घ) निदानाध्याय:।

७. आयुर्वेदटीकाया: टीकाकार: क :?

(क)चक्रपाणि: (ख) जेज्जट: (ग) गंगाधर: (घ) स्वामिकुमार:

**२. एकोत्तरीया: प्रश्ना: समाधेया:।**

१. चरकसंहिताया: निर्माणस्तरस्य नामानि लिखत ।

२. चरकसंहिताया: अध्यायसंख्यां स्थानसंख्यां च लिखत ।

३. चरकसंहिता कस्यां मूर्धन्या मन्यते।

४. चरकसंहिताया: अन्तिमसंस्कर्तु : नाम कालं च लिखत।

**३. संक्षिप्तोत्तरीया: प्रश्ना: समाधेया:।**

१. चरकोक्तं सूत्रस्थानचतुष्कं वर्णयत।

२. चरकस्य योगदानं स्पष्टयत ।

३. अग्निवेशस्य योगदानं ज्ञापयत।

४. दृढबलस्य योगदानं स्पष्टयत।

**४. विस्तेरण लिखत।**

१. चरकसंहितोपरि टिप्पणी कार्या ।

२. चरकसंहिताया: अध्यायविभाजनं कृत्वा टीकाकाराणां विषये लिखत ।

**५. संयोजनं कुरुत।**

| **( अ )** | **( ब )** |
|---|---|
| १. अरुणददत्त: | शशिलेखा |
| २. इन्दु: | आयुर्वेददीपिका |
| ३. चक्रपाणि: | सर्वाङ्गसुन्दरा |
| ४. गयदास: | बृहत्पञ्जिका |

●

# ४ सुश्रुतसंहितापरिचयः

सुश्रुतसंहितोक्त–आयुर्वेदवतरणानुसारम् इन्द्रात् धन्वन्तरिः आयुर्वेदस्य ज्ञानं लब्धवान् एवं सुश्रुतादिभ्यः शिष्येभ्यः प्रयच्छत्। दिवोदास–धन्वन्तरेः उपदेशाः सुश्रुतेन स्वीयसंहितायां निगदिताः, सः शल्यतंत्रस्य उपजीव्यग्रन्थः अभूत्।

द्वौ सुश्रुतौः कथ्यते।

१. वृद्धः सुश्रुतः आद्यसुश्रुतः वा।

२. सुश्रुतः ।

एवं मन्यते यत् काशीराजः दिवादासस्य (धन्वन्तरेः) शिष्यः आद्यः वा वृद्धसुश्रुतः आसीत्। येन मूलसुश्रुततन्त्रस्य रचना कृता। अस्यानन्तरं सुश्रुतः द्वितीयः वा सुश्रुतसेनः अस्य ग्रन्थस्य प्रतिसंस्करणं कृत्वा नवीनरुपं कृतवान्। यस्याः सुश्रुतसंहितायाः उत्तरतन्त्रं नागार्जुनेन कृतम् इति मन्यते। तदनन्तरं तिसटाचार्यस्य पुत्रेणः चन्द्रटेन जेज्जटस्य टीकानुसार सुश्रुतसंहितायाः पाठस्य सिद्धिः कृता।

**सुश्रुतसंहितायाः कालः**

- काशीराजः दिवोदासः धन्वन्तरिः तथा आद्यसुश्रुतः वृद्धसुश्रुतः वा उपनिषद्कालीनः आसीत्। अस्य समयः इ.पू.१००० तः इ.पू. १५०० पर्यन्तं मन्यते।
- सुश्रुतस्य कालः द्वितीया शतब्दी मन्यते। अस्यां सः मूलसंहितायाः प्रतिसंस्कारम् अकरोत्।
- नागार्जुनेन पञ्चम्शताब्द्यां अस्याम् उतरतन्त्रं संयोज्य पुनः प्रतिसंस्करणं कृतम्।
- सुश्रुतसंहितायाः पाठशुद्धिः चन्द्रट–द्वारा ७० शताब्द्यां अभूत्।
- अस्य निर्माणस्य चत्वारः स्तराः सन्ति।

१. वृद्धसुश्रुतस्य कालः इ. पू. १००० तः १५००।
२. सुश्रुतस्य कालः इ. स. द्वितीयशताब्दी ।
३. नागार्जुनस्य कालः पश्चमशताब्दी।
४. चन्द्रटस्य कालः दशमीशताब्दी।

**अध्यायविभाजन्**

मूलसुश्रुसंहितायां विषयवस्तुनः विभाजनम् अनेन प्रकारेण वर्तते।

| क्रम | स्थानानि | अध्यायाः |
|---|---|---|
| १ | सूत्रस्थानम् | ४६ |
| २ | निदानस्थानम् | १६ |
| ३ | शारीरस्थानम् | १० |
| ४ | चिकित्सास्थानम् | ४० |
| ५ | कल्पस्थानम् | ८० |
| ६ | उत्तरतन्त्रम् | ६६ |

सूत्रस्थानात् आरभ्य कल्पस्थानपर्यन्तं आहत्य १२० अध्यायाः सन्ति। प्राचीनसंहितासु प्रायः एतादृशी व्यवस्था दृश्यते। अस्याम् उत्तरतन्त्रम् अनन्तरं संलग्नं कृतम्। उत्तरतन्त्रेण सह संपूर्णाध्यायस्य संख्या १८६ भवति।

**१. सूत्रस्थानम् विषयवस्तु**

दृष्टया सूत्रस्थाने शल्यतन्त्रस्य प्राधान्यम्, आयुर्वेदस्य दीक्षा, यन्त्र शास्त्राणां व्याख्यां तथा तेषां प्रकाशः च शल्यककर्मोपयोगी साधनानि, अरिष्टविज्ञानं तथा च द्रव्यगुणविज्ञानं वर्णितम् अस्ति।

**२. निदानस्थानम्**

वातरक्त अर्दित गृध्रसीअर्शअश्मरीभगंदरकृष्ठप्रमेहमुखरोग दंततालुकण्ढादि- रोगाणां निरूपण वर्तते।

**३. शरीरस्थानम्**

शुक्रम्, आर्तवस्वरूपम् –गर्भिणी अवस्था–गर्भाशये गर्भोत्पत्तिः–वृद्धक्रमादेः शारीरशास्त्रस्य वर्णनं विद्यते।

**४. चिकित्सास्थानम्**

शल्यचिकित्सा वाजीकरणयोगाः रसायनप्रयोगाः पंचकर्मप्रयोगाः च अत्र वर्णिताः वर्तन्ते।

**५. कल्पस्थानम्**

विषमविषप्रकाशः विषयजन्यजीवजन्तुवर्णनम् विषयचिकित्सायाः च वर्णनं विद्यते।

**६. उत्तरतन्त्रम्**

शिरोरोगः तच्चिकित्सानानानेत्ररोगाः चिकित्सा–कौमारभृत्यः कायचिकित्सा–भूतविदां वर्णनं विद्यते।

मूलसुश्रुतसंहिता शल्यप्रधानासीत्। यस्यानन्तरम् अन्यअङ्गानां समावेशेन अष्टांगं संपूर्णं कृतम्। सुश्रुतसंहिताऽपि चरकसंहिता समानः आकरग्रन्थः अस्ति। यस्य समावेशः बृहत्त्रयीषु भवति। अयं ग्रन्थः शल्यचिकित्सायाः पूर्णतः प्रतिनिधित्वं करोति। अनेन तत्कालीनचिकित्साविज्ञानस्य विशेषतः शल्यतंत्रस्य समुन्नतस्थितिः ज्ञायते। सुश्रुतस्य काले आयुर्वेदः जीविकायाः अपि साधनम् अभूत्। तस्मिन् स्पष्टोल्लखः वर्तते यत् चिकित्सायाः प्रयोजनं धर्मार्थकीर्त्यादिः वर्तते। –

**सुश्रुसंहितायाः टीकाग्रन्थाः**

सुश्रुतसंहितोपरि अनेके विद्वांसः टीकाग्रन्थान् लिखितवन्तः। येषु एते प्रमुखाः आसन्।

| **क्रम** | **टीकाकाराः** | **टीकाग्रन्थाः** |
|---|---|---|
| १. | गयदासः | बृहतपजिका–न्यायपञ्जिका वा |
| २. | भास्करः | पञ्जिका |
| ३. | श्रीमाधवः | टिप्पणः |
| ४. | ब्रह्मदेवः | टिप्पणः |
| ५. | चक्रपाणिदत्तः | भानुमतिः |
| ६. | हारणचन्द्रः | सुश्रुतार्थसंदीपनी |
| ७. | डल्हणः | निबन्धसंग्रहः |
| ८. | जेज्जटः | जेज्जटटीका |

**हिन्दीटीकाग्रन्थाः**

| **क्रम** | **टीकाकारा :** |
|---|---|
| १. | भास्करः गोविन्द घाणेकरकृता टीका। |
| २. | अम्बिकादत्तशास्त्रिकृता टीका। |
| ३. | अत्रिदेवविद्यालंकारकृता टीका। |

**विशिष्टयोगदानम्**

१. आद्यसुश्रुतस्य योगदानम्।

२. दार्शनिकतथ्यानां समावेशः

**सुश्रुतस्य योगदानम्**

- देवपूजन–मन्त्र–तन्त्र–बलि आदीनां : तथा देवता–ब्राह्मण–गुरु–गौ–अग्निपूजनस्योल्लेखः।
- जातकर्म–नामकरण–अन्नप्राशन–उपनयन–विवाहादि–संस्काराणाम् उल्लेखः।
- राजनैतिकस्थितिः, नृपस्याधिपत्यम् ।
- सामाजिकीस्थितिः, वर्णाश्रम व्यवस्था सुदृढा।
- आहारस्य राजसि वर्णनम्।
- यौनरोगाणाम् उल्लेखः ।
- पित्तस्य प्रभेदानां नामकरणम् ।

**नागार्जुनस्य योगदानम्**

- तान्त्रिकसंप्रदायस्य प्रभावः।
- नक्षत्रजन्यव्याधीनाम् उल्लेखः।
- विषकन्यायाः वर्णनम्ः ।

- वशीकरणस्य उल्लेख:।
- खनिजानां धातूनां च उल्लेख: ।

**चन्द्रटस्य योगदानम्**

- जलशोधननिक्षेपण शितीकरणविधिनाम् उल्लेख :।
- औपसर्गिकरोगस्य वर्णनम्
- जनपदोध्वंसीयव्याधीषु स्थानपरित्यागस्य निर्देश: कृतोऽस्ति।

## स्वाध्याय:

**१. बहुविकल्या: प्रश्ना: समाधेया।**

(1) सुश्रुतसंहिताया: उत्तरकाले कति अध्याया: सन्ति?

(क) ६९ (ख) ६६ (ग) ३० (घ) १२

(2) सुश्रुतसंहितायाम् आहत्य कति अध्याया: सन्ति ?

(क) १६० (ख) १६६ (ग) १५० (घ) १२०

(3) सुश्रुतसंहिताया: कल्पस्थाने कस्य वर्णनं वर्तते ?

(क) विषस्य (ख) पंचकर्मण: (ग) कौमारभृत्यस्य (घ) शल्यस्य

(4) सुश्रुतसंहिताया: टीका का वर्तते ?

(क) आयुर्वेददीपिका (ख) पञ्चिका (ग) भानुमति: (घ) टिप्पणी:।

(5) सुश्रुतसंहिताया: सूत्रस्थाने कति अध्याया: सन्ति ?

(क) ४६ (ख) ६६ (ग) ३० (घ) १२

(6) सुश्रुतसंहिताया: पाठशुद्धि: केन कृता ?

(क) वाग्भट: (ख) चन्द्रट: (ग) नागार्जुन: (घ) चक्रपाणि:

(7) डल्हणेन, सुश्रुतसंहितोपरि का टीका लिखिता ?

(क) आयुर्वेदस्य सारसंग्रह: (ख) निबन्धसंग्रह: (ग) भानुमति: (घ) पञ्चिका

**२. एकोत्तरीया: प्रश्ना: समाघेया ।**

(1) सुश्रुतसंहिताया: अध्यायविभाजनं लिखत ।

(2) सुश्रुतसंहिताया: निर्माणस्तरान्: विवेचयत ।

(3) सुश्रुतसंहिताया: सुश्रुतस्य दानं स्पष्टयत ।

(4) सुश्रुतसंहिताया: केचन पञ्चटीकाकाराणाम् एवं तस्य टीकाना नामानि लिखत ।

**३. विस्तृत्तोत्तरीया: प्रश्ना: समाघेया ।**

(1) सुश्रुतसंहितोपरि निबन्धं लिखत ।

**४. संयोजनं कुरुत ।**

| | स्थानम् | अध्याय संख्या |
|---|---|---|
| (१) | सूत्रम् | ०८ |
| (२) | निदानम् | ४० |
| (३) | शारीरम् | १० |
| (४) | चिकित्सा | १६ |
| (५) | कल्प् | ४६ |

# ५ अष्टांगसंग्रहः अष्टांगहृदयश्च

अष्टांगसंग्रहस्य रचयिता वाग्भटः वाग्भटः प्रथमः वा नाम्ना प्रसिद्धः। अयं नैकानां प्राचीनसंहितानाम् आधारेण युगानुरुपम् अष्टांगसंग्रहग्रन्थं रचितवान्। वाग्भटप्रथमस्य कालः ई. ५५० मन्यते। प्राचीनसंहिताः एकैकस्य अङ्गस्य प्रमुखं विषयं प्रतिपाादयन्ति। एकस्याः संहितायाः अध्ययनेन सर्वव्याधीनां ज्ञानम् असंभवम् आसीत्। अस्य अतिरिक्तं विषयस्य अव्यवस्था दुरुक्तेः कारणेन समयः व्यर्थः भवति। तन्त्रकाराणां परस्परं वैमनस्येन पाठकानां मनसि भ्रान्तिः उत्पन्ना भवति। अतः वाग्भटेन चिकित्सोपयोगीनां सर्वाङ्गानां व्यावहारिकं ज्ञानम् अल्पकालेन प्राप्त्यर्थम् अष्टांगहृदयस्य रचना कृता। वाग्भटस्य इयं कृतिः आर्षसंहितानां तुलनया लोकभोग्या तथा मानवीयकृता प्रतिमहत्त्वं प्रतिपादयति। इतः जनाः प्राचीनसंहिता एव प्रमाणं मन्यन्ते।

वाग्भटेन चरकसुश्रुतयोः उल्लेखः कृतः एवं तयोः विचाराः स्वीकृताः। संपूर्णग्रन्थः अष्टाङ्गेषु विभक्तः वर्तते। यस्य श्रेयः वाग्भटं प्रति गच्छति। संपूर्णग्रन्थः कायः, बालः, ग्रहः, उर्ध्वाङ्गा, शल्यः, दंष्ट्रा, जरावृषैः एतेषु अष्टांगेषु विभक्तः वर्तते।

**अष्टांगसंग्रहस्य अध्ययानां विभाजनम्**

अष्टांगसंग्रहस्य विषयवस्तु षड्स्वातेषु तथा १५० अध्यायेषु विभक्ताम् व्यवस्थिताम्ः च वर्तते।

| क्रमः | सूत्रस्थानानि | अध्यायाः |
|---|---|---|
| १. | सूत्रस्थानम् | ४० |
| २. | शारीरस्थानम् | १२ |
| ३. | निदानस्थानम् | १३ |
| ४. | चिकित्सास्थानम् | २४ |
| ५. | कल्पस्थानम् | ०८ |
| ६. | उत्तरस्थानम् | ५० |
| | आहत्य | १५० अध्यायाः |

पूर्वावृत्तानुसारेण वाग्भटेन चिकित्सायाः सर्वाणि अङ्गानि वैज्ञानिकरुपेण व्यवस्थितानि कृतानि। चरकसुश्रुतादिप्राचीनसंहितायाः अनुसरणकरणेऽपि अष्टांगसंग्रहः स्वीयान् नैकान् मौलिकाशयान् प्रकटयति।

**अष्टांगसंग्रहस्य टीकाग्रन्थाः**

→ अष्टांगसंग्रहस्य इन्दुकृता 'शशिलेखा' इति व्याख्या प्रसिद्धा। एषा टिका संस्कृतभाषायां वर्तते।
→ अत्रिदेवकृतः हिन्दीटीकाग्रन्थः वर्तते।
→ गोवर्धन छांगाणी तथा लालचन्द्रवैद्यस्य केवलं सूत्रस्थानोपरि हिन्दीटीकाग्रन्थः प्राप्यते।
→ पक्षधर झा कृतः शारीरस्थानोपरि हिन्दीटीकाग्रन्थः विद्यते।

**वृद्धवागभटस्य योगदानम्**

→ पञ्चकफभेदानां नामनिर्धारणम् ।
→ अग्रप्रकरणे अनेकानां नूतनद्रव्याणां प्रस्तुतीकरणम्।
→ कालविभागे ऋतुसन्धीनाम् उल्लेखः।
→ सविशेषम् अन्नपरीक्षायां वर्णनम्।
→ विषस्य चिकित्सोपयोगः।
→ सर्वार्थसिद्धस्य अञ्जनस्य वर्णनम्। यस्य वर्णनं वाग्भटेन हर्षचरिते बादम्बर्यां च कृतं वर्तते।
→ गुग्गुलु रसायनस्य प्रयोगः।
→ कृतान्नवर्गे धारिकाइण्डरिकादयः नवीनकल्पानां वर्णनम्।
→ सूतिकागार-कुमारागार-क्रीडाभ्यादीनां सविस्तरं वर्णनम्।
→ षष्ठीपूजावर्णनम् ।
→ चिकित्सायां स्वर्णमाक्षिकपारदादिधातुनां प्रयोगः।
→ गुह्यरोगाणां स्वतन्त्ररूपेण वर्णनं विद्यते।

**अष्टांगहृदयम्**

अष्टांगहृदयस्य रचना लघुवाग्भटेन द्वितीयेन वाग्भटेन वा कृता वर्तते। इदम् अष्टांगहृदयस्य सारग्राहि संक्षिप्तञ्च संस्करणं वर्तते। महर्षिवाग्भटेन स्वयं उत्तरतंत्रे लिखितं वर्तते यत्–

''**हृदयमिव हृदयमेतत् सर्वायुर्वेदवाङ्मयपयोधे।**''

उत्तरतन्त्रम् ४०/८९

अनेन अध्ययनेन संग्रहस्य बोध: सरलतया भवितुम् अर्हति। अत्र कायचिकित्सा तथा शल्यचिकित्सा इति संप्रदाययो: उपयोगिनां तथ्यानां सन्निवेशो वर्तते। येन एकेन ग्रन्थेन अध्ययनेन उभयो: क्षेत्रयो: नैपुण्यं लभेत। इदं केवलम् अष्टांगसंग्रहस्य संक्षिप्तरूपम् एव नास्ति अपि तु अनेकानां तथ्यानां संङ्कलनं कृत्वा पृथङ्ग्रन्थरुपेण निर्माणं कृतम् वर्तते।

**तेभ्योऽतिविप्रकीर्णेभ्यो प्राय: सारतरोच्चय: ।**
**क्रियतेऽष्टांगहृदयं नातिसंक्षेपाविस्तरम् ॥**

सू. स्था. १/१५

अस्मिन् ग्रन्थे लेखकस्यपरिचय: न लभ्यते। केवलं स्थानद्वयेषु उपलब्धपुष्पिकाभि: ज्ञायते यत्

इति श्री सिंहगुप्तसूनुवाग्भटविरचितायामष्टांगङ्गहृदयसंहितायाम् उत्तरस्थानं समाप्तम्॥

अयं ग्रन्थ: वाग्भट्टस्य वर्तते। चिकित्साग्रन्थेषु अद्यापि दक्षिणभारते अष्टांगहृदयंसर्वाधिका प्रचलिता लोकप्रिया च आयुर्वेदीयसंहिता वर्तते।

अष्टांगहृदयम् अपि अष्टांगसंग्रह इव कपि: बाल:ग्रह: उर्ध्वाङ्गि शल्य दंष्ट्रा–जरा–वृषै: एतेषु अष्टांगेषु विभक्तम् अस्ति।

→ अष्टांगसंग्रहस्य अनुसरणेऽपि अष्टांगहृदयस्य स्वीया अनेका: विशेषता: सन्ति। यथा–

→ संग्रहस्य केचन विवरणा: हृदये उपलब्धा: न भवन्ति।

→ हृदये नैकानि तथ्यानि इदृशाणि सन्ति यानि संग्रहे न सन्ति। यानि साक्षात् चरकसुश्रुतादीनां प्राचीनसंहिताया: उद्धृता सन्ति।

→ क्वचित द्वयो: मतभेदोऽपि दृश्यते।

→ बौद्धधर्मस्य प्रभाव: संग्रहस्य प्रेक्षया हृदये न्यून: वर्तते।

→ सांस्कृतिक दृष्ट्याऽपि द्वयो: भिन्ना दृश्यते। विषयवस्तुदृष्टया संग्रहकार: सुश्रुतहृदयकार: चरकं प्रति आश्रित: अस्ति।

→ अष्टांगसंग्रहस्य रचना गद्ये पद्ये च वर्तते। अष्टांगहृदयस्य रचना पद्ये ऐव वर्तते।

* **लघुवाग्भटस्य योगदानम्**

→ द्रव्यप्रकरणे नूतनानां विशिष्टानां द्रव्यणाम् उल्लेख:।

→ अग्र्द्रव्येषु नावीन्यद्रव्याणां ग्रन्थस्यान्ते रोगानुसारम् उल्लेख:।

→ द्रव्यगुणस्य मौलिकसिद्धान्तक्षेत्रे विपाकस्य लक्षणम्।

→ संग्रह: रक्तं–दोष:–दूष्यं उभयम् अपि मन्यते। किन्तु हृदयं केवलं दूष्यम् एव मन्यते।

→ सप्तसंधे: स्नेहेन द्रव्याणाम् उल्लेख:।

→ चिकित्साप्रकरणे विभिन्नयोगानाम् उल्लेख:।

→ नेत्ररोगेषु नूतनयोग इव गन्धकयुक्तम् पारदर्शकयुक्तम् अञ्जनम्।

→ रसायनप्रकरणे संग्रहोक्त अनैक–द्रव्यस्थाने प्रचलितद्रव्याणां वर्णनम्।

**काल:**

अष्टांगहृदयस्य काल: सप्तमी शताब्दी परिगण्यते।

**अध्यायविभाजनम्**

अष्यंगसंग्रहः विशालः प्रतीयते । किन्तु अत्र अध्यायाः न्यूनाः सन्ति अतः अष्टांगहृदयम् संक्षिप्तम् अस्ति। अत्र ०६ स्थानानि तथा १२० अध्यायाः सन्ति।

| **क्रमः** | **सूत्रस्थानम्** | **अध्यायाः** |
|---|---|---|
| १. | सूत्रस्थानम् | ३० |
| २. | शारीरस्थानम् | ०६ |
| ३. | निदानस्थानम् | १६ |
| ४. | चिकित्सास्थानम् | २२ |
| ५. | कल्पस्थानम् | ०६ |
| ६. | उत्तरतंत्रम् | ४० |
| | आहत्य | १२० |

**टिकाग्रन्था :**

अष्टांगहृदयस्य अपूर्वलोकप्रियतायाः कारणेन तस्योपरि यावत्यः टीकाः लिखिताः सन्ति तावत्यः टीकाः भाग्यवशात् कस्यापि ग्रन्थस्य नैव जाताः। अष्टांगहृदयोपरि ४४ टीकाः लिखिताः सन्ति। तत्र प्रमुखाः टीकाः–

| **क्रमः** | **टीकाकाराः** | **टीकाग्रन्थाः** |
|---|---|---|
| १. | अरुणदत्तः | सर्वांगसुन्दरा |
| २. | हेमाद्रि | आयुर्वेदरसायनम् |
| ३. | चन्द्रचन्दनः | पदार्थचन्द्रिका |
| ४. | आशाधरः | अष्टांगहृदयोद्द्योत |
| ५. | वैद्यतोऽरमल्लकान्हप्रभुः | मनोज्ञः |
| ६. | रामनाथः | अष्टाङ्गहृदयटिका |
| ७. | परमेश्वरः | वाक्यप्रदीपिका |
| ८. | विश्वेश्वरपण्डितः | विज्ञेयार्थप्रकाशिका |
| ९. | दासपण्डितः | हृदयबोधिका |
| १०. | जेज्जटः | अष्टांगहृदयस्य टिका |

अष्टांगहृदयस्यानुवादः हिन्दीम् अतिरिच्य अरबी–तिब्बती तथा जर्मनभाषायाम् अपि टीकाः जाताः।

**स्वाध्यायः**

**१. बहुविकल्पाः प्रश्नाः समाधेयाः।**

१. अष्टांगसंग्रहस्य रचना केन कृता ?

(क) वृद्धवाग्भटेन (ख) लघुवाग्भटेन (ग) चक्रपाणिना (घ) वाग्भटेन

२. अष्टांगसंग्रहोपरि कस्य टीका प्रसिद्धा वर्तते ?

(क) हेमाद्रे (ख) अरुणदत्तस्य (ग) इन्द्रस्य (घ) डल्हणस्य

३. अष्टांगसंग्रहे कति स्थानानि सन्ति ?

(क) ०५ (ख) ०६ (ग) ०४ (घ) ०८

४. अष्टांगसंग्रहस्य सूत्रस्थाने कति अध्याया: सन्ति?

(क) ४०  (ख) ३०  (ग) ६६  (घ) ५०

५. अष्टांगहृदयस्य समय: क: ?

(क) षष्ठी शताब्दी  (ख) पञ्चमी शताब्दी  (ग) तृतीया शताब्दी  (घ) सप्तमी शताब्दी

६. अष्टांगहृदयस्य रचना केन कृता?

(क) नागार्जुनेन  (ख) वृद्धवाग्भटेन  (ग) चन्द्रटेन  (घ) लघुवाग्भटेन

७. अद्यापि अष्टांगहृदयं कुत्र प्रचलितम् अस्ति ?

(क) उत्तरभारते  (ख) पूर्वभारते  (ग) पश्चिमभारते  (घ) दक्षिणभारते

**२. एकैकपदेन उत्तरं लिखत।**

१. अष्टांगहृदयस्य रचना किदृशी अस्ति ?

२. अष्टांगहृदये कौ द्वौ सम्प्रदायौ समाविष्टौ ?

३. अष्टांगहृदयस्य टीकाग्रन्था: के ?

४. अष्टांगसंग्रहस्य अष्टांगानां नामानि लिखत ?

५. अष्टांगहृदयस्य संस्कृतटीका एवं तस्या: कर्तारं ज्ञापयत ।

**३. संक्षेपेण उत्तरं लिखत।**

१. अष्टांगहृदयस्य अध्ययनविभाजनं लिखत।

२. अष्टांगसंग्रहस्य निर्माणप्रक्रियां ज्ञापयत ।

३. अष्टांगसंग्रहस्य कालं ज्ञापयत ।

४. अष्टांगहृदयस्य टिकाकाराणां विषये वदत।

**४. सविस्तारम् उत्तरं लिखत।**

१. अष्टांगसंग्रहविषये सविस्तरं ज्ञापयत।

२. अष्टांगहृदयस्य लघुवाग्भट्स्य योगदानं चर्चयत।

**५. संपादनं कुरुत ।**

| अ | ब |
|---|---|
| १. सूत्रस्थानम् | ४० |
| २. शारीरस्थानम् | ०६ |
| ३. निदानस्थानम् | २२ |
| ४. चिकित्सास्थानम् | ७६ |
| ५. कल्पस्थानम् | ३० |
| ६. उत्तरतन्त्रम् | ०६ |

●

# ६ आयुर्वेदस्य निरुपणम्

आयुर्वेदः विश्वस्य प्राचीनतमासु चिकित्साप्रणालीसु एका विशिष्ट्या प्रणाली वर्तते। अत्रं विज्ञान–कला–दर्शनानां मिश्रणं दृश्यते। एतद् भारतीयम् आर्युविज्ञानं विद्यते। आर्युविज्ञानं विज्ञानस्य एका शाखा वर्तते। या मानवानां निरामयशरीरार्थं रोगात् मुक्त्यर्थं तथा तस्य शमनार्थं तथा आयुवृद्धर्थं कार्यं करोति। चरक–सुश्रुत–काश्यपादीनां मान्यग्रन्थैः आयुर्वेदस्य प्राचीनस्यता सिद्धा भवति। स्वस्थमानवानां स्वास्थरक्षणं तथा रोगीणां रोगाणां दूरीकरणम् आयुर्वेदस्य उद्देश्यं वर्तते। स्वास्थ्य–रक्षणार्थे शरीरस्य प्रकृतेः देशकालादीनां चिन्तनं करणीयम्। प्रतिदिनं नियमपूर्वकं च आहार–विहार–चेष्टा–व्यायाम–शोच–स्नान–शयन–जागरणादि नियमाः तथा गृहस्थ–जीवने उपयोगिनी दिनर्तुरात्रिचर्याणां पालनम् आवश्यकं वर्तते। एतत् अतिरिच्य–

- सङ्कटयुक्तकार्येभ्यः स्वरक्षणम्।
- प्रत्येकं कार्यं विवेकपूर्वकं कर्तव्यम्।
- मन–इन्द्रियाणां नियन्त्रणम्।
- देशकालपरिस्थितीनामनुगुणं शरीरस्य सामर्थ्यम् असामर्थ्यं च विचिन्त्य कार्यं कर्तव्यम्।
- मलमूत्रादीनां नैसर्गिकवेगानाम् अवरोधः न करणीयः।
- इर्ष्या–द्वेष लोभ अहंकारादिभ्यः रक्षणम्।
- शरीरे संचितदोषानां समयानुगुणं निराकरणम्।
- सदाचारस्य पालनं करणीयम्।
- दूषितवायु–जल–देश–कालादीनां प्रभावेण उत्पन्नेषुः ज्वरादिरोगेषु चिकित्सकानाम् उपदेशाः पालनीयाः।
- स्वच्छ–जल–वायु–आहारादीनां सेवनं करणीयम् एतानि सर्वाणि स्वास्थ्यरक्षणस्य साधनानि वर्तन्ते।
- रोगीणाम् विकाराणाम् उपशमनार्थम् उपायानां वर्णनम् आयुर्वेदे त्रिस्कंधात्मकं वर्तते। हेतुः, लिङ्गम् तथ औषधम्, एतेषु त्रिस्कंधेषु आयुर्वेदस्य व्याधिः तथा तेषां लक्षणं चिकित्सायाः विस्तृतं विवेचनं च कृतमस्ति।

**आयुर्वेदस्य लक्षणानि**

हितायुः अहितायुः सुखायुः दुःखायुः च इति चतुर्विधम् आयुः वर्तते। अत्र आयुषः हितम् अहितम् अर्थात् पथ्यम् अपथ्यं, च यस्मिन् आयुषः प्रमाणं स्वरुपं वर्ण्यते सः आयुर्वेदः उच्यते।

''**हिताहितं सुखं दुखम् आयुस्तस्य हिताहितम् ।**
**मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते ॥**'' च. सू. १/४१

अर्थात् यत् शास्त्रम् आयुषः ज्ञानं तथां स्वस्थमानवस्य उत्तरमार्गम् निर्दिशति तद् विज्ञानम् आयुर्वेदः कथ्यते।

चरकः चतुष्प्रकारस्य आयुषः विषये सविस्तारं वर्णयति यथा–

(१.) **सुखायुः**– यः मनुष्यः शारीरिक–मानसिक–रोगात् मुक्तः भवति। विशेषतः युवा अस्ति, तस्य शरीरे बलवीर्यम् अस्ति। पराक्रमी तथा ज्ञानविज्ञानयोः सम्पन्नः। यस्य इन्द्रियाणि स्वकीयं विषयं ग्रहीतुं समर्थानि सन्ति। यः सर्वविधधन–सम्पत्तियुक्तः अस्ति। इच्छानुसारं यस्य प्रत्येकं कार्यं संपूर्णतां याति सः सुखायुः मनुष्यः वर्तते।

(२.) **दुःखायुः**– सुखायुषा विपरीतं दुःखायुः कथ्यते।

(३.) **हितायुः**– यः मनुष्यः सर्वेषां प्राणीनां हितकर्ता अन्येषां धने निर्लेपः, सत्यवादी शान्तिप्रियः विचिन्त्यः, कार्यकर्ता, सावधानेन धर्म–अर्थ–कामादिनां पालनकर्ता–पूज्यजनानां पूजां कुर्वत्–ज्ञानी–विज्ञानी–श्रमशीलः–वृद्धानां सेवापरायणः क्रोध–काम–राग–द्वेष–मद–इर्ष्या–अभिमानादिवेगान् प्रति विमुखः सर्वदा दानी तपो–दान–ज्ञानादिषु सर्वदा तत्परः अध्यात्मविद्यायाः ज्ञाता–अनुष्ठाता आस्तिकः च विद्यते सः हितायुः उच्यते।

(४.) **अहितायुः**– हितायुषा विपरीतम् अहितायुः कथ्यते।

अनेन प्रकारेण आयुर्वेदे आयुषः हितकारकस्य वृद्धिकारकस्य ह्रासकारकस्य च तत्त्वानां वर्णनं विद्यते।

**आयुषः अर्थः**

महर्षिचरकानुसारम् इन्द्रिय–शरीर–मन–आत्मनां संयोगत्वम् आयुः उच्यते। धारि जीवितं नित्यगं अनुबन्धः एते आयुषः पर्यायवाचिनः शब्दाः।

**''शरीरेन्द्रियसत्वात्मसंयोगो धारि जीवितम् ।**
**नित्यगश्चानुबन्धश्च पर्यायैरायुरुच्यते ॥''**

च / सू / १/४२

आयुषः पर्यायवाचीनाम् अर्थःभवति–

धारि अर्थात् यः शरीरं धारयति तत्।

जीवितम् अर्थात् प्राणान् धारयति इति।

नित्यग अर्थात् यः नित्यः गमनशीलः भवति।

''तत्रायुश्चेतनावृत्तिः।'' च. सू. ३०/२२

अर्थात् गर्भतः आयुः पर्यन्तम् अस्मासु या चेतना विद्यते तत् आयुष्यं कथ्यते।

चरकानुसारम् आयुः चतुर्विधं वर्तते।

**आयुष्यस्य सिद्धान्तस्य लक्षणाणि विभाजनम्**

आयुर्वेदे आचार्यचरकेण वादमार्गस्य पदसिद्धान्तः उद्धृतः। आचार्यचरकः वादाय संभाषणाय च काचित् उपयुक्ता संज्ञा चरकसंहितायाः विमानस्थाने प्रस्तौति। तेषु एकः पद इति 'सिद्धान्तः' अस्ति। न्यायदर्शनानुसारं 'सिद्धान्तः' न्यायोक्तषोडशपदार्थेषु एकः पदार्थः वर्तते।

**व्याख्या**

''सिद्धान्तो नाम स यः परीक्षकैर्बहुविधं परीक्ष्य हेतुभिश्च साधयित्वा स्थाप्यते निर्णयः॥

परीक्षकद्वारा नैकवारं परीक्ष्य स्थापितः भवति यः निर्णयः परीक्षकोदेश्यानाम् अनेकविधपरीक्षाद्वारा प्रमाणितः स्थापितः च भवति सः सिद्धान्तः कथ्यते।

आयुर्वेदे चत्त्वारः सिद्धान्ताः सन्ति।

(१.) सर्वतन्त्रसिद्धान्तः।

(२.) प्रतितन्त्रसिद्धान्तः।

(३.) अधिकरणसिद्धान्तः।

(४.) अभ्युपगमसिद्धान्तः।

**(१.) सर्वतन्त्रसिद्धान्तः।**

यः सर्वतन्त्रेषु निर्विवादरुपेण स्वीकार्यः भवति। अर्थात् कुत्रापि तन्त्रे तस्य विरुद्धः कोऽपि प्रतिवादः न सम्भवति तादृशः सिद्धान्तः ''सर्वतन्त्रसिद्धान्तः'' कथ्यते। यथा पञ्चभूतसिद्धान्तः।

**(२.) प्रतितन्त्रसिद्धान्तः।**

यः सिद्धान्तः स्वीयान् विषयान् तन्त्रपर्यन्तम् एव विस्तृतः भवति अथवा विशेषग्रन्थस्य विषयपर्यन्तम् एव मर्यादितः भवति। एतादृशः सिद्धान्तः यः समानतन्त्रे सिद्धः स्यात् तथापि परतन्त्रे सिद्धः न स्यात् सः ''प्रतितन्त्रसिद्धान्तः'' मन्यते।

यथाः– न्यायदर्शने 'शब्दः' अनित्यः मन्यते मीमांसादर्शनेच 'शब्दः' नित्यः मन्यते।

**(३.) अधिकरणसिद्धान्तः।**

क्वचित् पूर्व–अधिकरणस्य संदर्भे स्वीकृत्य नूतनस्य अधिकरणस्य स्थापनम्। सिद्धप्रकरणसंकल्पना वा तस्यैव संदर्भस्य अन्य विषयस्य चर्चां कृत्वा तं सिद्धयति तदेव अधिकरणसिद्धान्तः कथ्यते।

यथा मुक्तपुरूषः कर्मानुबन्धात् मुक्तः भवति। मुक्तपुरूषः निष्कामः भवति। एतदर्थं सः कर्मानुबन्धात् अपि मुक्तःभवति।

**(४.) अभ्युपगमसिद्धान्तः**

इदानीं पर्यन्तम् असिद्धः तथा अपरिक्षितः (यस्य परीक्षणं न भवति सः) अनुपदिष्टः (यस्य वर्णनं वा संन्दर्भः नास्ति सः) यस्य उद्देश्यस्थापनं नास्ति सः एतादृशं विधानं वा संकल्पना अभ्युपगम सिद्धान्तः मन्यते।

सिद्धान्तस्य परिभाषानुसारम् एषः सिद्धान्तरुपेण स्वीकर्तव्यः। कारणम् इदानीं पर्यन्तं बहुविधहेतुना परीक्षया च ईदृशस्य प्रकारस्य स्थापना नैव जाता। अस्य स्थापनानन्तरम् एव सिद्धान्तस्वरूपं प्राप्यते।

## स्वाध्यायः

**१. बहुविकल्पाः प्रश्नाः समाधेयाः।**

१. आयुर्वेदः कस्य वेदस्य उपवेदः गण्यते ?

(क) अर्थवेदस्य (ख) सामवेदस्य (3) यर्जुवेदस्य (4) धनुर्वेदस्य

२. आयुर्वेदे रोगीनां रोगानां दूरीकरणोपायाः कस्मिन् स्कन्धे वर्तते ?

(क) त्रिस्कंन्धे (ख) चतुःस्कन्धे (ग) पञ्चकन्धे (घ) द्विस्कन्धे

३. चरकानुसारम् आयुषः कति प्रकाराः ?

(क) ४ (ख) ५ (ग) ६ (घ) २

४. आयुर्वेदसिद्धान्ताः कतिषु प्रकारेषु विभाजिताः ?

(क) ३ (ख) ५ (ग) ४ (घ) ७

५. केन दर्शनेन सिद्धान्तस्य गणना षोडशपदार्थेषु कृता ?

(क) वैशेषिकेण (ख) आयुर्वेदेन (ग) न्यायेन (घ) मीमांसया

६. आयुर्वेदे सिद्धान्तः कस्मिन् वादमार्गपदेषु उद्धृतः ?

(क) चरकः (ख) सुश्रुतः (ग) वाग्भटः (घ) कश्यपः

७. कः शब्दः आयुषः पर्यायवाची शब्दः नास्ति ?

(क) ध्यानम् (ख) धारि (ग) जीवितम् (घ) नित्यगः

**२. एकशब्देन उत्तरत।**

१. आयुर्वेदस्योद्देश्यं किम् ?

२. आयुर्वेदस्य लक्षणं वर्णयत ?

३. आयुष्यस्य पर्यायशब्दान् लिखत ?

४. सिद्धान्तस्य एकं लक्षणं लिखत ?

**३. संक्षेपोत्तरीयाः प्रश्नाः समाधेयाः।**

१. हितायुः अहितायुः इति विषये लिखत।

२. सुखायुः दुःखायुः इति विषये ज्ञापयत।

३. प्रतितन्त्रसिद्धान्तं वर्णयत।

४. सर्वतन्त्रसिद्धान्तं लिखत।

**४. विस्तृतोत्तरीयाः प्रश्नाः समाधेयाः।**

१. सिद्धान्तविषये टिप्पणी कार्या।

२. 'आयुष्यम्' इति विषये सविस्तारं वर्णयत।

●

# ७ आयुर्वेददर्शननिरुपणम्

दृश्यते अनेन इति दर्शनम्। यस्य दर्शनेन विषयवस्तुनः तात्त्विकं रूपं ज्ञायते तद् दर्शनम्। दर्शनेन सृष्टेः उत्पादक–धारक –रचनात्मकतथ्यानां यथावत् स्थितिः ज्ञायते। भारतीय चिकित्साविज्ञानेन सह आयुर्वेदस्य संलग्नतायाः कारणेन च तस्य सम्बन्धः निश्चयेन आयुर्वेदेन सह वर्तते।

उपनिषद्काले एव भारतीयदर्शनं प्रस्थापितम्। कालान्तरे जनकल्याणाय नैकैः ऋषिभिः स्वसाक्षीतकृतज्ञानस्य दर्शनशास्त्रम् इति नाम्ना समाजे प्रस्थापितम्। यद् अद्य पर्यन्तं ज्ञानपिपासायाः पूर्त्यर्थं शान्त्यर्थं च महत्त्वपूर्णं साधनं मन्यते। एतत् तात्त्विकदृष्ट्या मोक्षमार्गस्य निर्देशकरूपेण प्रचलितम्। अनेन प्रकारेण अत्र भारतीयदर्शनोपरि विस्तृतेन चर्चा क्रियते। भारतीयदर्शनस्य द्वौ विभागौ स्तः। १. आस्तिकदर्शनम्

२. नास्तिकदर्शनम्

आस्तिकदर्शनम् ईश्वरं–परलोकं चेति विषये विश्वासं करोति। तथा च इदं वादानुकूलविचार प्रणालीं धारयति।

नास्तिकदर्शनम् ईश्वरं–परलोकं चेति न विश्वसिति तथा वेदस्य प्रतिकुलं विचारं धारयति।

सम्प्रति प्रचलितानि भारतीयदर्शनानि षड् वर्तन्ते, अतः तं षड् आस्तिकदर्शनानि कथ्यन्ते। चार्वाकः जैनः– बौद्धः एभिः कृतानि नास्तिकदर्शनानि कथ्यन्ते।

**षड्दर्शनानि**

| **क्रमः** | **आस्तिकदर्शनानि** | **प्रवर्तकः** |
|---|---|---|
| १. | वैशेषिकम् | कणादः |
| २. | न्यायः | गौतमः |
| ३. | सांख्यम् | कपिलः |
| ४. | योगः | पतञ्जलिः |
| ५. | मीमांसा | जैमिनिः |
| ६. | वेदान्तः | व्यासः |

| **क्रमः** | **नास्तिकदर्शनानि** | **प्रवर्तकः** |
|---|---|---|
| १. | चार्वाकम् | चार्वाकः |
| २. | जैन | महावीरः / वर्धमानः |
| ३. | बौद्ध | गौतमबुद्धः |

आयुर्वेदशास्त्रम् आस्तिकं वर्तते, अतः आयुर्वेदे नास्तिकसिद्धान्ताः न गृहीताः। कुत्रचित् वादविवादे तस्योल्लेखः कृतः। केवलं चरकाचार्येणैव वैद्यम् उपदिश्योक्तं यत् तैः नास्तिकचिन्तनं त्यक्त्वा आस्तिकदृष्टया चिन्तनं करणीयम्।

आयुर्वेदः सर्वोपरिशास्त्रं अस्ति। सर्वदर्शनानां प्रभावः अस्मिन् ग्रन्थे दृश्यते। अस्य ग्रन्थस्य स्वस्य अपि मौलिकचिन्तनं विद्यते। कारणम् अस्य शास्त्रस्य तथा अन्यशास्त्रस्य दर्शनविषयकचिन्तने भिन्नता दृश्यते।

**''तस्यायुगः पुण्यतमो वेदो वेदविदां मतः।**
**कथ्यते यन्मनुष्याणां लोकयोरुभयो र्हितम् ॥''**

अयम् आयुषः पुण्यतमवेदः अस्ति। अतः आयुर्वेदः विद्वद्भिः पूजितः वर्तते। अयं ग्रन्थः मानवानां कृते इहलोके परलोके च उपकारकः वर्तते। आयुर्वेदे षड्दर्शनानां समन्वयः वर्तते। अन्यदर्शनानां लक्ष्यं केवलं मोक्षः वर्तते अपि तु आयुर्वेदस्य लक्ष्यं इहलोकस्य मानवस्य शारीरिक–मानसिकपिडायाः मुक्तिः एवं परलोके जीवन–मृत्युचक्रात् मुक्तिं प्रदाय मोक्षं प्रति गमनं वर्तते। आयुर्वेदशास्त्रे जीवनं भौतिकम् (शरीर+इन्द्रियाणि) आध्यात्मिकम् (मन+आत्मा) इति द्रव्याणां समन्वयरुपेण दृश्यते। अन्यदर्शनानाम् अपेक्षया आयुर्वेददर्शनस्य मौलिकत्वम् अधिकं सुदृढं वर्तते। अत्र वयं षड्दर्शनेषु न्यायवैशेषिकयोः परिचयं क्रमेण पश्यामः।

**१. न्यायदर्शनम्**

न्यायदर्शने तत्त्वपरीक्षणपद्धतिः एवं तस्य साधनानां वर्णनं वर्तते। आयुर्वेदशास्त्रे अपि सत्–असत् परीक्षणाय प्रमाणं साधनरुपेण प्रवर्तते। न्यायोक्तं चतुर्विध–प्रमाणानाम् उल्लेखः सुश्रुतसंहितायां तथैव प्राप्यते। न्यायः वादः जल्पवितर्कादि विवेच्यविषयरुपेण मन्यते। चरकसंहितायाम् अपि वादमार्गस्य तथैव वस्तुत्त्वेन वर्णनं विद्यते।

आयुर्वेदस्य प्रारम्भः एव दीर्घजीवनस्य अन्वेषणेन भवति। यः न्यायशास्त्रस्य आधारभूतः आन्वीक्षिकीविद्यायाः द्योतकः। न्यायोक्तषोडशपदार्थेषु कतिपयपदार्थाः चरकसंहिताया वादमार्गरूपेण स्वीक्रियन्ते। आयुर्वेदे वर्णितं प्रमाणं मूलं न्यायदर्शने वर्तते। एवं प्रकारेण न्यायदर्शनस्य प्रभावः आयुर्वेदे दृश्यते।

**२. वैशेषिकदर्शनम्**

वैशेषिकदर्शने द्रव्य–गुण–कर्म–सामान्य–विशेषसमवायाः इति षड्पदार्थानां वर्णनं क्रियते। आयुर्वेदस्य प्रारम्भे वैशेषिकोक्त षड्पदार्थानां वर्णनं विद्यते। एतद् विहाय विशिष्टरूपेण आयुर्वेदे वैशेषिकदर्शनस्य प्रभावः स्पष्टः भवति–

१. मनसः गुणस्य अगुणत्त्वस्य स्वीकृतिः।

२. रोगाणां कृतेऽपि प्रथमो हि अणुभूत्वा इति उल्लेखः।

३. वैशेषिकेन प्रतिपादितं परमाणुवादस्य शरीरस्य सूक्ष्मत्त्वम् अंशरुपेण चरकसंहितायां प्रदर्शितम्।

४. परमाणुभेदेन शारीरावयवानां संख्या असंख्या वर्तते। 'शरीर अवयवास्तु परमाणुभेदेनापरिसंख्येया भवन्ति।'

च. / शा. ७/७

५. षड्पदार्थानां कारणरूपेण उल्लेखः।

६. वैशेषिकोक्तपाकजसिद्धान्तस्य उपादेयता।

**३. योगदर्शनम्**

षड्दर्शनेषु आयुर्वेदः योगेन अपि प्रभावितः। आयुर्वेदे योगदर्शनं मोक्षप्रदायकं मोक्षप्रवर्तकरूपेण मन्यते।

**''योगे मोक्षे च सर्वेषां वेदानां विनिवर्तनम् ।**
**मोक्षे निवृत्तिनिःशेषः योगो मोक्षप्रवर्तकः॥''** च./ शा. १/३७

योगात् मोक्षात् च संपूर्णवेदनानां नाश भवति। आयुर्वेदे योगविषये नैकः उल्लेखः प्राप्यते।

१. आयुर्वेदशास्त्रे योगः परिभाषितः वर्तते।

२. चरकसंहितायां योगस्य सिद्धिः वर्ण्यते।

३. मोक्षस्य साधनेषु ध्यानस्य वर्णनम् अस्ति।

४. कायनिबन्धनम् नाम्ना आसनादीनां संङ्केतस्य उल्लेखः आचार्यचरकेण कृतः।

५. सद्वृत्यां यम–नियमोल्लेखः।

६. योगः चित्तवृत्तिनिरोधः एषा व्याख्या सत्वावजयचिकित्सारूपेण प्रस्तूयते।

७. प्रत्याहारस्य प्रयोगेण इन्द्रियाणां विषयात् दूरीकरणाय एकाग्रतावर्धनाय च स्पष्टः निर्देशः प्राप्यते ।

**पदार्थ–लक्षण–वर्गीकरणम्।**

**लक्षणम्**

पदम् अर्थश्चेति द्वाभ्यां शब्दाभ्यां पदार्थशब्दः निर्मितः। अनयोः द्वयोः सम्बन्धेन पदार्थस्य लक्षणानि प्रोक्तानि सन्ति। तद्यथा–

१. सुश्रुतसंहितायां पदार्थस्य लक्षणम् इत्थं लिखितं वर्तते–योऽर्थोऽभिहितः सूत्रे पदे वा स पदार्थः। सू. / उ. /६२

२. व्याकरणानुसारं पदार्थस्यार्थः–
पदस्य पदयोः पदानां वा योऽर्थः सः पदार्थः। च. / स. १२/१४

३. चरकसंहितानुसारम् अर्थः पदस्य अर्थात् पदस्य विषयः पदार्थः उच्यते।

४. वैशेषिकव्याख्याकारप्रशस्तपादानुसारम्
'षण्णामपि पदार्थानामस्तित्त्वाभिधेयत्वज्ञेयत्वानि।'

५. 'प्रमिति–विषयाः पदार्थाः।'
प्रमिति अर्थात् ज्ञानस्य विषयः ज्ञानस्य विषयत्त्वं पदार्थः उच्यते। अर्थात् यस्मिन् ज्ञेयत्त्वम् अस्तित्वम् अभिध्येयत्वञ्च ज्ञेयं विद्यमानं भवति सः पदार्थः। एतेन प्रकारेण पदैः यस्य विषयस्य बोधः भवति सः पदार्थः।

६. पाणिनेः अनुसारम् सुबन्तं–तिङन्तं च पदसञ्ज्ञं स्यात्।

उदाहरणं यथा मोहनः रमेशः इति सुबन्तपदानि तथा गच्छति, पठति, भवति इति तिङन्तपदानि।

**अर्थ :**

अर्था: शब्दादयो: ज्ञेया गोचरा: विषया : गुणा:।

च. / शा. १/३१

अर्थशब्दस्योत्पत्ति: ऋगतौ अर्थयुक्तात्: धातो: भवति। ऋगच्छन्ति इन्द्रियाणि इत्यर्थ:। अर्थात् इन्द्रियाणि यं प्राप्नुवन्ति स: अर्थ:।

भारतीयवाङ्मये अर्थशब्देन शब्दादि: गृह्यते। पदार्थस्य परिप्रेक्ष्ये चरकोक्तं लक्षणं ज्ञेया गोचरा: बोधगम्या: इति स्पष्टं वर्तते। ज्ञेया: गोचरा: यस्यार्थ: प्रकाशितो भवति स: अर्थ: कथ्यते।

**वर्गीकरणम्**

पदार्थस्य वर्गीकरणं तथा तस्य संख्यानिर्धारणं कष्टप्रदं वर्तते। कारणं प्रत्येकस्य दर्शनस्य प्रतिपाद्यविषय: भिन्न: वर्तते। तथा च तस्य संख्यासंबंधिविषयेऽपि मतमतान्तराणि विद्यन्ते। यत् दर्शनम् स्वस्य सिद्धान्तानुसारं सृष्टिम् अवलोकयति तदनुरुपं स्वीयं प्रतिपाद्यं विषयं प्रस्थापयति। आयुर्वेदस्य सम्बन्ध: आस्तिकदर्शनेन भवति अत: तस्य वर्गीकरणं संख्याधारितं भवति।

सुश्रुतसंहितायाम् उत्तरतन्त्रे पदार्थस्य परिभाषा प्रदत्ता। अत्र आचार्येण पदार्थसंख्योपरि स्वीय: विचार: प्रकटित: यत् 'अपरिसंख्येया: पदार्था:' आचार्यचरकेण समस्तानां पदार्थानां विभाजनं द्वयो: भागयो: कृतम्। द्वौ अपि ज्ञेयपदार्थौ स्त:। अत: आचार्यचरकानुसारं समस्तसृष्टे: पदार्थानां सत् असत् इति द्वौ विभागौ कृतौ।

**विभिन्नदर्शनानुसारं पदार्थानां संख्यातालिका-**

| **आयुर्वेद:** | **वैशेषिक:** | **न्याय:** | **सांख्य:** | **मीमांसा** | **वेदान्त:** |
|---|---|---|---|---|---|
| **०६ तथा** | **०६** | **१६** | **२५** | **५/१६** | **१/२/३** |
| अपरिमित: | | | | | |
| सामान्यम् | द्रव्यम् | प्रमाणम् | प्रकृति: | ब्रह्म | अविद्या |
| विशेष: | गुण: | प्रमेयम् | पुरूष: | धर्म: | माया |
| गुण: | कर्म | संशय: | महत् | धर्मी | ब्रह्म |
| द्रव्यम् | सामान्यम् | प्रयोजनम् | अहंकार: | आधार: | |
| कर्म | विशेष: | दृष्टान्त: | ५ तन्ममान्त्रा: | प्रदेश: | २ |
| समवाय: | समवाय: | सिद्धान्त: | ५ ज्ञानेन्द्रियाणि | द्रव्यम् | आत्मतत्त्वम् |
| | | अवयव: | ५ कर्मेन्द्रियाणि | गुण: | अनात्मतत्त्वम् |
| | | तर्क: | १ मन: | कर्म | |
| | | निर्णय: | ५ महाभूतानि | सामान्यम् | ३ |
| | | वाद: | | पारतन्त्रम् | चित् |
| | | जल्प: | | शक्ति: | अचित् |
| | | वितण्डा | | सादृश्यम् | क्रम: |
| | | हेत्वाभास: | | संख्या | |
| | | जाति: | | | |
| | | निग्रहस्थानम् | | | |

**भाव-अभावपदार्थौ**

आचार्यचरकानुसारं-

'द्विविधमेव खलु सर्वं सत् असच्च।'

च. / सू. ११/१७

अर्थात् सृष्टे: विभाजनं सत् असत् द्वयो: ज्ञेयपदार्थयो: क्रियते। सत्पदार्थात् भावस्य असत्पदार्थात् अभावस्य ग्रहणं भवति।

भावपदार्था:द्रव्यम्-गुण:-कर्म- सामान्य: विशेष:- समवाय:- भावपदार्था: सन्ति।

अभावपदार्था-		प्राग्भाव: प्रध्वंसाभाव: अन्योन्याभाव: अत्यन्ताभाव: अभावपदार्था: सन्ति।

**स्वाध्याय:**

**१. अधोलिखितेभ्य: विकल्पेभ्य: समुचितम् उत्तरं चिनुत।**

1. आयुर्वेदस्य सम्बन्ध: केन दर्शनेन सह वर्तते?
   (क) पाश्चात्येन		(ख) पौर्वात्येन		(ग) भारतीयेन		(घ--) अन्येन
2. योगदर्शनस्य प्रवर्तक: क: ?
   (क) कणाद:		(ख) गौतम:		(ग) पतञ्जलि:		(घ) व्यास:

३. जैनदर्शनस्य प्रवर्तक: क: ?
   (क) चार्वाक:		(ख) जैन:		(ग) बौद्ध:		(घ) कणाद:

४. षोडशपदार्थानां वर्णनं कस्मिन् दर्शनग्रन्थे अस्ति?
   (क) वैशेषिके		(ख) जैने		(ग) योगे		(घ) न्याये

५. मोक्षस्य साधनेषु ध्यानस्य विवरणं कस्मिन् दर्शने वर्तते?
   (क) योगे		(ख) न्याये		(ग) वैशेषिके		(घ) सांख्ये

६. सुश्रुतसंहितानुसारं पदार्थानां संख्या का?
   (क)अपरिमितसांख्येय:		(ख) सांख्येय:		(ग) 25		(घ) 24

**२. एकेन वाक्येन उत्तरत।**

१. चरकानुसारं समस्तसृष्टे: पदार्थानां वर्णनं कुरुत ।
२. सुश्रुतसंहितानुसारं पदार्थानां लक्षणं किम्?
३. वैशेषिकदर्शनानुसारं पदार्थानां लक्षणानि लिखत।
४. नास्तिकदर्शनम् एवं तस्य प्रवर्तकानां नामानि प्रयच्छत।
५. आयुर्वेदस्य प्रारम्भ: केन भवति?

**३. संक्षेपेण उत्तराणि प्रयच्छत।**

१. वैशेषिकदर्शनविषये ज्ञापयत।
२. योगदर्शन-विषये लिखत।
३. पदार्थलक्षणविषये लिखत।

**४. सविस्तरम् उत्तरं प्रयच्छत ।**

१. विभिन्नदर्शनानुसारं पदार्थसंख्यां तस्य वर्गीकरणं च ज्ञापयत।
२. आयुर्वेद दर्शनोपरि टिप्पणी लेख्या।

**५. संयोजनं कुरुत।**

| | **अ** | **ब** |
|---|---|---|
| १. | वैशेषिक: | व्यास: |
| २. | न्याय: | जैमिनि: |
| ३. | सांख्यम् | पतञ्जलि: |
| ४. | योग: | कपिल: |
| ५. | मीमांसा | गौतम |
| ६. | वेदान्त: | कणाद: |

●

| ८ | # द्रव्यविज्ञानम् |
|---|---|

– द्रव्यम् – पञ्चमहाभूतानि – कालः दिक् – आत्मा–मनः पुरूषश्च ।

**१. द्रव्यम्**

आयुर्वेदे षडपदार्थेषु द्रव्यस्योल्लेखः वर्तते । आयुर्वेदे अनेकस्थानकेषु आयुषः अर्थः हितकारकः – अहितकारकः द्रव्यगुणकर्मस्योपदेशः क्रियते । आयुर्वेदस्य मुख्यः प्रतिपाद्यविषयः द्रव्यम् – गुणः कर्मादिः वर्तते । कर्मगुणौ द्रव्याश्रितौ स्तः । अतः आयुर्वेदस्य प्रमुखः विवेच्यविषयः द्रव्यः वर्तते । वैशेषिकदर्शनेषु सर्वप्रथमं द्रव्यस्योल्लेखः वर्तते ।

**आयुर्वेदानुसारं द्रव्यस्य लक्षणम्**

१. चरकानुसारं – यत्राश्रिताः कर्मगुणाः कारणं समवायि यत् तद् द्रव्यम् । च. सू. १/१२३

२. सुश्रुतानुसारं – द्रव्यलक्षणं तु क्रियागुणवत् समवायि कारणम् इति । सू. सू. ४०/२

३. तर्क संग्रहानुसारं – द्रव्यत्वजातित्वं गुणत्वं समावायिकारणत्वं वा द्रव्य सामान्यलक्षणम् ।

द्रव्यत्व अर्थात् द्रव्यजातियुक्तं – गुणत्त्वयुक्तं तथा च समवायिकारकं द्रव्यं कथ्यते । अतः यस्मिन् –

१. गुणः समवायरुपेण स्यात् ।

२. कर्मः समवायरुपेण स्यात् ।

३. स्वयं समवायकारणरुपेण स्यात् ।

एतानि त्रीणि लक्षणानि यदा मिलित्वा भवन्ति तदा तत् द्रव्य कथ्यते ।

**द्रव्यसंख्याः**

आचार्यचरकानुसारम् –आकाश:वायुः अग्निः–जलं पृथ्वी आत्मा मनः कालः दिशश्च नवद्रव्याणि सन्ति।

वैशेषिकदर्शनानुसार पृथिवी जलम् अग्निः वायुः आकाशः कालः दिक् आत्मा– एवं मनः नवद्रव्याणि सन्ति।

अत्र आयुर्वेदस्य एवं वैशेषिकस्य च क्रमे किञ्चित् दृश्यते। अत्र येषां द्रव्याणाम् उल्लेखः कृतः तानि कारणद्रव्याणि कथ्यन्ते। तेन कार्यद्रव्याणि उत्पन्नानि भवन्ति। चरकसंहितायां कारणद्रव्याणां निरुपणानन्तरं कार्यद्रव्याणां भेदः वर्ण्यते। अत्र कार्यद्रव्याणि चेतन–अचेतनरुपेण विभक्तानि भवन्ति।

**द्रव्यभेदः**



**पञ्चमहाभूतम्**

**- पञ्चमहाभूतसिद्धान्तः**

पुराकालीनमनीषिणा प्रतिपादितः सर्वदर्शनसम्मतः अयं सिद्धान्तः। अस्य सिद्धान्तस्य अनुसारं पृथिवी आपः तेजः वायुः एवम् आकाशः पञ्चभूतानि कथ्यन्ते। आयुर्वेदस्य समस्तविषयाणाम् आधारभूतः अयं सिद्धान्तः। चेतनः अचेतनः वा समस्तपदार्थाः पञ्चमहाभूतेभ्यः निर्मिताः भवन्ति। अस्य पदार्थस्य स्थूल-सूक्ष्मतमरुपं पञ्चमहाभूतानां समष्टेः निर्मितः। आत्मसम्बन्धः इन्द्रियव्यापारः दृश्यते ते चेतनपदार्थाः एवं च इन्द्रियव्यापारः न सम्भवति सः अचेतनपदार्थः कथ्यते।

चरकाचार्येण समस्तानां कार्यद्रव्याणां पाञ्चभौतिकत्वम् इत्थं वर्णितम्-

''सर्व द्रव्यं पाञ्चभौतिकमस्मिन्नर्थे तच्चेतनावदचेतनं च। '' च. / सू. २७/१०

पञ्चभूतानां द्वे अवस्थे स्तः। प्रथमा परमाणुः कारणरुपा च द्वितीया कार्यरुपा स्थूलावस्था वा। परमाणुरुपा अवस्था नित्या एवं च स्थूलरुपा अवस्था अनित्या वर्तते।

**भूतस्य लक्षणम् :-**

'भू' सत्तायां धातोः 'क्त' प्रत्ययं संयोज्य 'भूत' इति शब्दः निष्पद्यते। यस्यार्थः 'सत्तायां' वा विद्यमानः भवति। पञ्चज्ञानेन्द्रियैः मनुष्यः समस्तपदार्थान् ग्रहणं करोति। पञ्चेन्द्रियाणि एकैकं नियतं विषयं स्वीकुर्वन्ति।

**''महाभूतानि खं वायुरग्निरापः क्षितिस्तथा**
**शब्दः स्पर्शश्च रूपं च रसो गन्धश्च तद्‌गुणाः।''**

स्पष्टं भवति तद्यथा-

- शब्दगुणम् आकाशम्।
- स्पर्शवान् वायुः
- रूप तेजः
- रसवत्य आपः
- गन्धवती पृथिवी

**आयुर्वेदे पञ्चमहाभूतानामुपयोगिता**

इमे घटकाः पाञ्चभौतिकं मन्यन्ते -

१. प्रत्येकं कार्यं द्रव्यम्-औषधद्रव्यम् ।
२. शरीरस्य विभिन्नधातवः अवयवानां संघटनम्।
३. ज्ञानेन्द्रियम्
४. त्रिदोषः
५. गूढतत्त्वानां विकल्पः
६. षड्‌रसाभिव्यक्तिः
७. भूताग्निविचारः
८. गर्भनिर्माणम् एवं प्रकृतिनिर्माणम् ।
९. चिकित्सा
१०. त्रिगुणः

**कालः**

आयुर्वेदे कालस्योल्लेखः कारणद्रव्यरूपेण विद्यते।

**कालस्य लक्षणम्**

सुश्रुताचार्यः कालस्य प्रकारान् अनेन प्रकारेण वर्णयति।

१. सङ्कलयति कालयति वा भूतानीतिकालः।
२. सः सूक्ष्मामपि कलां न लीयति इति कालः।

सू. सू. ६/८

अर्थात् सृष्टेः समस्तप्राणीनां संकलनं करोति कालयति संक्षिप्तं करोति वा सः कालः। यः सूक्ष्मातिसूक्ष्मकलाम् अपि न लीयत सः कालः। अत्र कालस्यार्थः संक्षेपेण निरुपितः। अयम् आयुरादेः संक्षिप्तीकरणस्य कारणभूतः वर्तते। अतः कालः इति कथ्यते। एक एव कालः उपाधिभेदेन अनेकः दृश्यते। सर्वासाम् स्थितीनां जनकः कालः सर्वस्योपस्थितेः कारणभूतः वर्तते।

**चरकाचार्यानुसारं - कालः परिमाणः उच्यते।**

च. सू. ११/४२

**''कालस्य परिमाणेन जरामृत्युनिमित्तजाः।**
**रोगाः स्वाभाविका दृष्टाः स्वभावो निष्प्रतिक्रियः॥''**

च. शा. १/११५

कालः परिमाणस्य कारणभूतः कथ्यते। मानवानां परिवर्तनम् आनयति सः कालः। सुश्रुतः कालं भगवन्तं कथयति।

कालो हि नाम भगवान् स्वयम्भूरनादि मध्यनिधनोऽत्र रसव्यापत्सम्पत्तिजीवतमरणं च मनुष्याणामायते॥

काल एव ऐश्वर्ययुक्तः ईश्वरः। सः एव आदिमध्यान्तस्य ज्ञाता तथा स्वयम्भूः कथ्यते। द्रव्येषु रसोत्पत्तिः कालादीनाम् भवति। प्राणीनां जीवनं मृत्युश्च सर्वं कालाधीनं वर्तते।

**कालस्य भेदः**

कालस्य नैके भेदाः। सुश्रुतानुसारम् तस्य संवत्सरात्मनो भगवानादित्यो गतिविशेषेण काष्ठाकलामूहूर्ताहोरात्रपक्ष मासात्सायन संवत्सरयुगादिप्रविभागं करोति। सू. सू. ६/३

भगवान् सूर्यः स्वकीयगतिवशेषद्वारा कालस्य विभाजनम् इत्थं करोति।

| | | |
|---|---|---|
| १. काष्ठः | २. कलाः | ३. मुहूर्तम् |
| ४. अहोरात्रम् | ५. पक्षः | ६. मासः |
| ७. ऋतुः | ८. अयनम् | ९. वर्षम् |
| १०. युगः | | |

आचार्यचरकानुसारं - कालः पुनः संवत्सरश्चातुरावस्था च। च. वि. ८/१२५ रसभेदेन कालस्य द्वौ प्रकारौ स्तः। संवत्सारादि आतुरावस्थे श्च। संवत्सरस्यापिप्रहारादिभेदेन अनेकप्रकारकाः भवन्ति। आतुरावस्थायां पुनः काल अकालश्च इति द्वौ विभागौ स्तः।

**सुश्रुतानुसारं कालस्य प्रविभागः**

| | | | |
|---|---|---|---|
| लध्वक्षरकालः | | १ | इक्षिनिमेषः |
| १५ | अक्षिनिमेषः | १ | काष्ठाः |
| ३० | काष्ठाः | १ | कला |
| २० १/१० | कलाः | १ | मुहूर्तम् |
| ३० | मुहूर्तम् | १ | अहोरात्रम् |
| १५ | अहोरात्रम् | १ | पक्षः |
| ०२ | पक्षः | १ | मासः |
| ०२ | मासः | १ | ऋतुः |
| ०३ | ऋतुः | १ | अयनम् |
| ०२ | अयनम् | १ | संवत्सरः |
| ०५ | संवत्सरः | १ | युगः |

आयुर्वेदे इतोऽपि कालस्य सूक्ष्मरुपेण महत्त्वं प्रतिपाद्यते । तद्यथा-

मनुष्याणाम् उत्पपत्तिस्थिति-विनाशः

→ दिनचर्या

→ ऋतुचर्या

→ औषधसेवनकालः

→ चिकित्साकालः

→ धात्वोत्पत्तिः

→ निदानकालः

→ रोगस्य साध्यसाध्यत्वे

**दिक्**

आयुर्वेदे दिशः उल्लेखः नवकरणद्रव्येषु द्रव्यरुपेण क्रियते। दिक् एकम् अमूर्तं द्रव्यं वर्तते।

**लक्षणम्**

चरकसंहितायाः टीकाकारः गंङ्गाधरानुसारं-

''दिशत्युपदिशति लोकाजयमस्तात् पूर्वः पश्चाद् यस्मादित्यादिरुपेण याभिस्तदा दिश इति।''

अयं दूरसमीपस्थात् वा परापरत्वात् ज्ञानात् दिशा इति कथ्यते। एषा नित्या एव अपि तु उपाधिभेदन अस्याः दशप्रतिभागाः क्रियन्ते। यथा तस्याः प्रचलितनामानि प्राची अर्वाची प्रतिची उदीची ईशानः- वायव्यः नैऋत्यः आग्नेयः उर्ध्वदेशःअधोदेशः। दिग्निर्धारणे मानाङ्करुपे सूर्यः प्रामुख्यरुपेण मन्यते। आयुर्वेदे दिग्वर्णनं द्वि रुपेण प्राप्यते। (१) दिग् रुपम्

(२) देशरुपम्

आयुर्वेदस्य व्यवहारसूत्ररूपम् अनेन प्रकारेण वर्तते।

१. रसशालानिर्माणम्

२. चिकित्सालयनिर्माणम्

३. सुतिकागारनिर्माणम्

४. कुमारागार निर्माणम्

५. औषधीसंग्रहस्य नियमाः

६. संवत्सरविभागः

७. औषधीगुणः

८. जलगुणः

९. वायुगुणः

**आत्मा**

आयुर्वेदे कारणस्वरुपद्रव्येषु आत्मतत्त्वस्य उल्लेखः विद्यते। आयुषः संकल्पनायाम् आत्मतत्त्वस्य समावेशो भवति। आयुर्वेदः एकम् आस्तिकविज्ञानं वर्तते अतः अत्र आत्मतत्त्वस्य सविस्तरं वर्णनं विद्यते। अस्मिन् आत्मतत्त्वं नित्य-जरा-मृत्यु रहितः निर्विकारः कथ्यते।

**आत्मतत्त्वस्य लक्षणं-गुणं च।**

''तस्य सुखदुःखे इच्छाद्वेषौ प्रयत्नः प्राणापानावुन्मषनिमेषौ बुद्धिमनः संकल्पो

विचारणास्मृतिविज्ञानमध्यवसायो विषयोपलब्धिश्च गुणाः।'' सु. शा. १/१०

आचार्यचरकः एवं सुश्रुतानुसारम् आत्मतत्त्वस्य लक्षणानि अत्र प्रतिपाद्यन्ते। प्राण-अपान-निमेष-उन्मेष-जीवन-मनोगति-इन्द्रियान्तरसञ्चार-प्रेरणा-धारण-स्वप्नेदेशान्तरगमन-मृत्यु-दक्षिणनेत्रात् दृश्यविषयस्य ज्ञानं वामनेत्रात् ग्रहणम्-इच्छा-द्वेष-सुख-दुःख-प्रयत्न-चेतना-धैर्य-बुद्धि-स्मृति-अहंकारः-मन-संकल्प-विचारणा-विज्ञान-अध्यावसाय विषयोपलब्धिः।

एतानि समस्तानि लक्षणानि जीवितप्राणिषु दृश्यन्ते। अत एव आत्मतत्त्वस्य लक्षणम् आयुर्वेदाभिमतजीवनस्य लक्षणं वर्तते।

**आयुर्वेदानुसारम् आत्मतत्त्वस्य भेदः**

आयुर्वेदानुसारम् आत्मतत्त्वस्य भेदम् इत्थं वर्ण्यते।

१. परमात्मा -परमपुरूषः।

२. अतिवाहिकपुरूषः- सूक्ष्मशरीरम्

३. स्थूलचेतनपुरूषः- कर्मपुरूषः।

**आत्मतत्त्वस्योत्पत्तिः**

परमात्मा अनादिः कथ्यते। अतः तस्य उत्पत्तिः वा प्रारम्भः नास्ति। तेन अत्र परमात्मा वा परमतत्त्वस्य उत्पत्तेः अर्थग्रहणं नास्ति। आत्मतत्त्वस्य उत्पत्तेः जीवात्मा भूतात्मनः वा अर्थः स्वीकर्तव्यः। जीवात्मनः उत्पत्तेः कारणं मोह–इच्छा–द्वेष मन्यन्ते। आत्मतत्त्वेन परमतत्त्वस्य अर्थग्रहणं न सम्भवति।

**''प्रभवो न अनादित्वाविद्यते परमात्मनः।**
**पुरुषो राशिसंज्ञस्तु मोहेच्छाद्वेषकर्मजः॥''**

**आत्मतत्त्वज्ञानाय प्रवृत्तिः**

**आत्मा सः करणैयोगाज्ज्ञानं त्वस्य प्रवर्तते।**
**करणानामवैमल्याद् योगाभ्यां न वर्तते ॥**

च. शा.१/५४

**कारणानां तु वैकल्पे तमसाऽभि प्रवर्तते।**
**अस्वपन्नपि भूतात्मा प्रसुप्त इव उच्यते ॥ सुश्रुतः।**

आत्मतत्त्वस्य ज्ञानकरणेन संयोगेन तथा च करणानां निर्मलतायाः आधारेण ज्ञानप्राप्तिः भवति। ज्ञानाभावेन आत्मतत्त्वं सुषुप्तावस्थायां मन्यते अपि तु वस्तुतः आत्मा जागृतावस्थायाम् एव भवति। तमोगुणकारणात् ज्ञानप्राप्त्यर्थं बाधा उत्पन्ना भवति।

**मनः**

आयुर्वेदे वर्णितेषु नवद्रव्येषु मन एकं द्रव्यं वर्तते। आयुः संकल्पनायां 'मनः' महत्त्वपूर्णम् अङ्गं वर्तते। तं विहाय आयुः संकल्पना पूर्णा न भवति।

**लक्षणम् :**

'लक्षणं मनसो ज्ञानस्याभावोभाव एव च ।
सति ह्यात्मेन्द्रियार्थानां सन्निकर्षे न वर्तते॥' च. शा. १

अर्थात् ज्ञानस्य भाव:अभावः मनसः अस्तित्वस्य लक्षणं वर्तते। आत्मतत्त्वस्य श्रोत्रादिइन्द्रियाणां ज्ञानेन्द्रियाणां सह च सम्बन्धे सति विषयस्य ज्ञानं भवति वा न अपि भवति। अनेन ज्ञायते यत् आत्मा इन्द्रियस्य तथा ज्ञानस्य विषयातिरिच्य तादृशम् अपि द्रव्यं वर्तते यत् ज्ञानस्य कारणभूतं तत्त्वं मन्यते। यस्य उपस्थितौ ज्ञानं सम्भवति। अतः ज्ञानस्य साधनरुपं द्रव्यम् एव मनः कथ्यते। अनेन प्रकारेण आत्मा इन्द्रियादिभिः सह मनसः संयोगेन ज्ञानं भवति तथा तस्य असंयोगेन ज्ञानं न भवति।

**स्थानम् :**

आयुर्वेदानुसारं मनसः स्थानं हृदयं मन्यते। भेलानुसारं मनसः मस्तिष्के वा तालोः मध्यभागे मन्यते।

'शिरस्ताल्वन्तरं सर्वेन्द्रियपरं मनः'। भे. सं. चि. ८

आयुर्वेदे मन इन्द्रियरुपेण स्वीक्रियते। सुश्रुतस्य मतानुसारम् उभयात्मकं मनः।

अर्थात् सुश्रुतः मनः ज्ञानेन्द्रिय–कर्मेन्द्रिय इति उभयरूपेण स्वीकरोति। मनः ज्ञानप्राप्तेः साधनं वर्तते। आयुर्वेदे मनसः द्वौ गुणौ स्तः। १ अगुणत्त्वम् २ एकत्त्वम् च इति।

**'अगुणत्त्वं च एकत्त्वं द्वौ गुणौ मनसः स्मृतौ।'**

च. शा. १/१९

**मनसः विषय :**

**''चिन्त्यं विचार्यमुह्यं च ध्येयं संकल्पमेव च ।**
**यत्किञ्चिन्मनसो ज्ञेयं तत्सर्वं ह्यर्थसंज्ञकम् ॥''**

च. शा. १/२१

चिन्तनम्– विचार –उहापोह –तर्क –ध्यान –संकल्पादयः मनसः विषयाः सन्ति। अन्येऽपि ये मनसः ज्ञायन्ते ते सर्वेऽपि विषया प्रोक्ताः।

**मनसः कर्म–**

**''इन्द्रियाभिग्रहः कर्म मनसः स्वस्य निग्रहः।''**

च. शा. १/२१

मनसः द्वे कर्मे स्तः।

१. इन्द्रियाभिग्रहः अर्थात् इन्द्रियोपरि नियन्त्रणम् ।

२. स्वस्यनिग्रह: अर्थात् स्वस्य निग्रह: स्वयमेव कर्तव्य: ।

आयुर्वेदे अहितकारकविषयेषु इन्द्रियाणां तथा च स्वस्य निग्रहणं मनस: कार्यं प्रोक्तम् । सत्वं मनस: गुण: वर्तते रजस तमसौ च मनस: दोषौ स्त:। एतेन सह आत्मा बन्धनयुक्त: भवति। मनुष्य: रजस्तमस्गुणाभ्यां स्वं मुक्तं कृत्वा आत्मतत्वं स्थिरं करोति तदानीं स: मोक्षं प्राप्नोति।

**पुरूष:**

आयुर्वेदशास्त्रे पुरूषस्य अवधारणा इत्थं प्रोक्ता वर्तते ।

१. चिकित्स्यपुरूष:। कर्मपुरूष:। षड्धातुजपुरूष:

२. राशिपुरूष: चर्तुविंशतिक: पुरूष:।

''अस्मिन् शास्त्रे पञ्चमहाभूतशरीरसमवाय: पुरूष इत्ययुच्यते तस्मिन् क्रिया सोऽधिष्ठानम्।''

सु. सू. १/१८

**सत्व - आत्मा - शरीरं च त्रयमेतत् त्रिदण्डवत्।**
**लोकस्तिष्ठति संयोगात्तत्र सर्वं प्रतिष्ठितम् ॥**
**स पुमाश्चेतनं तच्च तच्चाधिकरणं स्मृतम्।**
**वेदस्यास्य तदर्थं हि वेदोऽयं संप्रकाशित: ॥**

च. सू. ४५/४६

**खादयश्चेतना षष्ठा धातव: पुरूषस्मृत:।**
**पुनश्च धातुभेदेन चतुर्विंशतिक: स्मृत:॥**

च. शा. १/१५

आयुर्वेदशास्त्रे पञ्चमहाभूत: तथा शरीरम् आत्मा च एते षड्तत्त्वानां समुदाय: पुरूष: कथ्यते। अनेन षड्तत्त्वेन समुदायात्मकस्य पुरूषस्य चिकित्सा सम्भवति। अयं पुरूष: चिकित्साकर्मफलाश्रय: वर्तते। आचार्यचरेकेणाऽपि षड्धात्मकपुरूष: विषये स्पष्टं कृतम्।

**'यतोऽभिहितं पञ्चभूतशरीरि समवाय: पुरूष इति**
**स एष: कर्मपुरुष चिकित्साधिकृत:' । सु. शा.** १६/१७

सुश्रुताचार्येण अत्र स्पष्टं प्रोक्तं यत्-क्रियाधिष्ठान: पुरूष इति। आयुर्वेदेन: अयं कर्मपुरूष: कथ्यते। अत्र कर्मण: क्रियाया: अभिप्राय: चिकित्साकर्म वा क्रिया अस्ति। अत: अत्र कर्मपुरूष एव चिकित्सापुरूष: कथ्यते।

*** राशिपुरूष: चतुर्विंशति: पुरूष: वा**

**''बुद्धीन्द्रिय मनोऽर्थानां विद्यात् योगधरं परम्।**
**चतुर्विंशतिक इत्येष: राशि: पुरूषसंज्ञक :। '' च. शा.** १/१६
**''पुनश्च धातुभेदेन चतुर्विंशतिक: स्मृत:।**
**मनो दशेन्द्रियाण्यर्थ: प्रकृतिश्चाष्टधातुकी ॥ '' च. शा.** १/१६

अर्थात् बुद्धेइन्द्रियमनार्थानां संयोगयुक्त: (पुरूष) परपुरूष: ज्ञातव्य:। इयं चर्तविंशतितत्त्वयुक्ता राशि एव राशिपुरूष: कथ्यते। एतानि चर्तविंशतितत्त्वानि अत्र प्रोक्तानि। अव्यक्त: महान् अहंकार: पञ्चसूक्ष्मभूतानि एतानि अष्टप्रकृतय: कथ्यन्ते। पञ्चकर्मेन्द्रियाणि पञ्चज्ञानेन्द्रियाणि मन: पञ्चन्द्रियाणां शब्दादीविषया: एते षोडशविकारा: कथ्यन्ते। अनेन प्रकारेण अष्टप्रकृतय: षोडशविकार: संमिल्य चतुर्विंशति: तत्त्वानि समुद्भवन्ति। इमा: राशय: एव 'राशिपुरूष:' कथ्यन्ते।

## स्वाध्याय:

**१. अधोलिखितेभ्य: विकल्पेभ्य: समुचितम् उत्तरं चिनुत।**

१. आयुर्वेदे द्रव्यस्योल्लेख: कुत्र वर्तते ?
(क) अष्टप्रवृत्तौ: (ख) षोडशविकारे (ग) षडपदार्थे (घ) षोडशपदार्थे

२. आयुर्वेदे कारणद्रव्याणां संख्या का ?
(क) षट् (ख) पञ्च (ग) नव (घ) अष्टौ

३. जरायुज–अण्डज – स्वेदज – उद्भिज इत्येते कस्य प्रकारा : ?
(क) अचेतनस्य (ख) बहिरत्लश्चेतनस्य (ग) बहिचेतनस्य (घ) चेतनस्य
४. वनस्पति – वानस्पत्य – वीरुधं – ओषधि आदयः कस्य प्रकाराः ?
(क) बहिश्चेतनस्य (ख) बहिरत्लश्चेतनस्य (ग) अन्तचेतनस्य (घघ) अचेतनस्य
५. कस्मिन् काष्ठे कति अक्षिनिमेषः ?
(क) १५ (ख) १० (ग) २० (घ) ०५
६. आयुर्वेदानुसारम् आत्मतत्त्वस्य कति भेदाः ?
(क) ०३ (ख) ०४ (ग) ०५ (घ) ०२
७. मोह – इच्छाः दोषादि कारणेन कस्योत्पत्तिः भवति ?
(क) जीवात्मनः (ख) परमात्मनः (ग) भूतात्मनः (घ) मुक्तात्मनः
८. इन्द्रियाभिग्रहः कस्य कर्म वर्तते ?
(क) आत्मनः (ख) मनसः (ग) पुरुषस्य (घ) आत्मानः
९. ज्ञानस्य भावः अभावः कस्य लक्षणम् ?
(क) पृथिव्याः (ख) आकाशस्य (ग) आत्मनः (घ) मनसः
१०. षड्धात्मकपुरुषस्य घटकौ कौ ?
(क) पञ्चमहाभूतः मनः (ख) पञ्चमहाभूतः आत्मा (ग) पञ्चमहाभूतः द्रव्यः (घ) पञ्चमहाभूतः दिशा

**२. एकेन वाक्येन उत्तरत।**

१. षड्धातुजस्य पुरूषस्य व्याख्यां लिखत ।
२. मनसः विषये ज्ञापयत।
३. मनसः कर्म विषये वेदयत।
४. आत्मतत्त्वस्योत्पत्तेः विषये ज्ञापयत ।
५. दिशायाः लक्षणं प्रयच्छत ।
६. कालस्य लक्षणं प्रयच्छत।
७. द्रव्यस्य लक्षणं ज्ञापयत।

**३. संक्षेपेण उत्तराणि प्रयच्छत।**

१. द्रव्यस्य वर्गीकरणं कुरुत ।
२. कालस्य महत्त्वं सूत्ररुपेण लिखत ।
३. पञ्चमहाभूतस्य वर्णनं सूत्ररुपेण ज्ञापयत।
४. कालस्य भेदं वर्णयत ।
५. आयुर्वेदानुसारम् आत्मतत्त्वस्य भेदं वर्णयत ।

**४. टिप्पणी लेख्या ।**

१. द्रव्यम् २. आत्मतत्त्वम्
२. मनः ४. पञ्चमहाभूतः

**५. द्वयोः मध्यगतं भेदं ज्ञापयत । ।**

१. आत्मा एवं मनः २. दिक् एवं कालः

**६. संयोजनं कुरुत ।**

| | (अ) | (ब) |
|---|---|---|
| १. | पृथ्वी | शब्दः |
| २. | आपः | स्पर्शः |
| ३. | तेजः | रुपम् |
| ४. | वायुः | रसः |
| ५. | आकाशः | गन्धः |

●

| ९ | गुणविज्ञानम् |
|---|---|

**निरुक्ति:-**

'गुण आमंत्रणे' इति धातो: निष्पन्नोऽयं 'गुण:' शब्द:। ''गुण्यते आमंत्र्यते लोकं अनेन इति गुण:।'' येन कारणेन लोक: वा लोकान्तर्गतमानवा: द्रव्यं प्रति आकृष्टा: भवन्ति स: गुण:।

**व्याख्या**

''समवायी तु निश्चेष्ट: कारणं गुण:।'' च. सू.

अर्थात् य: समवायसम्बन्धेन द्रव्याश्रित: स: गुण:। अत: गुणे निम्नलक्षणानि सन्ति।

१. य: समवायरूपेण द्रव्ये आश्रितो भवति।

२. य: चेष्टारहितो भवति वा कर्मभिन्न: अस्ति।

३. य: निर्गुण: एवं च अन्यगुणरहितो भवति।

४. य: गुणोत्पत्तिषु एवं कार्योत्पत्तिषु असमवायिकारणेन भवति। एतानि लक्षणानि यस्मिन् विद्यमानानि सन्ति स: गुण: कथ्यते।

* **गुणसङ्ख्या** - आचार्यचरकेन गुणस्य चतुर्षु वर्गेषु विभाजनं कृतमस्ति।

१. सार्थगुणा: - शब्द - स्पर्श - रूप - रस - गन्ध - इति पञ्च।

२. गुर्वादिगुणा: - गुरु लघ्वादय: विंशति: गुणा:।

३. आत्मगुणा: - बुद्धाप्रयत्नादय:आध्यात्मिकषड्गुणा:।

४. परादिगुणा: - परापरादिदशगुणा:

गुर्वादिगुणानेव वाग्भट्टेन विंशतिगुणा: इति स्वीकृतवान्।

आयुर्वेद: चिकित्साशास्त्रमस्ति अत: चिकित्सादृष्ट्या गुर्वादिगुणानां महत्वं आयुर्वेदे अधिकमस्ति.। अत: तेषां विस्तृतवर्णनमस्ति।

१) चरकोक्ता: गुर्वादिगुणा:।

''गुर्वादयस्तु गुरु लघु शीतोष्ण स्निग्ध रुक्ष मन्द-तीक्ष्ण-स्थिर-सर-मृदु-कठिन-विशद-पिच्छिल-श्लक्षण-खर-स्थूल:-सूक्ष्म-सान्द्रद्रवा: विंशति:।''

२) वाग्भटोक्ता: गुर्वादिगुणा:।

**गुरुमन्दहिमस्निग्धश्लक्ष्णसान्द्रमृदुस्थिर:।**
**गुणा: ससूक्ष्मविशदा विंशति सविपर्यया॥**

अ. सं. सू.

यथा- गुरु: लधु:, शीत:(हिम) उष्ण:, मन्द:, तीक्ष्ण:, स्निग्ध:, रुक्ष:, श्लक्ष्ण:, खर:, सान्द्र:, द्रव:, मृदु:कठिन:, स्थिर: सर:, सूक्ष्म:, स्थूल:, विशद: पिच्छिल इत्यादय: विंशतिगुणा:।

३) सुश्रुतोक्त गुर्वादिगुणा:।

आचार्यसुश्रुतेनापि गुर्वादिविंशतिगुणा: प्रतिपादिता: तेन दशविभागेषु विभाजनकृतमस्ति।

| | |
|---|---|
| १. शीत: - उष्ण: | २. स्निग्ध: - रुक्ष: |
| ३. मृदु: - तीक्ष्ण: | ४. विशद: - पिच्छिल: |
| ५. गुरु: - लघु: | ६. द्रव: - सान्द्र- |
| ७. श्लक्ष्ण : - कर्कश: | ८. सुगन्ध: - दुर्गन्ध: |
| ९. सर: - मन्द: | १०. आशुकारी - सूक्ष्म |

तदतिरिक्तं व्यवायी विकासी इत्यादौ द्वौ गुणौ स्त:। आयुर्वेदस्य प्रयोजनं चिकित्साकर्म भवति। चिकित्साकर्मणि एते गुर्वादिविंशतिगुणा एव भवन्ति।

आयुर्वेदे विंशतिगुणानां विशिष्टा कल्पना कृतास्ति। एतेषां गुणानां व्यवहारिक्य उपादेयता: भवन्ति।

**''दृशाद्या कर्मणः प्रोक्तास्तेषां कर्मविशेषणैः ।**

**देशवान्यान्प्रवक्ष्यामि द्रवादिस्तान्निबोधये ॥''**

सु. सू. –८६

अर्थात् विंशतिगुणेषु गुरु लघु शीतोष्ण स्निग्ध रुक्षादयः गुणाः कर्मण्यगुणाः कथ्यन्ते अर्थात् ते क्रियाकर्तारः सन्ति विशेषणरुपेण 'कर्मगुणाः' कथ्यन्ते अत इदं सिद्धं यत् गुर्वादिगुणाः कर्मसामान्यस्य गुणाः सन्ति।

१ ) **गुरुगुणः** – यस्य द्रव्यस्य बृंहणे कर्मणि शक्तिः सः गुरूः।     –हेमाद्रि।

''सादोपलेपक्लेदकृत् गुरु बृहणा।''

सु. सू. ४६

आयुर्वेदे बृहणकर्मकृत्द्रव्येषु कर्मणः कारणं गुरुगुण एव कथ्यते तदतिरिक्तं गुरुगुणस्य निम्नाङ्कितानि कर्माणि सन्ति।

१) सादकः / अवसादकः।

२) उपलेपकरः।

३) बलकारकः।

४) तर्पकः ।

५) बृहणः ।

**२ ) लघुगुणः** – 'लङ्घनेन लघुः।'– हेमाद्रि

''लघुस्तद्विपरीतः स्याल्लेखे रोपणस्तथा।''

सु. सू. ५६

गुरुत्वाभावः एव लघुः। व्यवहारिकभाषासु 'लाघवः' इति। यः गुरुगुणात् विपरितः एवं सापेक्षः अस्ति एवं च शरीरे लघुतां उत्पादयति सः गुणः लघु इति कथ्यते।

लघुगुणकर्म – १) लेखनम्          २) रोपणम्

**३ ) शीतगुणः ।**

''स्तम्भने हिमः'' – हेमाद्रि

''आह्लादनः स्तम्भः शीतो मूर्धातृट् स्वेददाहजित् । तस्याश्रयः जलम् अर्थात् जलमहाभूतः अस्ति.। लोकव्यवहारे तं शीतम् इति कथ्यते। यः स्पर्शगम्यगुणः अस्ति अतः मानसस्पर्शस्थित्याम् मनसि आह्लादकप्रभावः कर्तास्ति। सः उष्णविरोधी वर्तते.

* शीतगुणकर्म ।

१) दाहजित् ।

२) मूर्च्छाजित् ।

३) स्वेदाजित् ।

४) तृष्णाजित् ।

**४ ) उष्णगुणः – 'स्वेदने उष्मः ।' हेमाद्रि**

'उष्णस्त द्विपरीतः स्यात् पाचनश्च विशेषत–।'

सु. सू. ८६

अयं शीतगुणात् विपरितोऽस्ति। तस्याश्रयः

तेजः अर्थात् अग्निमहाभूतः अस्ति।

* उष्णगुणकर्म –

१) पाचनकारक : ।

२) जलमहाभूतानां विविधघटकान् पृथक् करोति।

**५ ) स्निग्धः वा स्नेहगुणः**

– 'यस्य क्लेदने शक्तिः सः स्निग्धः।'

– हेमाद्रि

– 'स्नेहमार्दवकृत स्निग्धो बलवर्णकरस्तथा ।'

– सुश्रुत

गुणोऽयं अक्षता विरोधी वर्तते एवं स्निग्धसापेक्षो अक्ष: गुणो भवति गुण: क्लेदनमर्थात् स्निग्धताया: शक्ति: अपि अस्ति अत: स: स्निग्ध: गुण इति।

क्लेदनस्य महाभूतं जलमस्ति।

* कर्माणि

१) आद्रतानिर्माणम्।

२) क्लेदनम् ।

३) मृदुतानिर्माणम्।

४) बलवर्धनं करोति।

५) वर्णवर्धनं करोति।

**६) रूक्षगुण:**

– यस्य शोषणे शक्ति: स: रुक्ष:। –हेमाद्रि

– रूक्षस्तद्विपरीत स्यात् विशेषात् स्तम्भन: खर:।

सुश्रुत

रुक्ष: स्निग्ध: सापेक्ष: गुण:। रूक्ष: स्निग्धगुणविपरीत: शोषणशक्ते: कारक: च अस्ति। अर्थात् यत्र शोषणप्रक्रिया भवति तत्र रुक्षगुण: विद्यमान: अस्ति। स्निग्धविपरीतत्वात् स: जलं शोषयति। तस्याश्रय: वायु: अग्नि: वा पृथ्वी महाभूत:।

* रुक्षगुणकर्माणि

१) कठिनताया: निर्माणं करोति।

२) शुष्कताया: निर्माणं करोति।

३) द्रवांशस्य शोषणं कृत्वा स्तंभनं करोति। ।

**७) * मन्दगुण: ***

– यस्य शमने शक्ति: स: मन्द:। हेमाद्रि

– मन्दो यात्राकर: स्मृत:। – सुश्रुत

यस्य शमनशक्ति: विद्यते स: मन्द: कथ्यते । अत: मन्द: शमनकारको भवति। शमनमर्थात् विषमधातूनां समभावरूपेण स्थापनम्। गुणोऽयं तीक्ष्ण: गुण: सापेक्षोऽस्ति एवञ्च मन्दगुण: तीक्ष्णगुणविरोधी वर्तते। किन्तु सुश्रुत: तं सरगुणस्य सापेक्षगुणं मनुते। गुणोऽयं प्रायश: तीक्ष्णसराशु विपरित: भवति तथा पृथ्वी जलम् इति महाभूताश्रय: (१) कर्मण: यात्राकर: अर्थात् मन्दां मन्दां क्रियां करोति। (२) प्रवृत्ति वा गतिमानक्रियाअवरोधक:।

**८) * तीक्ष्णगुण: ***

– यस्य शोधने शक्ति– स: तीक्ष्ण–। – हेमाद्रि

– दाहपाककरतीक्ष्ण: स्त्रावण:– । – सुश्रुत

तीक्ष्णगुणस्याश्रय: अग्निमहाभूत: अस्ति कारणम् अग्नि: एवं आग्नेयद्रव्यं तीक्ष्णं भवति। आचार्यचरक: तीक्ष्णगुणं मन्दविपरितं मनुते । सुश्रुत: तीक्ष्णगुणस्य सापेक्षगुणं मुदुं मनुते।

शोधनस्य कारणं तीक्ष्णगुण: अर्थात् शोघनप्रक्रियाया: कारणेन वा शक्ते: कारणेन तीक्ष्णगुण:। गुणस्य ज्ञानं शोधनप्रक्रिया द्वारा अनुमानात्प्राप्यते। शोधनमर्थात् शरीरान्तर्गतमार्गावरोधं दूरीकृत्य संचितमलान् शरीरात् बहिर्निष्कासनम्

*** कर्म** –

१) दाहकृत् – अर्थात् ज्वरनिर्माता।

२) पाकक्रुत् – अर्थात् पाचनकर्ता।

३) स्त्रावकृत् – अर्थात् दोषानां स्त्रावकर्ता।

४) शोधकृत् – अर्थात् दोषानां शोधनकर्ता।

**९) * स्थिरगुण: ***

यस्य धारणे शक्ति: स: स्थिरगुण:। –हेमाद्रि

सुश्रुताचार्येण अस्य गुणस्योल्लेखः न कृतः। य गुणः पृथ्वीमहाभूताश्रयः अर्थात् पार्थिवद्रव्ये स्थिरः गुणः अस्ति। स्थिर सरः सोपेक्षगुणाः च मन्यन्ते। अर्थात् यः सरस्य विपरीतः अस्ति।

* **कर्म** –

१) शरीरे सम्यक् यथोचितरित्या स्थापयति।

२) गतियुक्तवस्तूनि अवरोध्य स्थानेषु स्थितं करोति अर्थात् गत्यवरोधः (गुणः)

**१०) * सरगुणः ***

– यस्य प्रेरणे शक्तिः सः सरः । – हेमाद्रि

सरोऽनुलोमनः प्रोक्तः। सुश्रुतः

आचार्यसुश्रुतः सरगुणस्याश्रयः जलमहाभूतं मनुते. हेमाद्र्यानुसारं सरगुणः प्रेरकोऽस्ति। प्रेरयति इति प्रेरकः यत्र प्रेरकशक्तिः अस्ति सः सरः। सरगुणःगुणक्रियाकर्तृत्वहेतुवस्तु उत्तेजितं करोति। यः स्थिरस्य सापेक्षः अर्थात् विपरीतगुणः अस्ति।

* **कर्म** –

१) प्रेरणादाता – अर्थात् किंदृशी प्रकारकीगतेः वा क्रियायाः–निर्माणं करोति।

२) अनुलोमनम् – द्रव्यान् तेषां प्राकृतकिगतिं प्रदाता।

३) सर्वप्रकारकीक्रियायाः प्रारम्भः कर्तारः।

**११) * मृदुगुणः ***

– यस्य शमने शक्तिः सः मृदुः। हेमाद्रि।

'मृदुरन्यथा।' –सुश्रुत।

गणोऽयं जलं एवञ्च आकाश. इति महाभूतबाहुल्यता युक्त द्रव्येषु आश्रयस्थः अस्ति। लोकव्यवहारे मृदुतायाः अर्थः कोमलता भवति। चरकानुसारं मृदु तथा कठिनः सापेक्षगुणः भवति किन्तु सुश्रुतानुसारं मृदु तथा तीक्ष्णः सापेक्षगुणः अस्ति। यः कर्कशस्य एवं तीक्ष्णस्य विरोधी वर्तते, शरीरे शिथिलता तथा कोमलता उत्पन्नकर्ता गुणः मृदुः कथ्यते।

* **कर्म** –

१) शिथिलतायाः निर्माणम् ।

२) शारीरिकभावेषु मार्दवनिर्माणम् ।

३) शरीरस्य जलस्थभावानां विशेषरूपेण मृदुता निर्माणम्।

**१२) * कठिनगुणः ***

– यः दृढीकरोति स कठिनः ।

यस्य दृढीकरणे शक्तिः स कठिनः । हेमाद्रि।

चरकवागभट्टानुचार्ययोः संहितायां अस्याम् उल्लेखः भवति। सुश्रुतः अस्यगुणस्य उल्लेखंः न करोति। यः गुणः पृथिव्यादि महाभूतेषु एवं पार्थिवद्रव्येषु स्थितः वर्तते। यस्मिन् दृढता निर्माणस्य शक्तिः अस्ति स कठिनगुणः अस्ति। शरीरे या दृढता अस्ति सा कठिनगुणकारणात् भवति। यः मृदुगुणात् विरोधी एवं च आर्द्रतायाः विरोधत्वात् शारीरिकभावान् कठिनान् करोति।

* **कर्म** –

१) शारीरिकभावान् कठिनं करोति।

**१३) * विशदगुणः ***

– यस्य विवरणे शक्तिः सः सूक्ष्मः। हेमाद्रि

सूक्ष्मस्तु सौक्ष्मात् सूक्ष्मेषु स्त्रोतः स्वनुसरः स्मृतः । – सुश्रुतः

अस्य गुणस्य चर्चा आयुर्वेदस्य सर्वाचार्यैः कृताऽस्ति। अस्य साक्षेपगुणः पिच्छली वर्तते। अस्य गुणस्य महाभूताधारः वायुः तथा पृथ्वी वर्तते। लोकव्यवहारे विशदगुणस्य तात्पर्यं शुद्धता (स्वच्छता) वर्तते तथा च यस्मिन् गुणे क्षालने शक्तिः सः विशदः कथ्यते। यस्मिन् तन्तुलतायाः वा स्निग्धतायाः अभावः विद्यते, शरीरे यदा पिच्छिल गुणयुक्तस्य द्रव्यस्य वृद्धिः भवति तदा तत्र विशदगुणः क्षालनं करोति।

**कर्म -**

१) पिच्छिलतायाः शोधनम्। क्षालनं करोति।

२) शारीरभावान् शुद्धं करोति।

३) क्लेदनस्य नाशः, व्रजस्य रोपणं करोति।

**१४) * पिच्छिलगुणः ***

- यस्य लेपने शक्तिः स पिच्छिलगुणः। हेमाद्रि।

पिच्छलो जीवनो बल्यः सन्धानः श्लेष्मलो गुरुः। सुश्रुतः ।

अस्य गुणस्याधारः जलमहाभूतः अस्ति। यः गुणः जलमहाभूते एवं आपद्रव्येषु आश्रितो भवति। गुणोऽयं विशदस्य साक्षेपः अर्थात् विपरीतः वर्तते। यस्मिन् गुणे विलेपनस्य शक्तिः स पिच्छिलः कथ्यते। तंतुलता अस्य लक्षणमस्ति येन कारणेन यः गुणः आवरणं वा उपलेपनस्य निर्माणं करोति। यः बलोत्पादकः एवं जीवनधारकः अस्ति।

१) शरीरभावानां संयोगं करोति।

२) सन्धानं करोति।

३) बलं वर्धयति।

४) उपचयं करोति।

५) आवरणं लेपनम्, अनुसंन्धानं च करोति।

**१५) * श्लक्ष्ण गुणः ***

- यस्य रोपणे शक्तिः स श्लक्ष्णः। हेमाद्रि।

श्लक्ष्णः पिच्छिलवज्ज्ञेय । सुश्रुतः।

चरकसुश्रुतवाग्भट्टाचार्याः सर्वे श्लक्ष्णं गुणः मन्यते। चरकानुसारं अस्याश्रयः आकाशम्। चरकानुसारं श्लक्ष्णः तथा खरः साक्षेपगुणः। अतः श्लक्ष्णं खरविरोधीगुणः। सुश्रुतानुसारं तस्य सापेक्षः कर्कशः। यस्मिन् रोपण शक्तिः भवति स श्लक्ष्णः। कर्माणि कठिनायुक्ता स्निग्धता श्लक्ष्णोः कथ्यते। कर्मणिहि।

१) रोपणशक्ति शारीरभावनां वृद्धिं कृत्वा प्राकृतं करोति।

२) अन्य कर्माणि पिच्छिलगुणवत् वर्तन्ते।

**१६) * खरगुणः ***

- यस्य लेखने शक्तिः स खरः। हेमाद्रि।

कर्कशो विशदो यथा। - सुश्रुतः।

अस्य गुणस्योल्लेखः चरकेन एवं वागभटेन कृतः अस्ति सुश्रुतः श्लक्ष्णं कर्कशसापेक्षगुणः मन्यते। वायुमहाभूते एवं वायव्यद्रव्येषु अस्याश्रयः वर्तते। चरकमतेन गुणास्याश्रयः वायुः एवं पृथ्वी वर्तते यस्मिन् लेखने शक्तिः स खरः। लेखनस्य तात्पर्यं खूर्दनम्। खुर्दनप्रक्रिया द्वारा लेखनं भवति अतः केचन 'खर' क्रियापि कथयन्ति।

**कर्माणि -**

१) लेखनकर्मद्वारा शारीरभावान् खरीकरोति।

२) शारीरभावानाम् ह्रासं करोति।

**१७) * सूक्ष्मगुणः ***

- यस्य विवरणे शक्तिः स सूक्ष्मः। हेमाद्रि।

सूक्ष्मस्तु सौक्ष्मात् सुक्ष्मेषु स्त्रोतः स्वनुसरः स्मृतः। - सुश्रुतः।

अस्य गुणस्य वर्णनं चरकवाग्भटाचार्याभ्यां कृतमस्ति। अस्य गुणस्याधारः आकाश वायुः तथा पृथ्वी वर्तते।

अस्य सापेक्षगुणः स्थूलः अतः स्थूलविरोधी वर्तते। परंतु सुश्रुतेन आशुः गुणः सापेक्षो वर्तते इति कथितम्। यस्मिन् विवरणशक्तिः अर्थात् स्त्रोतोद्घाटनशक्तिः अस्ति सः सूक्ष्म। शरीरस्य सर्वेषु अवयवेषु प्रविष्टो भवति सः सूक्ष्मः।

**कर्माणि -**

१) शरीरस्य सूक्ष्मातिसूक्ष्मछिद्रेषु गत्वा मलशोषणं करोति।

२) स्त्रोतसेषु मार्गविरोधितत्वानां निष्कासनम् ।

**१८) * स्थूलगुणः ***

- यस्य संवरणे शक्तिः सः स्थूल। हेमाद्रि।

चरकवाग्भटाचार्यौ एनं गुणंः मन्यते। यः गुणः पृथ्वीमहाभूतस्य आश्रयवान् पार्थिवद्रव्येषु स्थितिश्चास्ति। यः सूक्ष्मस्य सापेक्षो वर्तते अतः सूक्ष्मविरोधी वर्तते। यः अवरोधकः सः स्थूलः। लोकव्यवहारे यदा पदार्थस्य विशालं आकारं भवति एवं च पदार्थः शीघ्रतापूर्वकं प्रसारितं न भवति तदा सः सूक्ष्मः विरोध 'स्थूलः' कथ्यते।

*** कर्माणि -**

(१) स्थूलताम् उत्पादयति करोति करोति। (२) अवरोधं करोति। (३) गुरूता निर्माणं करोति।

**१९) * सान्द्रगुणः ***

- यस्य प्रसादने शक्तिः सः सान्द्रः। हेमाद्रि।

- सान्द्रः स्थूलः स्याद् बन्धकारकः। सुश्रुतः

अस्य गुणस्य वर्णनं चरकसुश्रुतवाग्भटैः कृतमस्ति। सान्द्रस्याश्रयः पृथ्वीमहाभूतं अस्ति। गुणोऽयं पृथ्वीमहाभूते एवं पार्थिवद्रव्येषु स्थितः अस्ति। अस्य सापेक्षगुणः द्रवः अतः सः द्रवविरोधी वर्तते। अर्थात् शरीरे गत्वा शरीरावयवेषु प्रसादनं करोति। सुश्रुतानुसारं स्थूलतायाः निर्माणता सान्द्रः। स्वरूपं स्थूलां स्थिरः वर्तते।

*** कर्माणि -**

(१) प्रसादनम् ।  (२) बन्धकरणम्।  (३) धातुषु स्थूलता निर्माणम्।

**२०) * द्रवगुणः ***

- 'यस्य विलोडने शक्तिः सः द्रवः।' हेमाद्रि।

- 'द्रवः प्रक्लेदनः।' सुश्रुत

यस्मिन् विलोडनं अथवा व्याप्तशक्तिः भवति स द्रवः। सुश्रुतानुसारं क्लेदनस्य शक्तिः वा येन कारणेन क्लेदनं भवति सः गुणः द्रवः। गुणोऽयं पृथ्वी, तेजः, जलम् इत्यादय भूतानामाश्रितः।

*** कर्माणि -**

१) शरीरभावान् व्याप्तकरणम् ।

२) शरीरभावेषु क्लेद निर्माणम्।

३) शरीरभावानाम् वहनं गमनं च करणम्।

## स्वाध्यायः

**१. निम्नलिखितेषु विकल्पेषु समुचितं विकल्पं चिनुत।**

१. चरकेन गुणाः कति वर्गेषु विभाजिताः ?

(क) द्वयोः वर्गयोः  (ख) त्रिषु वर्गेषु  (ग) चतुर्षु वर्गेषु  (घ) पञ्चवर्गेषु

२. सुश्रुतानुसारं के गुणाः गुर्वादिगुणातिरिक्ताः सन्ति।

(क) मृदु-तीक्ष्णम्  (ख) व्यवायी-विकासी  (ग) स्निग्ध-रूक्ष  (घ) सूक्ष्म-आशुकारी

३. उपलेपकरः- बलकारकः अस्य गुणस्य कर्म अस्ति।

(क) लघुः  (ख) गुरुः  (ग) स्निग्ध  (घ) तीक्ष्णः

४. क्लेदनम् आर्द्रतायाः भावः इति कस्य गुणस्य कर्मः।

(क) स्निग्धः  (ख) रुक्षः  (ग) गुरुः  (घ) लघुः

५. यात्राकरः अर्थात् शनैः शनैः मन्दगत्या क्रियाकर्ता कः ?

(क) स्निग्धः  (ख) मन्दः  (ग) तीक्ष्ण :  (घ) सूक्ष्मः

६. प्रेरणादाता कस्य गुणस्य वैशिष्ट्यम् ?

(क)सरः  (ख) मन्दः  (ग) हिमः  (घ) उष्णम्

७. निम्नलिखितविकल्पेषु कयो गुणयोः गणना चरकवाग्भटाभ्यां न स्वीकृता।

(क)मृदु-तीक्ष्णम्  (ख) गुरु-लघुः  (ग) सुगन्धः-दुर्गन्धः  (घ) हिमः-उष्णः।

**२. एकेन वाक्येन उत्तराणि लिखत।**

१. चरकानुसारं गुणस्य लक्षणं लिखत ।

२. आयुर्वेदानुसारं गुणानां संख्या का ?

३. गुर्वादिगुणानां किं महत्वम् ?

४. चरकोक्तगुर्वादिगुणान् लिखत।

**३. टिप्पणीं लिखतः।**

१. गुणलक्षणम् , व्याख्यां, निरुक्तिं च लिखत।

२. गुरु-लघु युग्मस्य वर्णनं कुरूत।

३. पिच्छिल-विशद युग्मस्य वर्णनं कुरूत।

४. सान्द्र-द्रव युग्मस्य वर्णनं कुरूत।

**४. सूचनानुसारं कुरूत। योग्य-युग्मं योजयत।**

| अ | ब |
|---|---|
| (१) शीतः | (अ) मन्दः |
| (२) मृदुः | (ब) कर्कशः |
| (३) गुरु : | (क) लघुः |
| (४) श्लक्ष्णः | (ड) उष्णः |
| (५) सरः | (इ) तीक्ष्णः |

**५. विस्तृतप्रश्नाः समाधेयाः।**

१. गुणानां वर्णनं आचार्यानुसारं विस्तृतेन कुरुत।

२. गुर्वादिगुणानामुपरि टिप्पणी लेख्या।

# १० स्वस्थवृत्तपरिचयः

**स्वस्थः**

''धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्''

–च. सू. अ. १/१५

एतेषां चतुर्विधपुरूषार्थाणा मध्ये प्रथमः पुरूषार्थः धर्मः धर्मः सर्वदा धार्यः। रक्षितः धर्मः एव अस्मान् रक्षति। किन्तु तदर्थं शरीररक्षा अनिवार्याऽस्ति । तदर्थं महाकविना कालिदासेनऽपि कुमारसम्भवमहाकाव्ये प्रञ्चमसर्गे उद्धृतमस्ति यत् ''शरीरमाद्यं खलु धर्मसाधनम्'' ।

(१) धर्मः – धारणात् ।

(२) अर्थः – स्वर्णरजतादि ।

(३) कामः – काम्यत इति कामः सुखाद्युपभोगः ।

(४) मोक्षः – मोक्षः अवसानं क्षेपः एव च

**स्वस्थस्य व्याख्या :**

''समदोषः समाग्निश्च समधातुमलक्रियाः ।
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यमिधीयते ।। ''

–च. सू. अ. १५/४७

स्वस्थस्य लक्षणम् – यस्य आन्तरिकदोषाःसमानाः सन्ति। अग्नयः समानाः सन्ति, धातवः मलानाञ्चक्रियाः समानाः च सन्ति, तथा यस्यात्मा मन इन्द्रियादि प्रसन्नाः सन्ति, सः स्वस्थः कथ्यते ।

स्वस्थस्य रक्षणं कुर्यादस्वस्थस्य तु बुद्धिमान.

–सु. सू. १५/४५

क्षपयेद बृंहयेच्चापि दोषधातुमलान् भिषक् ।
तावधावदरोगः स्यादेतत्साम्यस्य लक्षणम् ।।

–सु. सू. १५/४६

स्वास्थ्यं प्रति वैद्यस्य कर्तव्यम् अस्ति, यत् दोषानां समतादिकं ज्ञात्वा चिकित्सकेन स्वस्थजनस्य स्वास्थ्यस्य रक्षा कर्तव्यः ॥ एवम् अस्वस्थजनस्य वर्धितदोषानां न्यूनता कर्तव्या। तथा न्यूनदोषाणां वृद्धि : कर्तव्या यावत् पर्यन्तं रोगिजनः पूर्णतः रोगात् विमुक्तो न भवेत् ।

''विकारो धातुवैषम्यं साम्यं प्रकृतिरुच्यते।
सुखसग्ज्ञकमारोग्यं विकारो दुःखमेव च ॥ ''

–च. सू. ९/८

विकृते तथा प्रकृतेः लक्षणानि – वात, पित्त , कफ तथा रसादि सप्तधातूनां विकृतिः (समावस्थायां न भवति चेत्) विकारेण गण्यते । एवं वातादि दोषत्रयः तथा रसादि सार धातूनां समावस्था हि प्रकृतिः कथ्यते । अपरेऽस्मिन् शब्दे कथ्यते चेत् आरोग्यम्ः (निरोगी) हि सुखम् तथा विकारः (विकृति) हि दुःखसंज्ञकम् अस्ति ।

''नगरी नगरस्येव रथस्येव रथी यथा ।
स्वशरीरस्य मेधावी कृत्येष्ववहितो भवेत् ॥ ''

–च. सू. ५/१०३

दैनिकक्रियां प्रति सावधानाः भवेयुः यथा नगरस्य स्वामी नगरस्य रक्षायाम् एवं रथस्य स्वामी रथस्य रक्षणार्थं सदैव तत्परः तथैव बुद्धियुक्तः पुरूषः स्व शरीरे उपर्युक्त दैनिकक्रियायाः पूर्णः प्रयोगः सावधानेन करणीयः ।

''शीतोष्णे चैव वायुश्च, त्रयः शरीरजाः गुणाः ।
तेषां गुणानां साम्यं यत्तदाहुः स्वास्थ्यलक्षणम् ॥ '' –महाभारतम्

अर्थात् त्रिविधगुणानां साम्यावस्था तथा शारीरिक स्वास्थ्यस्य प्रथमं लक्षणमस्ति, यदा कफप्रकोपः स्यात् तदा कासरोगा इत्यादयः रोगाः भवन्ति । तथैव पित्त प्रकोपे सति आम्लपितः भवति, एवमेव प्रकारेण वायुप्रकोपः स्यात् तदानीं वायुः भवति । यदा वयं सामान्यरोगाणां प्रति दुर्लक्ष्यं भजामः तदा महाव्याधयः उत्पद्यन्ते । तेन शरीरधर्मः अर्थात् शीर्यते इति लक्षणं यथाशीघ्रं सिद्धं भवति । अतः यथाशक्यं गुणत्रयसाम्यं संपादनीयं तेन शारीरिकस्वास्थ्यं सुदृढं स्यात् । सुदृढे स्वास्थ्ये धर्मः साधितः भवति । धर्म साधिते सति ''धर्मो रक्षति रक्षितः'' इति न्यायेन धर्मः रक्षति पुरूषार्थचतुष्टयं सुसम्पादितञ्चभवति । अतः जीवनसाफल्यतार्थमिदं वपुः तस्य. च वपुषः परमावश्यक्ता वर्तते । एतदर्थं शारीरिकस्वास्थ्यस्य ज्ञानमपि आवश्यकमस्ति ।

**अधिष्टानभेदेन स्वास्थ्यस्य प्रकार द्वयम् ।**

१. शारीरिकः भेदः ।

२. मानसिकः भेदः ।

**( १ ) शारीरिकभेदः**

भेदोऽयं त्रिदोषात् प्रभवति । दोषानां साम्यता आरोग्यप्रदा भवति ।

एवं दोषाणाम् असाम्यता शरीरस्य कृते रोगकारिका वर्तते ।

**( २ ) मानसिकभेदः ।**

रजदोषः एवं तमदोषः एतौ मानसिकदोषौ विद्येते ।

इमौ असाम्यअवस्थायां मनसःकृते दोषकरं भवति ।

**स्वास्थ्यस्य द्वौ प्रकारौ भवतः।**

(१) प्रतिपुरुषस्वास्थ्यम् ।

(२) जानपदिकस्वास्थ्यम् ।

**स्वस्थवृत्त**

पञ्चपञ्चकमुद्दिष्टं मनो हेतुचतुष्टयम् ।
इन्द्रियो पंञ्चमोध्याये सद्वृतमखिलेन च ॥''३०''

स्वस्थवृत्तं यथोदिष्टं यः सम्यगनुतिष्ठति ।
स समाः शतमव्याधिरायुषा न वियुज्यते ॥''३१''

नृलोकमापूरयते यशसा साधुसम्मतः ।
धर्मार्थावेत्ति भूतानां बन्धुतामुपगच्छति ॥''३२''

परान् सुकृतिनो लोकान् पुण्यकर्मा प्रपद्यते ।
तस्माद् वृतमनुष्ठेयमिदं सर्वेण सर्वदा ॥''३३''

च.सू. १/३०-३३

**विषयोपसंहारः**- इन्दियोपक्रमणीय नामके अध्यायेडस्मिन् पञ्च पञ्चकानाम् एवं मनसः वर्णनम् अस्ति । ततः हेतुचतुष्टय प्रकृतिः तथा विकृतिः समयोगादिचत्वारि कारणानि एवं सम्पूर्णसदवृत्तस्य वर्णनम् अस्ति । यथा स्वस्थवृतस्य (सदवृत) उपदेशो भवत् तदनुसारं यः तस्य सेवनं करोति सः शतवर्षपर्यन्तं रोगरहितं दीर्घजीवनं यापयति । यः सद्वृत्तस्य सेवनं करोति, सः सत्पुरूषाणाम् आदरणीयः भवति । स्वयशसा सम्पूर्णे जगति प्रसिद्धो भवति । समस्तप्राणिनः प्रति प्रीतिपात्रः भूत्वा धर्मार्थयोः प्राप्तिं करोति । इत्थं पुण्यं (अनिन्द्यं) कर्मकृत् पुरूषः द्वितीयजन्मनि पुण्यात्मभिः सह स्वर्गादिलोकाः प्राप्नोति । अनेन सर्वैः मानवैः सदा सर्वदा सदवृतस्य अनुष्ठानं (आचरणम्) कर्तव्यम् ।

**प्रयोजनम् :**

तस्मादात्महितं चिकीर्षता सर्वेण सर्व ।
सर्वथा स्मृतिमास्थाय सदवृतमुष्ठेयम् ॥

च.सू. ८/१७

मनसा सह इन्द्रियाणाम् विषये स्वस्थता पालनीया । अत: मनसा सह इन्द्रियै: विकृत: (विकारयुक्त:) न भवति, अर्थात् स्वस्थप्रकृतौ स्थिताऽस्ति । तत्रोद्भवविकारस्य रक्षणार्थं निम्नाङ्कितउपायै: प्रयत्नशीलै: भवितव्यम । यथा इन्द्रियम् तथा तदनुकूल विषयानां समयोगेन एवं स्थिर बुद्ध्या योग्यं विचार्य कर्मण: सुव्यवस्थितप्रकारेण कर्तव्ये सति तथा देश: काल: आत्मन: गुणै: विपरीत् गुणयुक्त आहारविहारादिभि: सेवनेन स्वहितेच्छुक प्रत्येकमानवस्य कर्तव्यम् अस्ति यत् स: स्मृतिपूर्वकं सम्पूर्णसद्वृत्तस्य सदैव व्यवहार कुर्यादिति ।

**''प्रयोजनं चास्य स्वस्थस्य स्वास्थ्य रक्षणमातुरस्य विकारप्रशमनं च''**

च.सू. ३०/३६

आयुर्वेदस्य किं प्रयोजनम् :-

संक्षिप्तं प्रयोजनमस्ति यत् स्वस्थपुरूषस्य स्वास्थ्यस्य रक्षा करणीया । एवं रोगयुक्तपुरूषस्य विकाराणां शान्ति: करणीया । चरकसंहिता सूत्रस्थाने (१/४१) अध्याये आयुर्वेदे स उच्यते कथनेनानेन हिताहितम् अहित आयो: विवेचनं कृतम् अस्ति । पुन: अग्रे गत्वा इदमायुष्मतां कुमाराणां लक्षणं भवति । (च.सू.अ.(८) निर्दिष्टम्) अस्य विवेजनम् अत्र प्रस्तुतम् ।

वत्स सुश्रुत इह खल्वायुर्वेद प्रयोजन

''व्याध्युपसृष्टानां व्याधिपरिमोक्ष: स्वस्थस्य रक्षणं च ।।''

सु. सू. अ. १/१३

आयुर्वेदस्य प्रयोजनम् हे पुत्र ! सुश्रुत प्रस्तुते प्रसङ्गे आयुर्वेदस्य धे प्रयोजने स्त: ।

१. रोगग्रस्त :- प्राणीनां रोगस्य दूरीकरणम् ।

२. स्वस्थप्राणिनां :- स्वास्थ्यस्य रक्षा करणीया ।

'सम्यक् प्रकारेण निर्विकारत्वेन तिष्ठति स्वस्थ: । सुश्रुतानुसारं स्वस्थस्य परिभाषा-समदोष: समाग्निश्च समधातुमलक्रिय: प्रसन्नात्मेन्द्रियमना: स्वस्थ इत्यभिधीयते' ।

**स्वाध्याय:**

**१. निम्नलिखितेषु विकल्पेषु समुचितं विकल्पं चिनुत।**

१. पुरूषार्था: कति सन्ति ?

(क) १ (ख) २ (ग) ३ (घ) ४

२. धर्मस्य क अर्थ: ?

(क) धारणात् धर्म: (ख) अवसानं क्षेप: (ग) स्वर्णरजतादि (घ) काम्यत

३. काम: अर्थात् किम् ?

(क) धारणात् धर्म: (ख) अवसानं क्षेप: (ग) स्वर्णरजतादि (घ) काम्यत

४. आयुर्वेदे स्वास्थ्यप्रयोजनानि कति विधानि सन्ति ?

(क) १ (ख) २ (ग) ३ (घ) ४

५. अधिष्ठानभेदात् स्वास्थ्यस्य भेदा: कति सन्ति ?

(क) १ (ख) २ (ग) ३ (घ) ४

६. व्यक्तिभेदात् स्वास्थ्यस्य भेदा: कति सन्ति ?

(क) १ (ख) २ (ग) ३ (घ) ४

७. धातव: कति सन्ति ?

(क) ५ (ख) ६ (ग) ७ (घ) ८

८. दोषा: कति सन्ति ?

(क) १ (ख) २ (ग) ३ (घ) ४

**२. एके वाक्येन उत्तराणि ददतु।**

१. स्वस्थस्य लक्षणं किम् ?

२. हेतवः कति सन्ति ?

३. दु:खस्य संज्ञा का ?

४. कुत्र सावधानेन भवितव्यम् ?

५. शारीरिकस्वास्थस्य प्रथमं लक्षण किम् ?

**३. लघूत्तरीयानां प्रश्नानाम् उत्तराणि ददतु ।**

१. आयुर्वेदस्य प्रयोजनं किम् ?

२. शारीरिकभेदं लिखत ?

३. पुरूषार्थाः कति सन्ति के च ते ?

४. महाकविकालिदासेन कुत्र किं च उल्लिखितम् ?

५. सुश्रुतानुसारं स्वस्थस्य परिभाषा लिखत ?

**४. सविस्तरम् उत्तराणि ददतु।**

१. स्वस्थवृतौ लक्षणानां विस्तार पूर्वकम् उत्तरं ददतु ?

२. प्रकृति विकृतेः च व्याख्या सविस्तरं लिखत ?

३. स्वस्थवृत्तस्य प्रयोजनं सविस्तरं वर्णयत ?

४. चतुर्विधपुरूषार्थस्य वर्णनं सविस्तरं लिखत ?

●

# ११ दिनचर्या

अथातो दिनचर्याध्यायं व्याख्यास्यामः ॥ १ ॥

इति ह स्माहुरात्रेयादयो महर्षयः ॥ २ ॥

– इतः परं दिनचर्याध्यायस्य व्याख्यानं कुर्मः यच्च आत्रेयादिभिः कृतम्।

– ब्राह्मे मुहुर्ते उत्तिष्ठेद् जीर्णाजीर्णे निरूपयन् रक्षार्थमायुषः स्वस्थो स्वस्थेन पुरूषेण स्वभुक्तमन्नं जीर्णमुत न इति विचिन्त्य ब्राह्मे मुहुर्ते जागरणीयम्। इत्थं ब्राह्मे मुहूर्ते उत्थिते सति आयुःरक्षितं भवति यद्यन्ने जीर्णं न जातं तर्हि तेन न जागरणीयम् तेन भोजनस्य जीर्णतान्ते शय्या त्यागः कर्तव्यः।

ब्राह्ममुहूर्तम् – ब्रह्म इत्यस्यार्थः ज्ञानम्। अयं कालः ज्ञानस्य अस्ति अतः ब्राह्ममुहूर्ते जागरणीयम्। ब्राह्ममुहूर्तमर्थात् रात्रेः पश्चिमभागः (अन्तिमभागः)अयं पश्चिमकालः रात्र्येः चतुर्दशतमं मुहूर्तमस्ति। अस्मिन् मुहूर्ते उत्त्थाय परमात्मनः ध्यानं कर्तव्यम्।

जातवेगः समुत्सृजेत् ॥ ३ ॥

उदङ्मुखो मूत्रशकृदक्षिणाभिमुको निशिः।

वाचं नियम्य प्रणतः संवीताङ्गेऽवगुष्ठितः ॥ ४ ॥

प्रवर्तयेत्प्रचभितं न तु यत्नादुद्रीरयेत ।

नामेध्यमाग्रमृद्भस्म गोस्थानाकीर्णगोमये ॥ ५ ॥

पुरान्तिकादिवल्मीकरम्योत्कृष्टचितिद्रुमे।

न नारीपूज्य गोऽर्केन्दुवाय्वन्नाग्निजलं प्रति ॥ ६ ॥

न चातिरस्कृत्य महीं भयाशक्त्योस्तु कामतः।

ब्राह्मेमुहूर्ते उत्थाय आयुः कामयमानेन मलवेगः नावरुध्य अपि तु शीध्रं मालत्यागंः कर्तव्यः। दिवसश्चेत् उत्तराभिमुखः रात्रिश्चेत् दक्षिणाभिमुखम् उपववेष्टव्यम् त्यागकाले मौनं धर्तव्यम् अन्यत् किमपि कार्यं न कर्तव्यम् यथा मृत्खननं अन्यविषयचिन्तनं च। मलत्यागकाले वस्त्रहीनं न स्थेयमपि तु शरीरोपरि वस्त्रं धर्तव्यं येन मलत्यागान्ते लज्जानिवारणं भवेत्। मलत्यागस्य समये शिरोवेष्टनं कर्तव्यम् कारणमेतत् शरीरस्य उत्तमाङ्गम् अस्ति अस्मिन् देवकोषाः भवन्ति। सत् बहिः न स्याच्चेत् यत्नेन त्यागः न कर्तव्यः।

''अधोनिर्दिष्टस्थाने मलत्यागः न कर्तव्यः''

– अमेध्ये (अत्यन्तकनिष्टे) स्थाने, मार्गे, मृदभस्मोपरि आकीर्णे स्थाने (यत्र जनानां गोष्टी भवति तत्र) गोमयोपरि ग्रामस्य समीपवर्तिनीस्थाने, अग्निसमीपे, रमणीयोद्यानसमीपे उद्याने वा, खनितभूमौ, चितासमीपे, वृक्षस्योपरि अधस्ताच्च, स्त्रीय सम्मुखीभूय, गुर्वादिपूज्याना समीपवर्तिनिस्थाने, गोसूर्यचन्दवायुजलाग्निं प्रति मुखं कृत्वा मलत्यागो न कर्तव्यः. किन्तु यदि चौरादीनां भयः शरीरे असामर्थ्यं च भवेत् तदा विधिपालनम् अचिन्त्य यथेच्छापूर्वकं मलत्यागः कर्तव्यः। अर्थात् उर्ध्वोक्तं स्वस्थपरुषेण अवश्यमेव कर्तव्यम्।

– न वेगितोऽन्यकार्यः स्यान्नाजित्वा साध्यमामयम् ॥ ७ ॥

मलमूत्रस्य स्वाभाविकवेगे उपस्थिते सति अन्यत् कार्यं न कर्तव्यम्। सर्वप्रथमं तत्कार्यं सम्पाद्य अन्यकार्यं कर्तव्यम इत्यमेव साध्यरोगचिकित्सां कारयित्वा अन्यकार्यं कुर्यात्।

– स्पृष्ट्वा धातून्मलानश्रु द्दशं केशनखांश्च्युतान् ॥ ८ ॥

– स्नात्वा भोक्तुमना भुक्त्वा सुप्त्वा श्रुत्वा सुरार्चने ।

रथ्यामाक्रम्य चाचामेदुपविष्ट उदङ्मुखः ॥ ९ ॥

– प्राङ्मुखो वा विविक्तस्थो न बहिर्जानु नाान्यदृक् ।

अजल्पन्नुन्तरासंगी स्वच्छैरंगुष्ठमूलगैः ॥ १० ॥

– नोध्दृतैर्नानतो नोर्ध्वं नाग्निपक्वैर्न पूतिभिः ।

न फेनबुद्बुदक्षारैर्नौकहस्ता र्पितैर्जलैः ॥ ११ ॥

– नार्दैकपाणिर्नामेध्यहस्तपादो न शब्दवत्।

आचमन – निम्नोक्तावस्थासु आचमनं (मुखप्रक्षालनं) कार्यम्। शरीरनिर्गतधातुस्पर्शान्ते, मलममूत्रादि मलिनवस्तूनां स्पर्शान्ते, अश्रु,वसाकर्तितकेशानां नखानां च स्पर्शान्ते आचमनं कुर्यात्। इत्थमेव स्नानान्ते, भोजनात् प्राग् सुप्त्वा, क्षुत्वा, देवार्चनकाले, रथ्यारनान्ते आचमनं कुर्यात्। आचमनकाले प्राङ्मुखो उदङ्मुखो वा तिष्ठेत् उपविश्यैव आचामेत्। आचमनम् एकान्तस्थाने कुर्यात् आचमनकाले स्वहस्तः बहिर्जानुः मा भूः इति ध्यायेत्। आचमनकाले स्वाक्षिणी इतस्ततः मा पश्येद् इति ध्यायेत्। आचमनकाले वार्तालापो न विधातव्यः शरीरोपरि उत्तरीयवस्त्रं धरेत् नग्नं नाचामेत्। आचमनीयजलं स्वच्छं निर्मलं च भवेत्। अंगुष्ठमूलं यावज्जलं स्वीकर्तव्यम्। जलधारा अविच्छिन्नं पातयेत् न तु बुद्बुदम्। आचमनम् नतस्सन् उत्थायच न कुर्यात् अपितु उपविश्यैव कर्यात्। आचमनजलम् उष्णं मा भूः शीतलमेव जलं स्वीकुर्यात्। जलेदुर्गंधं, फेनः,बुद्बुदाच न स्युः तादृशं जलं प्रायः दूषितं भवति अतः जले क्षारः न स्यात् अर्थात् जलस्य स्वाभाविकगुणधर्माः स्युरित्यर्थः। तत्र कृत्रिममाधुर्यं वा प्राकृतिकं लवणादि न स्यादिति। आचमनार्थं जलं हस्ताभ्यामेव स्वीकर्तव्यं हस्ताभ्यामेव दातव्यम्,। एकहस्तेन आचमनं न कर्तव्यम् न च जलं प्रदातव्यमिति। अपवित्रहस्ताभ्याम् आचमनं न कर्तव्यम् हस्तपादौ प्रक्षाल्यैव आचमनं कुर्यात्। आचमनकाले मुखनासिकया च शब्दोच्चारणं न कर्तव्यम्।

**दन्तधावनम्**

वटासनार्कखदिरकरञ्जकरवीरजम् ॥ १२॥
सर्जारिभेदापामार्ग मालती ककुभोद्भवम्।
कषायतिक्तकटुकं मूलमन्यदपीदृशम् ॥ १३॥
विज्ञातवृक्षं क्षुण्णाग्रमृज्यग्रन्थि सुभूमिजम्।
कनीन्यग्रसमस्थौत्म्यं सुकूर्चं द्वादशामुलं ॥ १४॥
प्रातर्भुक्त्वा च यतवाग्भक्षयेद्दन्त धावन्म्।
व्याप्यत्रिवर्गत्रितय क्षौदाक्तेन च धर्षयेत् ॥ १५॥
शनैस्तेन ततो दन्तान्दन्मांसान्यबाधयन् ॥

– निम्नलिखितैः वृक्षशाखादिभिः दन्तधावनं प्रकर्तव्यम् वटेन, असनेन, अर्केण, खदिरेण, करञ्जेन, करवीरजेन, सर्जेन, अरिभेदेन, अपामार्गेण, मालत्या, ककुभेन (अर्जुनवृक्षेण) च दन्तधावनं प्रकर्तव्यम्। येषां रसः, कषायः, कटुः, तिक्तश्च भवेत् तादृग्वनस्पतिदन्तधावनं योग्यम्। यस्य वृक्षस्य दन्तधावनं कुर्मः तदस्मदपरिचितं स्यात् अन्यथा मोहिताः मूर्च्छिताः च भवाम इति बहुधा दृष्ट्म् अतः अपरिचितवृक्षस्य दन्तधावनं न कर्तव्यम्। दन्तधावनस्याग्रभागं कोमलं कृत्वा ग्रंथिरहितं प्रशस्तदेशोद्भवं दन्तधावनं स्वीकर्तव्यम्। तच्च कनिष्ठिकाग्रसमं स्थूलतायुतं द्वादशामुलं च भवेत्। दन्तधावनं बारद्वयं प्रकर्तव्यं प्रातः समुत्थाय रात्रौ भोजनान्ते शयनात् प्राग् इति। दन्तधावनकाले वार्तालापो न कर्तव्यः। दन्तधावनंकाले त्रिवर्गत्रितय अर्थात् (1) त्रिफला,– हरितकी –, विभितकी –, आमलकीचूर्णम् मिश्रीकृत्य (2) त्रिकटुसौठंचूर्णं कृष्णमरिचचूर्णं, पिप्पलचूर्णं (3) त्रिजातकं, दालचिली, इलायचीचूर्णम् तलचूर्णम् मधुना सह सम्मिल्य शनै शनैः घर्षयेत्। दन्तधावनकाले चूर्णघर्षणकाले दन्तमूलानां हानिः न भवेदिति चिन्तनीयम्।

लिखेदनुसुखं जिह्वां जिह्वानिर्लेखनेन च। तथाऽस्य मलवैरस्यजिह्वागन्धाऽऽस्य दन्तजाः
रुचिवैशद्यलधुता न भवन्ति भवन्ति च ॥ १६॥

– दन्तधावनान्ते ससुखं जिह्वानिर्लेपनं कार्यम्। इत्थं जिह्वादन्तयोः स्वच्छीकरणेन मुखस्य वैरस्यं, दौर्गन्ध्यं च नश्येत् परं जिह्वादन्तयोः रोगाः न भवन्ति भोजने रूचिः मनः प्रसन्नं शरीरे लघुता च प्रतीयते। भोजनान्ते जिह्वानिर्लेपनं न कार्यं वमनभयात्।

– नाद्यादजीर्णवमयुरवासकासज्वरार्दिती।
तृष्णा ऽऽस्यपााकहृन्नेत्रं शिरः कर्णामयी च तत् ॥ १७॥

– अजीर्णावस्थायां, वमनान्ते, श्वास–कासरोगान्ते, ज्वरकाले, अदितकाले (मुखविकृति रोगे), पिपासावस्थायां, मुखपाकरोगे नेत्ररोगकाले, शिरो रोगकाले, कर्णरोगकाले च दन्तधावनं न कर्तव्यम्।

दन्तान्पूर्वमधो घर्षेत्प्रातः सिञ्चेच्च लोचने।
तोयपूर्णमुखो ग्रीष्मशरदो शीतवारिणा ॥ १८॥

दन्तधावनकाले पूर्वमधो, दन्ताः परं उर्ध्वदन्ताः घर्षणीयाः। तदनु अक्ष्णोः शीतजलेन क्षालनं कर्तव्यम्। शीतजलेन तोयपूर्णमुखं कृत्वा जलं बहिः कुर्यात्। शीतजलेन गण्डूषत्रयं कुर्यात्। गीष्मशरद शीतजलेन अन्यर्तुषु ईषदुष्णजलेन अक्ष्णोः क्षालनं गण्डुषाः कर्तव्या।

– प्रणम्य देवान्वृद्धांश्च मंगलाष्टशतं शुभम्।
शुम्वन्काञ्चनविन्यस्तं सर्पिः पश्येदनन्तरम् ॥ १९॥

मुखक्षालनान्ते देवगुरून प्रणम्य मंगलाष्टक्कानि श्रुणुयात् तदनु स्वर्णपात्रे स्थितं घृतं पश्येत्।

सौवीरमञ्जनं नित्यं हितमक्ष्णोस्ततो भजेत् लोचने तेन भवतो मनोज्ञे सूक्ष्मदर्शने ॥ २५॥

– कृष्णसौवीरेन प्रतिदिनं अक्ष्णो: अञ्जनं कर्तव्यम्। तेन अक्षिणी सुन्दरे सूक्ष्मदर्सनयोग्ये च भवत:। अंञ्जनकरणेन अक्ष्णो: रक्तश्वेतकृष्णा इति भागत्रयं भिन्नं दृश्यते। अक्षिणी स्वच्छे पक्षिणी च सुस्निग्धे घते च भवत:।

– चक्षुस्तेजोमयं तस्य विसेषाच्छ्लेष्मतो भयम् ॥ २६॥

योजयेत्सप्तरात्रेऽम्मात्स्रावणार्थं रसाञ्जनम्॥

शरीरे अक्षिणी तेजस: प्रतिनिध्यं विदधाति। अत: वातादिदोषै: विशेषत: कफदोषेण अक्ष्णो: रोगा: भवन्ति। कारणं श्लेष्मा तेजधातो: सर्वथा विपरीता: एकं शीतमपरं उष्णमस्ति, अत: अक्ष्णो: रक्षणाय सप्ताहे एकदिवसं रसाञ्जनं कर्तव्यम्।

रसाम्जनेन आक्ष्णो: दूषितजलं (ष्लेष्मा) बहि: निर्गच्छति।

अणुतैलं ततो नस्यं ततो गण्डूषधारणं ॥ २७॥

घनोन्नतप्रसन्नत्वक् स्कन्धग्रीवाऽस्यवक्षस:।

सुगन्धिवदना: स्निग्धनि: स्वना विमलेन्द्रिया: ॥ २८॥

निर्वलीपलितव्यंगा भवेयुर्नस्यशीलिन:।

ओष्ठस्पुटनपारुष्यं मुखशोषद्विजामया: ॥ २९॥

न स्यु: स्वरोपधाताश्च स्नेहगण्डूषधारणात्।

खदिरक्षीरिवृक्षारि मेदाम्बुकवलग्रह: ॥ ३०॥

अरोचकास्यवैरस्य मलपूति प्रसेकजित्।

सुखोष्णोदकगण्डूषैर्जायते वक्त्रलाघवम् ॥ ३१॥

अञ्जनान्ते नासाभ्यां नस्यं कर्तव्यम्। नस्यकाले मुखं तैलेन क्वाथेन पिहितं न स्यात्तथा भरणीयम्। गण्डुषै: स्कन्धौ शक्तियुतौ भवत: ग्रीवोन्नता भवति, मुखं त्वक्च प्रसन्नं निर्मलं भवति, उरस: भाग: विशाल: भवति। मुख्रात् सुगन्ध: निर्गच्छति स्वर:गंभीर: स्निग्धर्स्वरो भवति। इन्द्रियाणि निर्मलानि स्वस्थानि च भवन्ति। मुखं निर्मलं भवति, केशश्वेतता मुखस्य कृष्णचिह्नानि नश्यन्ति। तेलगण्डूषै:मुखं प्रसन्नं,ओष्ठौ सफुटनहीनौ, पारूष्यरहितौ दन्ता: सहीतारहिता: वा दुर्गन्धरहिता:, स्वरोपधातश्च न भवति।

खेरवृक्षस्य, क्षीरिवृक्षस्य (वटपिप्पलार्करय:) ईरिभेदस्य क्वाथेन मुकं तथा भर्तव्यं येन क्वाथस्य मुख्रभ्रमणं स्यात् इत्थं क्वाथथप्रयोगेण मुख्रस्य विरसता, भोजने अनिच्छा मुख्रगन्धं, मुख्रमलिनता, मुख्रात् मलपूति: च नष्टा भवति उष्णजलेन गण्डूषान् कृत्वा कपुदोषशान्ति: भवति।

प्रायोगिकं ततो धूमं गन्धमाल्यादि चाचरेत्।

धूमादस्योर्ध्वजत्रूत्था न स्युर्वातककामया: ॥ ३२॥

गण्डूपान्ते प्रायोगिक धूमसेवनं कर्तव्यम् परं शरीरोपरि सुगन्धितद्रव्यानां लेपनं ग्रीवायां मालाधारणं च कर्तव्यम्। धूम्रसेवनेन जत्रुण: (यत्राक्षक अस्थिना सह उर्वस्थिन: सन्धि भवति) रोगो न भवति। धूम्रपानेन वातकफजन्य रोगा: न भवन्ति।

अञ्जनोत्क्लेशितं नस्यै: कवलैर्नावनेरितम्।

धूमेन कवलोत्क्लिष्टं क्रमाद्वातकफं जयेत् ॥ ३३॥

नेत्रयो: अञ्जनेन कुपितवातकफयो: शान्ति: नस्येन भवति, नस्येन कुपितवातकफयो: शान्ति: कवलेन भवति, कवलेन कुपितवातकफयो: शान्ति: प्रायोगिकधूम्रपानेन भवति। अत: अञ्जनान्ते, नस्यम् नस्यान्ते कवलम् , कवलान्ते धुम्रपानं च कर्तव्यम्। अयं विधि: वर्तते।

''गन्धमाल्यादिकं वृष्यमलक्ष्मीघ्नं प्रसाधनम्। ''शरीरोपरि कस्तूरिगोरोचनादि सुगन्धितपदार्थानां लेपनं कर्तव्यं ग्रीवायां मालाधारणं च कर्तव्यं तेन वृष्यपौरूषवर्धनम् अशुभनाशकं प्रसन्नतोत्पाति: च भवति।

वासो न धारयेज्जीर्णं मलिनं रक्तमुल्बणम् ॥ ३४॥

माल्यं न लम्बं न बहिर्न रक्तं जलजादृते।

नैव चान्येन विधृतं वस्त्रं पुष्पमुपानहौ ॥ ३५॥

जीर्णं मलिनं वस्त्रं न धर्तव्यं। परम् अत्यन्त रक्तं घट्टवर्णयुतमपि वस्त्रं न धर्तव्यम्। अतिलम्बा मालाऽपि न धर्तव्या परं

राजमार्गे गोचरा भवेत् तादृशी मालाऽपि न धर्तव्या। रक्तकमलान् विहाय अन्यरक्तकुसुमस्य माला न धरणीया। अन्येन या माला धृता सा पुनः न धरणीया। इत्थमन्येन धृतवस्त्राणि (प्रक्षालनात्प्राक्न्) घ्रातपुष्पाणि घृतोपनहौ च न प्रयुज्येत।

ताम्बूलभक्षणस्य लाभालाभौ

- रूचिवैशद्यसौगन्ध्यमिच्छन्वक्रेण धारयेत्।
  जातीलवंगकर्पूरकंकोल कुटुकैः सहः ॥ ३६ ॥
- तांम्बूलीनां किसलयं हृदं पूगपुलान्वित्तम्।
  रक्तपित्तक्षतक्षीणरूक्षोत्कुपितचक्षुषा ॥ ३७ ॥
- विषमूर्च्छामदातानामपथ्यं शोषिणां च तत्।
  पथ्यं सुशोषिते भुक्ते स्नाते वान्ते च मानवे ॥ ३८ ॥
  द्विपत्रमेकं पूगं च सचूर्णकदिरं च तत्।

भोजने रुच्युत्पादनाय मुखे सुगन्धहेतवे मानवेन जातीलवंगकर्पूरकङ्कोलकटुकेनः सह पुगीपुलं भोक्तव्यम्। अनेन सह पर्णं स्याच्चेत् हृदयोपयोगी भवति। रक्तपित्तरोगिणा, क्षतरोगी, क्षीणरोगी, रूक्षताकारणात् यस्याक्ष्णोः पीडा भवति वा नेत्रपीडा युक्तजनेन, विषपीडीतेन, मदार्तेन, शोषिणा च ताम्बूलभक्षणं न कर्तव्यम्।

उत्थाय, भोजनान्ते, स्नानान्ते, वमनान्ते च सचूर्णं खदिरं च ताम्बूलभक्षणं हितकारी भवति।

उत्तिष्ठेत ततोऽत्यर्थमर्थेष्वर्थानुबन्धिषु ॥ ३९ ॥
निन्दितं दीर्धमप्यायू रसन्निहितसाधनम्।
कृषिं वणिज्यां गोरक्षामुपायैर्गुणिनं नृपम् ॥ ५० ॥
लोकदृयाविरूद्धां च धनार्थी संश्रयेतक्रियाम्।
मुक्तवेगश्चगमनस्वप्नाहारसभास्त्रियः ॥ ५१ ॥

इतः परं यैः कार्यैः धनागमः स्यात् तदारभेत। निर्धनेन, आवश्यक-साधनाभावे जीवनयापनं निन्दितं भवति। अतः धनार्जनाय प्रयतनीयम्। तदर्थं कृषिकार्यं, व्यापारः, गोपालनं, ऐश्वर्यवतः सेवा आदि संमानितानि कार्याणि कुर्यात्। येषां कार्याणां निंदा इह परत्र च न स्यात् तादृशानि कार्याणि कुर्यात्।

मलमूत्रादिआवश्यकोपस्थितवेगत्यागपूर्वकं यात्रायां, शयने भोजने, सभायां स्त्रीप्रसंगे च गन्तव्यम्। स्वाभाविक वेगोपस्थितिकाले तान् रुध्य पूर्वोक्तानि कार्याणि न कुर्यात्।

निष्क्रमणविधिः

पाणिनाऽऽ लभ्य निष्कामेद्रत्नपूज्याज्यमङ्गलम्।
सातपत्रपदत्राणो विचरेद्युगमात्रदृक् ॥ ५२ ॥
निशि चात्ययिके कार्ये दण्डी मौली सहायवान्।
प्रावृत्य पर्यटेद्रात्रौ न प्रावृत्य शिरोऽहानि ॥ ५३ ॥

गृहान्निर्गमनकाले रत्नपूज्येज्यशुभवस्तूनां, (पुष्प-स्वार्णादि) वस्तूनां स्पर्शं कृत्वा निर्गन्तव्यम्। पादयोः उपानहौ, आत्तपत्रं च धृत्वा निर्गच्छेत्। सर्वदिक्षु पश्यन् विचरणं कर्तव्यम्। रात्रौ निर्गमनकाले हस्ते दण्डःशिरसि आतपत्रं, सहायकेन सहः बहिः गन्तव्यम् । रात्रौ शिरः संवेष्ट्म भ्रमणं कर्तव्यं दिवा विनातपत्रमपि भ्रमितुं शक्यते।

चैत्यपूज्यध्वजास्तच्छायाभस्मतु,ाशुचीन।
नाक्रभेच्छर्करालोष्टबलिस्नानभुवो न च ॥ ५५ ॥

निम्नोक्तस्थानानि संलघ्य न गन्तव्यम्। तेषु कानिचन वस्तूनि पवित्राणि कानिचन अपवित्राणि उभयावस्तासु लंघनं निन्दनीयं। यथा-चैत्यं-(देवस्थानं मन्दिरादि) पूज्यं (गुरुगृहं), ध्वजा (पताका), अशस्त(अमंगल वस्तु-अशुभ वस्तु-शवादि) इत्यस्य छायालंधनं न कर्तव्यम्। भस्मोलंधन, धान्यस्य त्वगुलंधनं,अपवित्रवस्तूनः, शर्करायाः (बालुकायाः) लोष्ठोल्लधंनम् च न गच्चेत्। यत्र अन्यैः सनातं तञ्चलं भवेत् ततोऽपि न गन्तव्यम्।

मध्याहे सन्ध्ययो रात्रावर्धरात्रे चतुष्पथम्।
न सेवेत न सर्वर्यां वृक्षचैत्यान्न चत्वरम् ॥ ४ ५ ॥
सूनाव्वीशून्यगृहश्मशानानि दिवाऽपि न।

मध्याहे, सन्ध्याकाले, रात्रौवाअर्ध रात्रौ चतुष्पथं न गच्छेत्।
इत्थमेव रात्रौ मवृक्षास्याध:, देवाहिस्थाने, चत्वरे न वसेत्।
वधस्थाने, शून्यगृहे श्मशाने तु दिवाऽपि न निवसेत्।
न हुंकुर्याच्छवं पूज्यं प्रशस्तान्मंगलानि च ॥ ४ ६ ॥
नापसव्यं परिक्रामेन्नेतराव्यनुदक्षिणम्।
चतुष्पथं नमस्कुर्यात् प्रज्ञातांष्च वनस्पतीन् ॥ ४७ ॥
न व्यालव्याधिताशस्तैर्नादान्तक्षुत्पिपासितै: ॥ ४८ ॥
नातिप्रगेऽतिसायं वा न नभोमध्यगे रवौ।
नासन्निहितपानीयो नातितूर्णं न सन्ततम् ॥ ४९ ॥
न शत्रुणा नाविदितैर्नैको नाधार्मिकै: सह।

शवं (मृत-देहं) दृष्टवा तिरस्कारो न कर्तव्य:। पूज्यानां (गुरूजनानां) प्रशस्त-वस्तूनां (दधि-घृतादि) मंगलचिह्नानां (ध्वजा-शंखचक्रादि) वस्तूनां वामपार्श्वत: निर्गच्छेत् न तु दक्षिणत:। शेष-वस्तूनां दक्षिणत: निर्गच्छेत् न तु वामत:। चत्वरं (यत्र प्रतिष्ठिता: जना: उपविशंन्ति) नमस्कृत्य निर्गच्छेत् नोच्छृंखलतया, प्रज्ञातांश्च वनस्पतीन् नमस्कुर्यांत्। व्यालं (दृष्टं-अवशं) रोगिणं, अप्रशस्तं (अशुभचिह्नयुतं) वृद्धं, बुभुक्षितं, पिपासितं, छिन्नपुच्छं, नैकाक्षं गावं अश्वं च आसह्य न गच्छेत् वा यत्र एते योजिता: ततोऽपि न गच्छेदिति।

नातिप्रगे, नातिसायं, मध्याहे सूर्य आगते च यात्रां न कुर्यात्। यात्रायां पेयजलं सहैव नचेत्।अतिशीध्रं न गन्तव्यं परं विनाशममपि न गन्तव्यम्। शत्रूणा, अपरिचितेन अधार्मिकेन च सह यात्रां न कुर्यात्। एकाकी यात्रां न कुर्यात् इति शास्त्रसम्पतम्।

**अभ्यंगविधि:**

यदि शरीरं स्वस्थं भोजनरुचियुतं च मन: स्यात्तर्हि सुगन्धित वातनाशकतैलेन शरीरे (अभ्यंगं) कर्तव्यम्। अभ्यंगं ऋतु-अनुसारं भवेत् अर्थात् शीतकाले उष्ण-अगर्णादि-तैलेन उष्णकाले शीत-चन्दनादितैलेन अभ्यंगं कर्तव्यम्।

अभ्यंगगुणा:

अभ्यंगं वातनाशकं, अस्थिदृढकारी, मांशपेशीनां शक्तिवर्धकम् अस्ति। अभ्यंगेन सुखपूर्वकं निद्रातुं शक्नुम: अभ्यंगेन शरीरे कार्यशक्तिवर्धनं भवति। अभ्यंगेन ज्वलनं-पीडा, शस्त्रादिघातपीडा, अस्थिभंगनादि-पीडाया: व्यथाशान्ति: भवति। शरीरस्य आलस्यं, श्रम: वृद्धता; अभंगेन नश्यति। रथस्य अक्ष: अभ्यंगेन स्निग्धीमूय अनवरुद्धं चलति तथैव अभ्यंगेन शरीरमपि अनवरुद्धं चलति। यथा चर्म स्नेही द्रवेन दृढ भवति तथैव शरीरमपि दृढं भवति। यथाँ घटं जलेन काठिन्यं प्राप्नोति तथैव अभ्यंगेन शरीरमपि काठिन्यमघिगच्छति।

''व्यायामलक्षणं लाभश्च''

शरीरायासजननं कर्म व्यायाम उच्यते।
लाघवं कर्मसामर्थ्यं दीप्तोऽग्निर्मेदस: क्षय:।
विभक्तघनगात्रत्वं व्यायामादुपजायते।
वातपित्तामयी बालो वृद्धोऽजीर्णीच त त्यजेत ॥ ६३ ॥
अर्धशक्त्या निषेप्यस्तु बलिभि: स्निग्धभोजिमि:।
शातकालेन वसन्ते च मन्दमेव ततोऽन्यदा ॥ ६४ ॥

यया क्रियया शरीरे कष्टानुभूति: भवति सो व्यायाम:। व्यायामेन शरीरे लघुता समायाति कार्योत्साहो च वर्धते। जठराग्नि प्रदीप्तो भवति शरीरे मेदहासस्व जायते। शरीरस्य प्रत्येकांग: पृथक् - पृथक् दृश्यते अर्थात् मांसपेश्य: बलवत्यो भवन्ति।

वातपित्तरोगी बालक:, वृद्ध:, अजीर्णरोगिणा व्यायामो न कर्तव्य:। बलवता पुरूषेण, स्निद्धभोजन कर्त्रा (दुग्धघृतादिभोक्त्रा) शीतकाले (हेमन्त शिशिरर्तौ) वसन्तर्तौ च अर्धशक्त्या व्यायामो कर्तव्य:। यदा उरस: प्राणवायु:नासिकायां समागच्छेत् अर्थात् श्वसनक्रिया शीध्रा भवेत् परं मस्तकोपरि श्वेदाभासो भवेत्चेत् व्यायामसमाप्ति: कर्तव्या। शेषर्तुषु शीतकालात् वसन्ताच्च न्यूनो व्यायाम: कर्तव्य:। व्यायामस्तु सर्वर्तुषु आवश्यक: शीतकाले वसन्ते च अघिखम् अन्यर्तुषु न्यूनोऽपि व्यायाम: कर्तव्य:।

उद्वर्तनं कफहरं मेदस: प्रविलायनम् ॥ ६७ ॥
स्थिरीकरणमंगानां त्वक्प्रसादकरं परम्।

व्यायामान्ते  शरीरोपरि कफनाशकद्रव्यै र्निमितं उद्वर्तनंभ्यंगै कुर्यात्। उद्वर्तनेन शरीरे संचितो मेदः शरीरेव विलीनतां गंच्छति। उद्वर्तनेन शरीरे दृढता समायाति त्वचि च निर्मलतागमः भवति।

दीपनं वृष्यमायुष्यं स्नानमोजोबलप्रदम् ॥ ६८ ॥
कण्डूमलश्रमस्वेदतन्द्रातृड्दाहपाप्मजित्।
उष्णाम्बुनाऽधः कायस्य परिषेको बलावहः ॥ ६९ ॥
तेनैव चोत्तमांगस्य बलहृत्केश चक्षुषाम्।
नानाप्लुत्य शिरः स्नायान्न जलेडल्पे न शीतले ॥ ७० ॥
स्नानोदकावकरण स्वप्नान्नसो न चाचरेत्।
पञ्च पिण्डाननुद्धृत्य न स्नायात्पर वारिणि ॥ ७१ ॥

**स्नानविधि स्नानलाभश्च**

जलेन समपूर्णशरीरस्य क्षालनमेव स्नानं अग्निदिपकं, पुष्टकारकं आयुर्वर्धकञ्चास्ति। स्नानेन ऊर्जाबलयो वृद्धिर्भवति। शरीरस्य मलं, श्रमः, श्वेदगन्धः आलस्यं, पिपासा, ज्वलनं, मलीनता च ज्ञानेन नश्यति। मनःशान्तिश्च प्राप्यते।

ग्रीवाधः उष्णजलेन (साघरणोष्णं) जलेन स्नातव्यम्। इत्थम् स्नानेन बलवृद्धिःप्रजायते। यदि शिरः उष्णजलेव क्षाल्यते चेत् केशानां अक्ष्णोश्च हानिः जायते अतः शिरसि शीतलजलेन ग्रीवाधः उष्णजलेन स्नातव्यम्।

स्नानात् प्राग् शिरःक्षालनं कर्तव्यं सिरःक्षालनात् प्राग् स्नानं न कर्तव्यम्। स्वल्पजलयुते ताडागे न स्नातव्यम्। अतिशीलेजलेनाऽपि स्नानं न कर्तव्यम्। निर्वस्त्रमपि स्नानं न कर्तव्यम् निर्वस्त्रं जलाधिवासोऽपि न कर्तव्यः। कस्यापि शिरोथार्य जलपात्रं, पात्रे जलनिषकासनं,कूयात् जलनिष्कासनं च निर्वस्त्रं न कर्तव्यम्। नग्नशयनमपि न कर्तव्यम्। अन्यंनिर्मित तडागादिषु स्नानात् प्राग् पंचपिंडप्रदानं कर्ेतव्यम्। अर्तात् निर्मालुः गुणमानान्ते तस्य पूजां च कृत्वा ताडागे स्नानं कर्तव्यम्।

''भोजनविधिः''

अन्नपानविधानेन भुञ्जीतान्नं विनात्ययात्।
अभिनन्द्य प्रसन्नात्मा हुत्वा दत्त्वा च शक्तितः ॥ ७६ ॥
पाकं जबलमेकान्ते यथासखमिति ब्रुवन्।
प्रयच्छेत्सर्वमुद्दिश्य पाचयेन्नाममात्मने ॥ ७७ ॥
नान्नमद्यान्मुभूर्षूणां मृतानां दुःखजीविनाम्।
स्त्रीजितक्लीबपतित क्रूरदुष्कृत कारिमाम् ॥ ७८ ॥
गणारिगणिकासत्र घूर्तानां पाणिकं च न ।
नोत्संगे भक्षयेद्भक्ष्यान् जलं नाजलिना पिबेत् ॥ ७९ ॥
सर्वे च तिलसंबद्धं नाद्यादस्तमिते रवौ।
न भुक्तमात्र आयस्येन्न निषिद्धं भजेत्सुखम् ॥ ८० ॥

यद्यावश्यकं कार्य न स्यात्त्चेत् भोजनं सविधि कर्तव्यम्। संक्षेपेण भोजनात् प्राग् भोजनस्तुतिं कृत्वा प्रसन्नचित्तेन भोजनं कर्तव्यम्। भोजनात् प्राग् अग्ने।आहुतिः दातव्या यथाशक्ति मानवेभ्यः अन्यप्राणिभ्यश्च अन्नदानं कर्तव्यम्। भोजनं एकान्ते कर्तव्यम् जलं च समीपे स्थाप्यं अन्यभोज्यपदार्थाऽपि समीपे स्थाप्यांः। इच्छानुगुणं यस्यां स्थितौ आरामः भवेत्तस्यां भोजनं कर्तव्यम्। केवलं स्वात्मनैव अन्नं न पाच्यम् अर्थात् अन्येभ्यंः दातुं शक्नुमः तथा पाच्यम्।

ये मृताः ये च मरणशय्यारूढाः, कृपणाः दीनाः च स्युः तेषामन्नं न भोज्यम्। तथैव स्त्रीभ्यः परस्तानां, नपुंसकानां, चाणडालादीनां, क्रूराणां, पापकर्मणां, कामीमनुष्याणांमपि अन्नग्रहणं न कर्तव्यम्। सामूहिकं, रात्रोः, गणिकायाः, सदावर्तस्य, धूर्तस्य, पाणिकजनानां च अन्न ग्रहणं न कर्तव्यम्। खाद्यवस्तूनि अंके संस्थाप्य भोजनं न कर्तव्यम्, जलं चुलुकेन न पेयं, सूर्यास्तानन्तरं तिलनिर्मितवस्तूनि न भोक्तव्यानि।

भोजनान्ते परिश्रमो न कर्तव्यः परं स्मृत्युक्तानुसारं प्रतिषिद्ध सुखस्य (संभोगादी)क्रिया भोजनान्ते न कर्तव्येत्यर्थः।

## स्वाध्याय:

**१. योग्य विकल्पं चित्ला उत्तराणि ददतु।**

१. कदा उतिष्ठेत्?

(क) सायं-काले (ख) मध्यकाले (ग) रात्रीकाले (घ) ब्राह्ममुहूर्ते

२. ब्राह्म इत्यस्य कोऽर्थः?

(क) कालम् (ख) ब्रह्मा (ग) ब्राह्मण (घ) ज्ञानम्

३. पश्चिमकालः रात्रेः कतमं मुहूर्तमस्ति?

(क) अष्टादशतमं (ख) पञ्चादशतमम् (ग) चतुर्दशत्तमम् (घ) त्रयोदशतमम्

४. कदा मुखनासिकयाः शब्दोच्चारणं न कर्तव्यम्?

(क)भोजनकाले (ख) स्नानकाले (ग) गमनकाले (घ) आचमनकाले

५. दन्तधावनं किमर्थं करणीयम्?

(क) मुखशुद्धयर्थम् (ख) पूजनार्थम् (ग) गमनार्थम् (घ) जलार्थम्

६. आवश्यकसाधनाभावे जीवनयापनं किं भवति?

(क) अनिन्दितम् (ख) दिव्यम् (ग) सुखम् (घ) निन्दितम्

७. रात्रौ किं न भोक्तव्यम्?

(क) दधिः (ख) जलम् (ग) दुग्धः (घ) पयः

**२. एक वाक्येन उत्तरं लिखत।**

१. ब्राह्ममुहूर्तः अर्थात किम्?

२. मलमूत्रस्य स्वाभाविक वेगे किं न कर्तव्यम्?

३. दन्तधावनं कतिवारं कर्तव्यम्?

४. ताम्बूलभक्षणं कदा हितकारी भवति?

५. व्यायामान्ते किं कुर्यात्?

**३. द्वित्रिवाक्येन उत्तरं लिखत।**

१. कुत्र - कुत्र मलत्यागं न कर्तव्यम्?

२. दन्तधावनं कदा कर्तव्यम्?

३. कस्य वृक्षस्य दन्तधावनं कर्तव्यम्?

४. रात्रौ कुत्र कत्र न वसेत्?

५. कस्य पार्श्वतः निर्गच्छेत्?

**४. विस्तरेण उत्तरं लिखथ।**

१. ब्राह्ममुहूर्तस्य वर्णनं कुरूत।

२. निष्क्रमणविधिः लिखत।

३. ताम्बूलभक्षणस्य लाभाः के?

४. दन्तधावनं विषयोपरि व्याख्यां- कुरूत।

●

# १२ रात्रिचर्या

संध्याकालात्यात आरभ्य रात्रिभोजनम् च शयनं यावत् सर्वाणि स्वस्थवृत्त-संबन्धिनी अङ्गानि सन्ति।

**रात्र्याः चन्द्रिका-अन्धकारयोः गुणाः**

ज्योत्स्ना शीता स्मरानान्दप्रदा तृटष्पित्तदाहहृत्।
ततो हीनगुणः कुर्यादवश्यायोऽनिलं कफम्।
तमोभयावहं मोहादिङ्मोह जनकं भवेत्
पित्तहृत्कफहृत्कामवर्धनं क्लमकृच्च तत्॥

भा. प्र. पू. खं ५/२७७-२७८

निशायाः चन्द्रिका शीतला, काम एवं रतेः आनन्दवर्धिनी तृष्णापित्तदाहस्य नाशिनी भवति। निशायाः प्रालेयः(ओस) चन्द्रिकायाः अपेक्षया उपयुक्तैः अल्पगुणैः युक्तः भवति। किन्तु वातकफयोः वृद्धिकारकः। अन्धकारः तु भयदायकः, मोहदायकः, दशादि विषयेषु भ्रमउत्पादकः, पित्तकफयोः शामकः, कामवर्धकः, क्लमकारकः च भवति।

**संध्याकालीनचर्या**

सायंकाले भोजनं, निद्रा, अध्ययनं, मैथुनम् एवं मार्गगमनादिनि कर्माणि वर्ज्यानि सन्ति। यतो हि संध्याकाले भोजनेन अन्नज-व्याधिः, मैथुनात् गर्भविकृतिः, निद्रया दारिद्रय अध्ययानात् वा पठनात् आयुर्हानिः, मार्गमनेन भयोत्पत्तिः च भवति। अतः एतानि पञ्चकर्माणि सदैव त्यक्तव्यानि।

**रात्रिभोजन-विधिः**

रात्रौ च भोजनं कुर्यात् प्रथमप्रहरान्तरे।
किञ्चिदूनं समश्नीयाद् दूर्जरं तत्र वर्जयेत॥

भावप्रकाश पूर्व खण्ड ५/२७९

रात्र्याः प्रथमप्रहरे दिवसस्य अपेक्षया किञ्चित् न्यूनं (लघु) भोजनं कर्तव्यम्। तत्रापि विलम्बेन पच्यमानम् आहारं नैव भोक्तव्यम्।

**शयनविधिः, शयन आसनं च।**

सायं भुक्त्वा लघुहितं समाहित मनाः शुचिः।
शास्तारमनुसंस्मृत्य स्वचर्यां चाथ संविशेत।
देशे सुचावनाकीर्णे द्वित्राप्तपरिचारकः॥
युक्तोपधानं स्वास्तीर्णं विस्तीर्णाविषमं सुखम्।
जानुतुल्यं मृदु शुभं सेवेत शयनासनम्।
प्राग्दक्षिणशिराः पादावकुर्वाणो गुरून् प्रति।
पूर्वापरदिशो भागे धर्ममेवानुचिन्तयन्॥

अ. सं. सू. ३/१२०-१२२

सायंकाले हितकरं लघुआहारं भुत्त्क्वा, शान्तचितेन शुद्धमनसा भगवतः स्मरणं कृत्वा तथा स्वस्य दिन्चर्यां सम्यक् अवलोक्य एव शयनं कर्तव्यम्। शयनस्थानं मुक्तम् उद्घाटितं च भवेत्। निवासस्थाने द्वित्राः विश्वासिनः सेवकाः भवेयुः। उपाधानं समाकारः भवेत् येन मस्तिष्कः स्कन्धयोः समान्तरं भवेत्। शय्या अपि सम्यक् रुपेन बृहती भवेत्। तस्याः उपरि विना विघ्नेन सुखेन शयनं करणीयम् । पर्यङ्कः जानुतः समान्तरः भवेत्। पर्यङ्कः कोमलः, निर्मलः शुद्धः, मङ्गलमयः च भवेत्।

शयनकाले शिरः पूर्वाभिमुखं वा दक्षिणाभिमुखं कुर्यात्। गुरोः पुरतः पादान् न दर्शयेत। यदि गुरुः प्राङ्मुखः स्यात् तर्हि शिरसः दिशा अनुक्षणमेव परिवर्तनीया। रात्र्याः पूर्वं वा अनन्तरं सदैव धर्मस्य एव चिन्तनं करणीयम्।

अनया रीत्या रात्रिचर्यायाः पालनेन दीर्घायुः निरोगिनः च भवितुं शक्यते।

## स्वाध्यायः

**१. योग्यविकल्पं चित्वा प्रश्नस्य उत्तरं लिखत।**

१. ज्योत्स्नायाः गुणः कः अस्ति ?

(क) कफहृत् (ख) पित्तहृत् (ग) वातहृत् (घ) त्रिदोषहृत्

२. संध्याकाले कति कर्माणि वर्जितानि सन्ति ?

(क) ३ (ख) ४ (ग) ५ (घ) ६

३. संध्याकाले न करणीयम् ? अन्यथा दारिद्र्यम् आयाति ?

(क) भोजनम् (ख) निद्रा (ग) अध्ययनं-पठनं (घ) मार्गगमनं

४. संध्याकाले किं करणेन आयुर्हानिः भवति ?

(क) भोजनम् (ख) मैथुनम् (ग) अध्ययनं-पठनं (घ) मार्गगमनं

५. रात्र्याः कस्मिन् प्रहरे भोजनं कर्तव्यम् ?

(क) प्रथमे (ख) द्वितीये (ग) तृतीये (घ) चतुर्थे

६. रात्रिभोजनं कीदृशं भवेत् ?

(क) लघु (ख) गुरुः (ग) मिश्र (घ) विदाहि

७. शयनासनं कियत् उन्नतं भवेत् ?

(क) हस्ततुल्यं (ख) पादतुल्यं (ग) जानुतुल्यं (घ) कटितुल्यम्

**२. एकेन वाक्येन उत्तरं लिखत।**

१. रात्र्याः अन्धकारः दिशाविषये किम् उत्पादयति ?

२. रात्र्याः अन्धकारस्य पित्त-कफयोः उपरि कः प्रभावः ?

३. संध्याकाले मैथुनकरणेन किं प्रभवति ?

४. रात्रौ किं भोजनं वर्जितव्यम् ?

५. शयनकाले शिरः कस्यां दिशि भवेत् ?

६. शयनकाले पादयोः का दिशा भवेत् ?

**३. प्रश्नां लघूतराणिं लिखत।**

१. रात्र्याः चन्द्रिकायाः गुणान् लिखत।

२. संध्याकाले किं किं वर्जितव्यम् ?

३. रात्रिभोजनं विधिं लिखत।

४. शयनासनं कथं भवेत् ?

५. शयनविधिः विवेच्यताम्।

**४. प्रश्नानाम् सविस्तरम् उत्तरं लिखत।**

१. रात्रिचर्यायाः विस्तृतं वर्णनं कुरुत।

●

| १३ | ऋतुचर्या |
|---|---|

**ऋतुचर्यायाः महत्त्वम्**

चर्चा अर्थात् आचरणम्। संपूर्णस्य वर्षस्य विभाजनं षड्षु मागेषु भवति तत्र प्रत्येकः भासयोः ऋतुः इति उच्यते। अतः आहरः विहारः व्यायामः निद्रा-पथ्यम्-अपथ्यम्-ऋतुविचारः अग्निबलम् एतेषां तत्त्वानां विचारविमर्शः ऋतुचर्यायामेव मुख्यः घटकः अस्ति।

आयुर्वेदस्य मुख्यम् उद्देशम् स्वास्थ्यरक्षणं वर्तते। एतस्य उद्देश्यस्य प्राप्त्यर्थं नैकेषु साधनेषु ऋतुचर्याऽपि एकं साधनम् एव। मनुष्यः एतस्य पर्यावरणस्य एव एकः घटकः वर्तते। अतः पर्यावरणे जायमानस्य परिवर्तनस्य प्रभावः मनुष्योपरि अति भवति। पर्यावरणे जायमानं निसर्ग परिवर्तनानुसारं मनुष्यैः स्वीयं शरीरम् स्वीया चर्याम् चापि परिवर्तनीया भवति। अन्यथा शरीरे दोषानां वैषम्येन नैकाः रोगाः उत्पन्नाः भवति।

एतत् परिवर्तनम् अङ्गिकर्तुं तया तस्य स्वकीयजीवने उपादेयता याः कृते ऋतुचर्यायाः ज्ञानम् आवश्यकम् भवति। अतः ऋतुचर्या असमाकं जीवनशैलेः एकं महत्त्वपूर्णम् अङ्गं वर्तते। यस्याः पालनेन व्याधीनां निवृत्ति अतिरिक्त नैकानां रोगाणां व्याधी प्रतिबन्धः तथा व्याधिक्षमत्वं विकसितं भवति। आयुर्वेदे ऋतुचर्यायाः विचारः विस्तारपूर्वकेन सर्वासु संहितासु कृतमस्ति। जीवनशैल्यार्थे एकम् अस्त्यावश्यकम् घटकं वर्तते।

बहुविधाः व्याधयः या सम्प्रति समाजे मदुमेहः इत्यादयः। एतेषां मूलभूतं कारणं क्वचित अनिश्चिता जीवनशैली एव वर्तते। ऋतुचर्या न केवलम् आरोग्य रक्षणार्थम् अपि तु व्याधीनां मूलतया नाशं कर्तुम् एवं तासां चिकित्सायामपि स्वकीयं महत्त्वपूर्णं योगदानं प्रयच्छति।

ऋतुचर्ययाः वर्णनं यत् आयुर्वेदीयसंहितासु उद्धृतम् अस्ति तस्य आधारः पर्यावरणे सूर्य चन्द्राणां गतेः कारणादेव जायमानं परिवर्तनम् अस्ति।

**आदानम् एवं विसर्गकालःच**

आयुर्वेदे संवत्सरानुसारं द्वयोः भागयोः विषये प्रतिपादितम् वर्तते।

१. आदानकालः षण्मासाः

२. निसर्गकालः षण्मासाः

संपूर्णेवर्षे द्वादसमासाः षड्ऋतवः एवं द्वौ अयनौ भवन्ति। अयं कालविभागः सौरमासानुसारं क्रियते। ऋतोः विभाजनं सौरमासानुसारेण एव भवति। अयं भारतः भाग्यवान् वेशः वर्तते। ऋतूणां विविधता अत्रत्यानां मानवानाम् एव सौभाग्यम् अस्तिः अन्यत्र कुत्रापि इतादृशं नास्ति। अर्थात् अत्र वर्षा-शरदः हेमन्तः वसंतः ग्रीष्मादि षड्ऋतवः सन्ति तासाम् कारणेजैव शरीरस्य वातादिदोषोपरि अपि प्रभावः भवतिः।

ऋतूनां जायमानात् परिवर्तनकारणात् शारीरिक दोषेषु अपि वृद्धिः क्षयः इत्यादि परिवर्तनं भवति।

**ऋतुविभाजनम्:**

अष्टांग हृदयानुसारं

''मासैद्विसङ्ख्वैर्मधाद्यः'' क्रमात् षड्ऋतवः स्मृताः।
शिशिरोऽय वसन्तश्च ग्रीष्मो वर्षाः शरद्धिमा॥
शिशिराधास्त्रिभिस्तैस्तु विद्यादयनमुत्तरम्।
आदानं च तदादत्ते नृणां प्रतिदिनं बलम्॥

अ. हृ. ३/१-२

एकस्मिन् संवत्सरे माघ आदि द्वयोः मासयोः क्रमशः षड्ऋतवः भवन्ति यथा-

१. माघः- फाल्गुनः - शिशिरः।

२. चैत्रः- वैशाखः - वसन्तः।

३. जेष्ठः- आषाढः - ग्रीष्मः।

४. श्रावणः- भाद्रपक्षः - वर्षाः।

५. आश्विनः- कार्तिकः - शरदः।

६. मार्गशीर्षः पौषः - हेमन्तः - ऋतुः।

सुश्रुतानुसारं इह तु वर्षाशरदहेमन्तः वसन्तग्रीष्मप्रावृटः षड्ऋतवो भवन्ति। दोषोपचय प्रकोपोवशमनिमित्तं; ते तु भाद्रपद्येन द्विमासिकेन व्याख्याताः; तद्यथा–

भाद्रपदाखयुजां–वर्षा, कार्तिकमाग्रशीषौ शरत्, पौषमाघौ हेमन्तः, फाल्गुनचैत्रौ वसन्तः, वैशाखजेष्ठ ग्रीष्मः आषाढ श्रावणो प्रावृडिति॥ सु. सू. ६/१०

सुश्रुतानुसारं षड् ऋतवः सन्ति। भाद्रपक्षः– आश्विनः वर्षा–कार्तिकः मार्गशीर्षः शरदः पोषः माघः हेमन्तः फाल्गुनचैत्रौ–वसन्तः वैशाखः जेष्ठः ग्रीष्मः अषाढः श्रावणः प्रावृट।

अनेन प्रकारेण ऋतुणां संकल्पनायाम् अष्टांगहृयस्य वाग्भट तथा सुश्रुतसंहितायाः सुश्रुते किञ्चित् भेदः दृश्यते।

**१. आदानकालः**

आदानकालस्य उत्तरायण संज्ञा अपि प्रदत्ता।

''तस्मिन् ह्त्यर्थकीक्ष्णोष्णरूक्षामार्ग स्वभावतः।

आदित्यपवनाः सौम्यान् क्षपयान्ति गुणात् भुवः॥

तिक्तः कषाय–कटुको–बलिनोऽत्र रसाः क्रमात्।

तस्मादा दानमाग्नेयम् ।                    अ.हृ. सू. ३/४

शिशिरः वसन्तः ग्रीष्मः एताः तिस्त्रः ऋतुवः संमिल्य उत्तरायणः आदानकालः वा भवति। आदानकालः अग्निगुण–प्रधान–कालः वर्तते। सूर्यः उत्तरमार्गे प्रति गमनेन तस्य रश्मयः तीक्ष्णाः उष्णाः च भवन्ति। सूर्यस्य उष्णतायां वायुः अपि उष्णं रूक्षं च भवति। अतः उष्णातां प्रतियते। सूर्यः च उष्णवायुः पृथ्वी क्षीयेते। तदर्थम् अस्मिन्काले प्राणिनां शारीरिकबलं क्षीयते।

अस्मिनकाले क्रमशः–

शिशिरऋतौ तिक्तरसः। वसन्तऋतौ कषायरसः। ग्रीष्मऋतौ कटुरसः बलप्रदः भवति। अनेन कारणेन एव अयम् उत्तरायणः अग्निप्रधानम् उच्यते।

**२. विसर्गकालः**

'' ऋतवो दक्षिणायनम्          ॥ ४॥

ऋतवो विसर्गश्च....... ॥''

''सौम्यवादत्र सोमो हि बलवान हीयते रविः॥

मेघवृष्टयजिलैः शीतैः शान्तेतापे महीतले॥

स्निग्धाच्वेदाम्ललवणमधुरा बलिनो रसाः। अ.हृ. सू. ३/५-६

वर्षा–शरदः– हेमन्तः एतासां तिसृणां ऋतूनां संज्ञा दक्षिणायनं कथ्यते। यस्य अपरं नाम विसर्गकालः वर्तते।

अयं सौम्यकालः वर्तते। येन समस्तप्राणिनः बलं प्राप्नुवन्ति। अस्मिनकालं सौम्यगुणधारिणः सोमः सौम्यः बवप्रदः भवति तया सूर्यस्य बलं क्षयं याति।

एतस्मिन्काले मेघस्य छायाप्रदानेन तया वर्षाकालेन वायुः शीतलं वाति अनेन भूतलस्य सन्तापः शान्तः भवति। अतः वर्षाऋतौ स्निग्धगुणयुक्तः आम्लरसः शरदऋतौ लवणरसः, हेमन्तऋतौ मधुररसः बलपदः भवति। तस्माद् कारणात् विसर्गकाले प्राणिनां देहे तथा तेषां बले वर्धनम् भवति। अतदर्थं एव बलस्य विसर्गः संज्ञा भवति। अर्थात् ''विसृजति ददाति बलम् इति विसर्गकालः।''

**दोष-ऋतु-सम्बन्धः**

आयुर्वेदे दोषऋतु–सम्बघः अधोलिखिताधारेण दर्शितः अस्ति।

तत्र वर्षास्वोधय षधयस्त रुप्योऽल्पवीर्याः...।

एवमेव दोषाणां संचय प्रकाप हेतुरुकतः॥                    सू. सू. ६/११

**ऋतूणां पित्तदोषोपरि प्रभावः**

वर्षाऋतौ वनस्पतयः अपरिपक्वाः एवं तरूणाः भवन्ति। तथा तों, बलं (वीर्यं) मृदु भवति। एतस्मिन्काले वर्षायाः कारमेन भूमौ पतितं जलमपि भूम्या सह आगते सति मलिनं भवति। पृथिव्यां सर्वत्र जलशयः भवति। मनुष्य यथा प्राणिनां शरीरमपि वर्षायाः कारणेन क्लिन्नं भवति। जठराग्नै स्तापित्तम् अन्नं समयक्रीत्या अपखत्वा पित्तदोषस्य संचयो शरीरे भवति। तत् पश्चात् आगम्यमाना शरदऋतुः यदा मेघयुक्ता भवति तदा संचितः पित्तः द्रवतां प्राप्य पित्तदोषप्रकापः भवति। तेन नैकाः पित्तजन्यव्याघयः भवन्ति।

**ऋतुणां कफदोषोपरि प्रभावः**

हेमन्तऋतौ सृष्टौ शैत्यं भवति। कालस्य परिणामेन तथा च एतस्यां ऋतौ जलमपि शुद्धं भवति। वनस्पतिः अपि परिपक्वता एवमेय पूर्णवीर्या भवति।

सूर्यस्य किरणाः विसर्गकाले अत्यन्तं मन्दाः भवन्ति । शीतलवायुः वहति । आहारणीयः औषधयः सन्ति ताः सर्वाः वीर्यसम्पन्नाः भवन्ति । तेषां सेवनेन एतस्या ऋतौ कफदोषस्य शरीरे संचयः भवति ।

तवनन्तरं वसन्तऋतौ यदा सूर्यस्य किरणाः प्रखराः भवन्ति । येन कारणेन हेमन्तऋतौ कफदोषः वसन्तेयदा प्रखर सूर्य किरणैः विलयेन कारणेन कफदोषस्य प्रकोपः शरीरे भवति । परिणामतः नैकाः कफव्याधयः एतस्यां ऋतौ उत्पद्यन्ते ।

**ऋतूणां वातदोषोपरि प्रभावः**

ग्रीष्मऋतौ वनस्पतयः औषधयः च निर्वीर्याः उत मन्दवीर्याः भवन्ति । तथा सृष्टौ–जले–औषधीषु आहारे – द्रव्ये च रुक्षत्वं निर्माणं भवति ।

सूर्यस्य तीव्र किरणैः समस्तसृष्टिः एवं मनुष्याणां शरीरमपि रुक्षं भवति । तस्मात् कारणात् शरीरे वातदोषस्य संचयो जायते । तदनन्तरम् आगम्यमानायां प्रावृट्ऋतौ यदा पृथ्वी वर्षाकारणेन स्वच्छा भवति तेन शांतगुणः सृष्टौ वर्धते । शांतवायुः वहति। परिणामतः इदं शैत्यं वातदोषस्य वर्धनं शरीरे कारयति । ततः शरीरे अनेकप्रकाराणां वातव्याधयः एतस्यां ऋतौ दृश्यन्ते–प्राप्यन्ते च।

त्रयाणां दोषाणां (वात–पित्त–कफ) चयप्रकोपशमन विषये वाग्भटं कथयति यत्–

चयप्रकोपप्रशमा वायौग्रीष्मादिषुत्रिषु ।

वर्षादिषु तु पित्तस्य श्लेष्मः शिशिसदिषु ।

अ.ह.१२/२४

अर्थात् कालस्वभावानुसारेण वातादयाः

दोषाणां प्रकोपस्य एवं प्रशमनस्य स्थितिः अधोलिखिता अस्ति ।

१. ग्रीष्मऋतौ वातदोषस्य प्रकोपः वर्षाऋतौ प्रकोपः तथा शरदऋतौ प्रशमनः भवति ।

२. वर्षाऋतौ पित्तदोषस्य चय, शरदऋतौ प्रकोप तथा हेमन्तऋतौ प्रशमनं भवति ।

३. शिशिरऋतौ (सुश्रुतानु सारं हेमन्तऋतौ) कफदोषस्य चय, वसन्तऋतौ प्रकोपः तथा ग्रीष्मऋतौ प्रशमनं भवति ।

सुश्रुतानुसारं – तत्र पैत्तिकानां व्याधीनामुपशमो हेमन्ते श्लैष्मिकाणां – निदाधे वातिकानां शरदि स्वभावत एव एते संचयप्रकोपप्रशमा व्याख्याताः ।

सू/सू/६/१३

| | चयः | प्रकोपः | प्रशमः |
|---|---|---|---|
| (१.) वातदोषः | ग्रीष्मः | वर्षा | शरदः |
| (२.) पित्तदोषः | वर्षा | शरदः | हेमन्तः |
| (३.) कफदोषः | शिशिरः | वसन्तः | ग्रीष्मः |

**अग्निबल–ऋतु सम्बधः**

ऋतूणां प्रभावः न केवलं सृष्टौ अपि तु पर्यावरण अपि जायते । एवं समानरुपेण मनुष्यप्राणिनामुपरि अपि अवश्यमेव भवति।

अतः सर्वेषां मनुष्याणां शरीरे तथा शरीरस्य सर्वेषु भागेषु भवति । अर्थात् शरीर दोषोपरि अपि ऋत्वनुसारम अवश्यमेव परिवर्तते । विशेषरुपेण मनुष्यणां शरीरे यः जठराग्निः वा पाचकाग्निः अस्ति तत्र ऋतुणां परिवर्तनेन विविधप्रकारकं स्थित्यान्तरां दृश्यते ।

**१. हेमन्तऋतौ अग्निबलसम्बन्धः ।**

शीते शीता निलस्पर्शसंरुद्धो बलिनां बलि ।

पक्ता भवति हेमन्तो मात्रा द्रव्यगुण क्षमः ॥

च/सू/६/९

हेमन्तऋतौ शीतलतायाः आधिक्येन तथा शितलवायोः स्पर्शेण आभ्यन्तराग्नेः अवरोधेन स्वस्थमनुष्याणां शरीरे जठराग्निः प्रबलः भूत्वा मात्रा तथा द्रव्ये गुरु आहारं–पाचनक्रियायां समर्थः भवति ।

**२. शिशिरऋतौ अग्निबल सम्बन्धः**

हेमन्तशिशिरौतुल्यौ शिशिरेऽल्यं विशेषणम् ।

तस्मादहैमान्तिकः सर्वः शिशिरेविधिरिष्यते ॥

च/सू/6–१९-२०

सामान्यरुपेण हेमन्ते एवं शिशिरे द्वयोः ऋतयोः अग्निः समानः भवति । शिशिरे काश्चन विशेषताः भवन्ति । अतः शिशिरे अग्निवृद्धिः अग्नेः स्थितिः हेमन्त इव भवति ।

**३. वसन्तऋतौ–अग्निबलसम्बन्धः ।**

वसन्ते निचितः श्लेष्मा दिनकृदभाभिरीरितः ।

कायाग्नि बाधते रोगांस्ततः प्रकुरुते बहून ॥

च/सू/६/२२

हेमन्तऋतौ सञ्चितः वसन्तऋतौ सूर्यस्य किरणैः (द्रवीभूत) भूत्वा जठराग्निः मन्दः भवति । अतः वसन्ते अग्निबलं मन्दं भवति ।

**४. ग्रीष्मऋतौ अग्निबल सम्बन्धः**

शिशिरः वसन्तः ग्रीष्मश्च आदानकालः ।

आदानकालस्य अन्तिम ऋतु ग्रीष्मः भवति । अतः शारीरिकबल स्थितिः जडा भवति अथवा हीना दुर्बला च भवति । अतः परिणामस्वरुप ग्रीष्मऋतौ जठराग्निः दुर्बला भवति ।

**५. वर्षाऋतौ अग्निबल सम्बन्धः**

आदान दुर्बल देहे पक्ता भवति, दुर्बलः ।

स वर्षा स्वनिलादीनां दूषणैर्बाध्यते पुनः ॥

च/सू/६/३३

एषा अस्य विसर्गकालस्य प्रथमाऋतुः अस्ति । तथापि ततः पूर्वं चः आदानकालः भवति तदानी मनुष्याणां शरीरं दुर्बलं भवति। दुर्बलेशरीरे इषत वादाति दोषात् जठराग्नि अपि दुर्बला भवति ।

**६. शरदऋतुः अग्निबलसम्बन्धः**

वर्षाशीतीचिताङ्गानां सहवैवार्क रश्मिभिः ।

तप्तानामाचितं पित्तं प्रायः शरदि कुप्यति ।

पित्तप्रशमनं सेव्यं मात्रया सुप्रकांक्षिते ।

च/सू/६/४२

वर्षाऋतौ येषां मनुष्याणां शरीराणि शीतलानि भवन्ति तादृशाणां सहसा सूर्यस्य किरणैः शरीराणि तप्यन्ते । परिणामतः वर्षाऋतौ सञ्चितपितः शरदऋतौ प्रकृपितः भवति । अतः एतस्यां ऋतौ समेषां जठराग्निः मन्दः भवति ।

**ऋतुपथ्यापथ्याहारः**

**१. हेमन्तऋतु**

**पथ्यआहारः** एतस्यां ऋतौ जठराग्निः बलवान भवति अतः गुरुआहार पकतुं समर्थः भवन्ति जनाः अतः स्निग्धपदार्थ आम्ललवणरसः च मधु मेदयुक्तपदार्थाः भक्षणियाः । तथा दुग्धस्य विकारणं उत्पन्नः आहारः इक्षु वसा तिल, नवधान्यं तथा च उष्णोदकं सेवनीयम् । एवं च धृतयुक्ताः पदार्थाः पच्यकराः भवन्ति ।

**अपथ्याहारः**

- वातवर्धक तथा (सूक्ष्म) लघु आहारः ।
- तीव्रवायुः
- प्रमिताहारः
- जलेन आलितं द्रव्यम् ।

**२. शिशिरऋतु**

**पथ्याहार:** प्राय: हेमन्तशिशिरऋतौ समानं भवति । स्निग्धपदार्थ: आम्लरस: लवणरस: मधुआदय: हेमन्तऋतौ उल्लेखिता: पदार्था: सेवनीया: ।

**अपथ्याहार :**

- कटु – तिक्त – कषायरस: ।
- वातवर्धक पदार्थ: ।
- लघु तथा शीतलम् अन्नपानम् ।

**३. वसन्तऋतु**

**पथ्याहार:**

- जवगोधूमस्यपदार्था:
- मधुनिर्मित पदार्थानां सेवनम्
- मित्रपरिवारेयसह आम्ररसपानम् ।
- दोषरहित आसव:- अरिष्ट:
- मधुमिश्रितजलम् ।
- चन्दनस्य जलम् ।

**अपथ्याहार:**

- गुरुआहार: (विलम्बेन पक्वं भवति तादृश: आहर:)
- शीतलपदार्थ:
- स्निग्धपदार्थ:
- आम्ल–मधुर रसप्रधानपदार्थ: ।
- गुरुआहार: (अतिविलम्बेन पच्यमानम् अन्नम्।
- शीतलपदार्थ:
- आम्ल–मधुररसप्रधान: पदार्थ:

**४. ग्रीष्मऋतौ**

**पथ्यकर:**

- मधुररसयुक्त: पदार्थ:
- द्रव्ययुक्त: तथा स्निग्धम् अन्नपानम् ।
- शर्करायुक्तंशीतलम्अन्नम् ।
- वनप्राधान्य भोजनरसादय: ।
- घृतं–दुग्धं च ।
- शालि तण्डुल: ।
- लघु अन्नपदार्थ: ।
- मधुर–आम्लरसयुक्त: पेयद्रव्यम् ।

**अपथ्यकार:**

- लवणरसयुक्तद्रव्यम् ।
- कटुरसयुक्तद्रव्यम् ।
- उष्णोदक: ।
- आम्लरसयुक्तद्रव्यम् ।

**५. वर्षाऋतु**

**पथ्याहारः**

- उष्णजलानन्तरं शीतलीकृतं जलम् ।
- आम्ल-लवण रसप्रधानयुक्तः द्रव्यम् ।
- स्निग्धद्रव्यम् ।
- गोधुमः जवः ओदनम् ।
- त्रिदोषनाशकाहारः ।
- कूपजलम् ।
- वर्षाजलम् ।
- वातादिदोषशमनकारकः सामन्याहारः ।
- जठराग्निवर्धकाहारः ।
- सिन्धवः मुकादयः ।

**अपथ्याहारः**

- नद्याः जलम् ।
- उदमन्थः ।
- आतपसेवनम् ।

**६. शरदऋतु**

**पथ्याहारः**

- मधुररसात्मकपदार्थः
- कषायरसात्मकपदार्थः
- तिक्तरसात्मकपदार्थाः एवं पित्तशामक-अन्नपानम् ।
- ओदनम् - गोधूमः मुद्गः मधुरादयः ।
- हंसोदकम् ।

**अपथ्यहारः**

- आतपसेवनम् ।
- तैलम् ।
- क्षारयुक्तद्रव्यम् ।
- दधि
- अनावश्यक भोजनम् ।
- तीक्ष्णः मधुः ।
- पूर्वीवायुः

**ऋतुसंधिः**

ऋत्वोरन्त्यादि सप्ताहावृतुसन्धिरिति स्मृतः
तत्र पूर्वो विधिस्त्याज्यः सेवनीयोऽपरः क्रमात् ।
असात्म्यजा हि रोगाः स्युः सहसा त्यागशीलनात् ।
वा.सू. ३

ऋतुसंधिः इयं सङ्कल्पना ऋतुभिः सह सम्बन्धः वर्तते । द्वयोः ऋत्योः मेलनं ऋतुसन्धिरुच्यते । प्रथमायाः ऋतोः अन्तिमः सप्ताहः एवम् आगम्यमानायाः ऋतोः प्रथमसप्ताहः अर्थात् पञ्चदशदिनानां दिनां ऋतुसन्धिरुच्यते ।

एतस्मिन क्रमशः प्रथमम् ऋतुचर्यां विहाय अपरायाः ऋतन्वर्यायाः अभ्यासः प्रारम्भः कर्तव्यः । यदि कश्चन प्रथमां ऋतु त्यकत्वा अपरां ऋतुम् अङ्गी-कुर्वन्ति चेत, असात्म्यजन्यः रोगः उच्यते । नियमानुसारं द्वयोः मासयोः प्रथममासस्य पदार्थान् विहाय अपरमासस्य पदार्थ खादामः चेत् बहु कष्टप्रदं भवति । एतादृशं भोजनं मानवस्यकृते अनुकूलं नैव भवति । अतः स्वास्थ्यरक्षणार्थं ऋत्वानुसारं भोजनम् आवश्यकम् अस्ति तथा च विकाराणां निवारणाय अपि ऋतुसंधिविचारः महत्त्वपूर्णं वर्तते ।

**यमदंष्ट्राः**

यमदंष्ट्रा एकया ऋतुचर्यया सह संबंधितः सिद्धान्तःवर्तते । अस्य सिद्धान्तस्य कर्ता आयुर्वेदस्य शार्ङगधरसंहितायाः मूलकर्ता शार्ङ्गधरः अस्ति ।

कार्तिकस्य दिनान्यष्टाग्रयणस्य च ।

समाख्याता स्वल्पभुक्तो हि जीवति ॥

शा.. सं. पू. 2/30

कार्तिकमासस्य अन्तिमेषु अष्टदिनेषु एवं मार्गशीर्षमासस्य आरम्भस्य अष्टदिनानि यमदंष्ट्रा उच्यन्ते । अस्मिन्काले यः स्वल्पं भाजनं करोति सः सुखी भवति अर्थात् निरोगी भवति ।

**हेमंतादि ऋतौ विशिष्टचर्याः**

**हेमन्तऋतुचर्याः**

मनुष्यः हेमन्तऋतौ कालस्वभावात् बलवान भवति तस्य जठराग्नि अपि प्रबला भवति । हेमन्तऋतौ रात्रिकालः सुदीर्घः भवति अतः उत्थाय प्रातःकाले बुभुक्षा भवति अतः अस्मिन् काले प्रातः समयानुगुणं शीघ्र उत्थाय शौचविधि अनन्तरं मधुर-आम्ल-लवणरसयुक्तः पदार्थः यथोक्तः सेवनीयः । प्रतिदिनं वातनाशक तैलेन मर्दनं करणीयम् । मल्लविद्या पारंगतेन सह मल्लं करणीयम् । अन्यथा व्यायामः करणीयः । अभ्यंगतेलात स्निग्धता दूरी-करणार्थं सुगंधीद्रव्येषु उद्वर्तनं करणीयम् । पश्चात् विधिपूर्वकस्नानं करणीयम् । तदनन्तरं भोजनं करणीयः । भोजनेषु मधुरः स्निग्धः बलप्रदः नवधान्ययुक्तपदार्थाः सेवनीयाः ।

सामान्यउष्म जलेन स्नानादि क्रिया करणीया । यत्र शीतलवायु न आगच्छेत तादृशं गर्भगृहे निवासः करणीयम् ।

**शिशिरऋतुचर्या**

हेमन्ते प्रोक्त विधिनां सेवनं शिशिरे अपि करणीयम् । हेमन्तऋतोः अपेक्षया शिशिरऋतौ रुक्षता अधिका भवति । हेमन्ते संञ्चितः कफदोषस्य वसन्ते विलयः भवति । अतः तीक्ष्ण तथा रुक्षऔषधीनां सेवनं करणीयम् । भोजनं किग्चित मात्रायां भवेत्। व्यायामः समावरेत् सुगंधीद्रव्याणां लेपः करणीयः । वनोषधीनां भोजने उपयोगः करणीयः अपथ्य-स्निग्ध-मधुरादि पदार्थानां सेवनं न करणीयम् । मित्रैः सह शीतल-सुगन्धितः - जलप्रवाहयुक्तः रम्यस्थाने वाटिकायां- उद्यानं वा मध्याहनकाले गन्तव्यम् ।

**ग्रीष्मऋतुचर्या**

सूर्यस्य आतपात पृथ्व्यां जलतत्त्वं शोषयति । येन शरीरस्थित जलतत्त्वम् अपि क्षयः भवति । अस्मिन् समये वातदोषस्य वृद्धि भवति । अतः एतस्याम् ऋतौ लवण-कटु-आम्लरसप्रधानद्रव्याः तथा च व्यायामः एवम् आतपः न सेवनीयः ।

सुपथ्य मधुर - स्निग्ध - शीलत पदार्थानां सेवनं करणीयम् । शालिताण्डुलं, रागः रसयुक्तपदार्थानां सेवनं करणीयम्, रात्रौ चन्द्र धारा शीतलीकृत दुग्धस्य पानं करणीयम् । मध्यायने वृक्षतले वा शीतलछायासु विरामः करणीयः । रात्रौ तथा च शीतलतायुक्तस्थाने निवासं करणीयम् ।

**वर्षाऋतुचर्या**

आदानकालस्य प्रभावात् दुर्बलशरीरे जठराग्निः दुर्बला भवति । आम्लविपाकी जल तथा आहरेण, अशुद्धजलेन शीतलवायोः मेघस्याच्छादनेन पित्त संचयं भूत्वा जठराग्निः मन्दा भवति । एतादृशि स्थितौ साधारण आहार-विहार वातादि दोषाणां शमनकारकः स्यात् तथा च जठराग्निवर्धकः स्यात् तस्य सेवनं करणीयम् । एतास्याम् ऋतौ शोधनक्रियया शरीरगत संचितदोषाणाम् अन्वेषणं कर्तव्यम्, पूर्वे भाक्षित भोजनं पाचनाय पूरातनं जय-गोधूमः मुदगः आदि द्रव्याणां सेवनं कर्तव्यम् माहिन्दजलस्य सेवनं करणीयम्। सुगंधीत धूपयुक्तः वस्त्रं धारणीयम् । नधाः जलं न पिबेत् । दिने शयनं न करणीयम् । अधिक परिश्रम तथा आतपस्य सेवनं न करणीयम् ।

**शरदऋतुचर्या**

वर्षाऋतोः शितलतायाः कारणेन मानव शरीरे क्रमशः पित्तस्य संचयः भवति । शरदऋतोः आगमनेन सहसा सूर्यातपेन शरीरे वर्षाकाले संचितः पित्तः कुपितः भवतिः । अतः एतस्याम् ऋतौ शरीरे पित्तजनित - विकाराः न भवेत् अतः विरेचन सदृशं शोधनं रक्तमोक्षणादि कर्तव्यम् ।

एतस्मिन् ऋतौ आहारकाले तिक्तः मधुरः कषायः रसप्रधानद्रव्याणाम् अल्पमात्रायां सेवनं करणीयम् । शालिताण्डुल, मुदगः मिश्री, मधुः इत्यादयः सेवनीयः । स्वच्छवस्त्रं धृत्वा शांत-शीतल स्थले रात्रौ उपवेष्टव्यः । संपूर्णं भोजनं आरयुक्तपदार्थानां युक्तः सेवनं, दधि, तैल, तीक्ष्णमघु दिने शयनं तथा पूर्वावायो सेवनं न करणीयम् ।

## स्वाध्यायः

**१. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

१. आयुर्वेद संवत्सरः कति विभागेषु विभक्तः ?
(क) २ (ख) ३ (ग) ४ (घ) १

२. शिशिरः वसन्तः ग्रीष्मः ऋतौ संमिल्य का संज्ञा भवति ?
(क) आदानकालः (ख) विसर्गकालः (ग) संधीकालः (घ) यमदंष्ट्रा

३. आदानकाले सृष्टि उपरि कस्य प्रभावः भवति ?
(क) सोम (ख) अग्नि (ग) सोम-अग्नि (घ) चन्द्रमा

४. वर्षा-शरद-हेमन्त संमिल्य का संज्ञा भवति ?
(क) विसर्गकालः (ख) उत्तरायणः (ग) संधीकालः (घ) यमदंष्टा

५. उत्तरायणः निम्नलिखितेषु कस्य द्वितीयः नाम वर्तते ?
(क) आदानकालः (ख) विसर्गकालः (ग) संधीकालः (घ) ऋतुसंधी

६. अधोलिखीतेषु दक्षिणायनः कस्य द्वितीयः नाम वर्तते ?
(क) विसर्गकालः (ख) आदानकालः (ग) यमदंष्ट्रा (घ) पूर्णकालः

७. विसर्गकाले सृष्टौ कस्य प्रभावः भवति ?
(क) सोमः (ख) अग्नि (ग) अग्नि-सोम (घ) सूर्यः

**२. संक्षेपेण उत्तराणि प्रयच्छत ।**

१. ऋतुसंघिं वर्णयत ।
२. हेमन्तऋतौ पथ्यकरः - अपथ्यकरः आहारविषये ज्ञापयत ।
३. ग्रीष्मऋतौ पथ्यकरः - अपथ्यकरः: आहारविषये लिखत ।
४. वर्षाऋतौ पथ्यकरः - अपथ्यकरः: आहारविषये लिखत ।

**३. एकेनवाक्येन उत्तरत ।**

१. आदानकाले समाविष्टा ऋतु विषये लिखत ।
२. विसर्गकाले समागता ऋतु विषये ज्ञापयत ।
३. वात्दोषस्य चय-प्रकोपप्रशम कस्मिन् ऋतौ भवति ?
४. कफदोषस्य चयप्रकोपप्रशमस्य ऋतौ लिखत ।
५. पित्तदोषस्य चयप्रकोपप्रशमस्य ऋतौ ज्ञापयत ।
६. वात-पित्त-कफदोषस्य चयकालः लिखत ।
७. वात-पित्त-कफदोषस्य प्रकोपकालः लिखत ।

**४. प्रश्नोत्तराणि सविस्तरं लिखत ।**

१. आदानकालः विसर्गकालः च विषये टिप्पणी लेख्या ।
२. को अपि द्वौ ऋतोः ऋतुचर्यां सविस्तारं ज्ञापयत । क्योरपि ह्योः ऋत्वोः विषये.
३. ऋतुअग्निबलसंबन्ध - विषये सविस्तारं लिखत ।
४. दोषऋतुसम्बन्धविषये वेदयत ।

**५. उचितं मेलनं कुरुत ।**

| (अ) | (ब) |
|---|---|
| १. वातचयः | शिशिरः |
| २. पित्तचयः | वर्षा (प्रावृट्) |
| ३. कफचयः | ग्रीष्मः |
| ४. वात प्रकोपः | वसन्तः |
| ५. पित्त प्रकोपः | शरदः |
| ६. कफ प्रकोपः | वर्षा |

# १४ सद्वृत्तम्

**सद्वृत्तवर्णनम् :-**

सद्वृत्तस्य सेवनेन मानवः द्वौ लाभौ प्राप्नोति।

(१) आरोग्यता

(२) इन्दियजयः

यथाः - गौः बाह्मणः गुरुः (कुलगुरुः) वृद्धः (ज्ञानवृद्धः, विद्यावृद्धः, वयोवृद्धः) सिद्धः (तपस्वी) तथा आचार्यः (विविधविषयानां ज्ञाता) एतेषां पूजनं कुर्यात्। अग्नेः उपासना (अग्निहोत्रादिभिः) क्रियताम्। औषद्धिः धारयेत्। उभयोः कालयोः (प्रातः सायम्) स्नानं कर्तव्यम्। शरीरस्य मलिनानि अङ्गानि स्वच्छानि कर्तव्यानि। प्रत्येकं पक्षे त्रिवारं अर्थात् पञ्च-पञ्चदिवसे केशश्मश्रुनखानां कर्तनं कर्तव्यम्। प्रतिदिनं परिमार्जितवस्त्राणां धारणं कर्तव्यम्। अजीर्णवस्त्राणां धारणं न कर्तव्यम्। प्रसन्नचितेन भवितव्यम्। सुगन्धितद्रव्याणाम् अनुलेपनं करणीयम्। सज्जनानां सदृशं वेशं धरेत्। केशानां सम्यक् सज्जतां कुर्यात्। शिरसि कर्णयोः नासिकायां च तैलस्य प्रयोगः सम्यक कर्तव्यव्यः। धूम्रपानं सर्वथा न कर्तव्यम्। प्रथमम् अन्यः वदेत् पश्चात् अहं वदिष्यामि इति विचारं त्यक्त्वा प्रथमं स्वयमेव वक्तव्यम्।

**सद्वृत्तपालकः** निम्नप्रदतैः गुणैः युक्तः भवेत्।

- दुर्गतौ स्थितस्य मानवस्य रक्षणकर्ता।
- सोमयज्ञादीनां कर्ता।
- दाता।
- मार्गचतुष्टये प्रणाम कुर्यात्।
- काकादिभ्यः बलिं दद्यात्
- अतिथीनां सत्कारकः।
- पितृणां श्रादधकर्ता।
- हितं परहितं च सम्यक जानीयात्।
- स्वात्मनः इन्दियाणाञ्च नियन्ता।
- धर्माचारी
- चिन्ता-भयरहितः।
- लज्जाशीलः ।
- बुद्धिमान्।
- उत्साहशीलः।
- कुशलः।
- क्षमावान्।
- धर्मेषु श्रद्धावान्।
- आस्तिकः।
- सदाचारस्योपासकः।
- दण्डछत्रसूत्रादीनां धारकः।
- पुरतः चतुर्हस्त-परिमितम् अन्तरं स्थापयित्वा याति।

– सदा मङ्गलाचारी।

– रागद्वेषाणां नाशक:।

– क्रोधत्यागी:।

– सद्वृत–मानवेन इत्यादिभि: गुणै: युक्तेन भवितव्यम्।

**सद्वृत्तानुसारं भोजनविधि: –**

– शरीरस्य कृते लाभप्रदम् आरोग्यप्रदं च भवति तादृशं भोजनं कुर्यात्। अत्र भोजनविधे: कृत्याकृत्यं वर्णितम् वर्तते।

– हस्ते रत्नं न धरेत्।

– अशुद्धवस्त्राणि न धारणीयानि।

– विना स्नानेन भोजनं न कर्तव्यम्।

– संध्योपासनया विना न भोक्तव्यम्।

– देवानां कृते होम: कर्तव्य:।

– पितरौ भोजयित्वैव भोक्तव्यम्।

– अतिथिन्, गुरुन्, आश्रितान् च भोजयेत् ।

– सुगन्धितपदार्थानां धारणं कर्तव्यम्।

– माला धारणीया।

– हस्त–पाद–मुखादि प्रक्षालनं कर्तव्यम्।

– मुखशुद्धि: कर्तव्या।

– चितं स्थिरं कृत्वा खादितव्यम्। उत्तरदिशि मुखं कृत्वा।

– भोजनं प्रति उदासीन: भवेत्।

– अभक्त: (नास्तिक:) न भवेत्।

– अपवित्रेषु पात्रेषु न भोक्तव्यम्।

– अनुचितस्थानेषु न भोजनीयम्।

– अग्नये दत्त्वा भोक्तव्यम्।

– जलस्य प्रोञ्छनं कृत्वा मन्त्रै: अभिमन्त्रितं कृत्वा भोक्तव्यम्।

– निन्दा त्याज्या।

– प्रतिकुलात् पुरूषात् भोजनं न स्वीकरणीयम्।

उपर्युक्तानां नियमानां पालनम् अनिवार्यतया कर्तव्यमेव। अनेन विना भोजनं सर्वर्था निषिद्धम्।

– आद्रकं शुष्कव्यञ्जनानि आदि भक्ष्य पदार्थान् विहाय पर्युषितपदार्थानां सेवनं न कर्तव्यम्। दधि मधु लवणम्, सत्तु, घृतम्, इत्यादि भोज्यपदार्थान् विहाय अन्यत् किमपि स्थालिकायां त्यक्तव्यम्। रात्रौ दधि न खादनीयम्। भोजनात् परं मध्ये

– मध्ये जलं न पीत्वा दन्तेन कर्तयित्वा सतो: सेवनं कर्तव्यम्।

**सदवृत्तानुसारं मलत्यागस्य विधि:**

मलत्याग: अत्यावश्यक: वर्तते। सर्वकार्याणि त्यक्त्वा मलत्यागं कुर्वन्तु। न भोजनं कुर्वन्तु, न शयनं प्रथमं मलत्यागं कुर्वन्तु। वायु:, अग्नि:, सलिलं (जलम्) चन्द्रमा, सूर्य:, ब्राह्मण:, गुरु:, एतान् प्रति न कदापि ष्ठीवनम् कर्तव्यम्। अग्रे नत्वा कदापि छिक्का अपानवायो: त्याग: च न कर्तव्य:, मार्गे पशुनां इव मूत्र – त्याग: न कर्तव्य:। यत्र बहुजना: वसन्ति वा सन्ति तत्रापि मूत्र – त्याग: न कर्तव्य:। भोजने, जपे, होमे अध्ययने, पूजायाम् मांगलिककार्येषु च ष्ठीवनं सर्वथा निषिद्धम् अस्ति।

**सद्वृत्तानुसारं पूज्यजनानां समादरः**

सत्पुरूषाणां तथा गुरुजनानां (पित्रोः गुरूणां च निन्दा न कर्तव्या। अपवित्रस्थितौ अभिचारकर्म मारणम्, मोहनम् उच्चाटनम् वश्यम् आदि चैत्य (ग्रामस्य एवं नगरस्य महान वृक्षः) पूज्यानां (पूजा एवं उपासना योग्य जनानां) पूजनं तथा वेदादीनां स्वाध्यायः वा अध्ययनादीनि शुभकर्माणि न कर्तव्यानि।

**व्यक्तयः**

सज्जनस्य गुरोः च निन्दा न करणीया अस्य समर्थनार्थं मनुः कथयति यत् -

स्वयं तु निन्दां न कुर्वन्तु अपि तु अन्यस्य मुखेनापि न श्रुण्वन्तु ।

**सद्वृत्तानुसारम् अध्ययननिषेध :-**

अकाले, आकाशे विद्युतां प्रभावसमये, अग्नेः प्रज्वलने, भूकंपस्य आगमने, बृहदुउत्सवानाम् आगमने, उल्कापाते,ग्रहणे, अमावस्याः दिने, प्रातः, सायं, संध्यायाः समये, गुरुमुखात् उपदेशं विना अध्ययनं न करणीयम्। हीनवर्णयुक्तवाक्यस्य, अत्यधिकवर्णमात्रायुक्तवाक्यस्य च उच्चारणं न करणीयम्। कठोरस्वरः, विस्वरः (स्वरहीनः), अनावस्थितं पदं अत्यधिकं शीघ्रेण अध्ययनस्य अभ्यासः करणीयः।

**सद्वृत्तानुसारं व्यावहारिकं क्षेत्रम् :-**

अधिकः समयः (अनेकेषां बुद्धिमतां पुरूषाणां सम्मतौ निर्धारीतनियमस्य) त्यागः न करणीयः। शास्त्रस्य लोकमर्यादायाः नियमानां भङ्गा न कार्यः। रात्रौ भ्रमणं न कर्तव्यम्। अपरिचितस्थाने विहारः न कर्तव्यः। सन्ध्याकाले (भोजनम्)अध्ययनम् स्त्रीसहवासः शयनं च न करणीयम्। बालकः वृद्धः, लोभी, मूर्खः, कलेशयुक्तजना तथा नपुंसक एतैः सह मित्रता न करणीया। मद्यपानं द्यूतक्रीडां तथा वैश्यागमस्य इच्छा न कर्तव्या। कस्यापि गुप्तवार्तानां व्याख्यानं न करणीयम्। कस्यापि अपमानं न करणीयम्। अभिमानं न कर्तव्यम्। कार्यकौशल्यं प्राप्तव्यम्। ब्राह्मणानां निन्दा न कर्तव्या। धेनु दण्डेन न ताडनीया तासी आक्षेपेण अपमानं न करणीयम्। (१) बान्धवानां तथा वृद्धगुरुराज्ञां च निन्दा न कर्तव्या। (२) स्वजनाः स्नेहिजनाः बान्धवाः तथा गुप्तवार्ताज्ञातारीनाश्च ज्ञातादीकानां जनैः सह सम्बन्घ न विच्छेदनीयः।

**मानसिकव्यवहारे सद्वृत्तम् :**

धैर्यरहितेन न भवितव्यम्। उद्धतस्वभायुक्तेन न भवितव्यम्। स्वानुचरेषु समये भृतदात्रा भवितव्यम्। स्वजनेषु विश्वासः करणीयः, सर्वेषां सुस्वस्थकामना कर्तव्या। अन्येभ्यः दुःखकारी न भवितव्यम्। सर्वेषाम् उपरि विश्वासः न कर्तव्यः। सर्वेषां शङ्का न करणीया। सदैव विचारावगहने भ्रमणीयम्।

**सामान्यकार्यक्षेत्रे सदवृतः :-**

यस्य कार्याय यः कालः निश्चितः तस्य अतिक्रमणं न करणीयम्। अपरीक्षितं कार्यं प्रति मनोयोगः न कार्यः अन्यथा मनः चञ्चलं भवति, अधिकं दीर्घसूत्री नैव भवतु। क्रोधहर्षयोः प्रभावे किमपि कार्यं न कर्तव्यम्। अधिककालपर्यन्तं शोकस्थितौ न स्थातव्यं, सफलतायम्, अधिकोत्सुक्ता कार्यस्य विकलतायां अधिकं दुःखी नैव भवतु। प्रकृत्यानुसारं कार्यं करणीयम्।

**सूत्रस्थानम् :-**

हेतोः प्रभावः निश्चितरूपेण भवति इति विश्वासः कर्तव्यः अतः हेत्वानुगुणं प्रतिदिनं कार्यस्य आरम्भः कर्तव्यः। मया कार्यं कृतम् इति विचार्य आश्वस्तः न भवेत्। वीर्यस्य त्यागो न कर्तव्यः। अन्यैः कृतायाः निन्दायाः प्रतिक्षणं स्मरणं न भवेत्।

**आचारसायनम्: -**

सदैव सत्यभाषिणः, अक्रोधिनः, मद्यपानम् एवं स्त्रीसहवासत्याजकाः, अहिंसायाः पक्षपातिनः, शान्तचित्तयुक्ताः, प्रियभाषिणः, भगवतः स्मर्तारः, पवित्रचरित्रयुक्ताः, धैर्ययुक्ताः, दानशीलाः, तपस्विनः, आचार्यगुर्वादीनां सेवकाः, कदापि क्रूरतां न कुर्वन्तः, सर्वेषु दयाभावधारकाः उचितसमये शयन-जागरणकारकाः, घृतदुग्धानां सेवनकारिणः देशकालप्रमाणस्य ज्ञानीनिः ज्ञानयुक्ताः अहंकाररहिताः उत्तम-आचारविचार प्रयुक्ताः संकीर्णविचारहीनाः, अध्यात्मज्ञानं प्राप्तुं तत्पराः, ज्ञानवयोर्यौंविद्यावृद्धानां धर्मात्मनाम् उपासकाः धर्मशास्त्रस्य नियमानां पालका।

उपर्युक्तेषु सामूहिकगुणेषु युक्तः भूत्वा यः मनुष्यः रसायणस्य सेवनं करोति सः तदनुरुपगुणानाञ्च प्राप्तिं करोति।

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

1. नखानां कर्तनं कति दिनानन्तरं कर्तव्यम् ?
   (क) नव - नव (ख) सप्त - सप्त (ग) पञ्च - पञ्च (घ) अष्ट - अष्ट
2. ............ सर्वथा न कर्तव्यम् ।
   (क) धुम्रपानम् (ख) पयः पानम् (ग) दुग्धपानम् (घ) जलपानम्
3. देवानां कृते किं कर्तव्यम् ?
   (क) दानम् (ख) होमः (ग) कर्म (घ) श्रद्धा
4. रात्रौ किं न भोक्तव्यम् ?
   (क) दुग्धम् (ख) जलम् (ग) पयः (घ) दधि
5. स्वयं तु निन्दां न कुर्वन्तु अपितु अन्यस्य मुखेनापि न श्रृण्वन्तु इति कस्य कथनम् अस्ति ?
   (क) वामनस्य (ख) मनोः (ग) गुरोः (घ) भक्तस्य

**२. एकैकवाक्येन उत्तरं लिखत ।**

१. किद्दृशानां द्रव्याणाम् अनुलेपनं करणीयम्?

२. पक्षे कतिवारं श्मश्रु करणीयम्?

३. किदृशाणि वस्त्राणि न धर्तव्यानि?

४. धेनुः केन न ताडनीया?

५. विश्वासः कस्मिन् कर्तव्यः?

**३. लघुत्तरीयाः प्रश्नाः।**

१. शरीरे तैलस्य प्रयोगः कुत्र - कुत्र क्या रीत्या च कर्तव्यः?

२. भोजने कीदृशाणां पदार्थानां सेवनं न कर्तव्यम् ?

३. केषां निन्दा न कर्तव्या ?

४. संध्याकाले कानि कानि कार्याणि न कर्तव्यानि ?

५. रसायनसेवनस्य त्रीन् लाभान्: लिखत।

**४. सविस्तरम् उत्तराणि लिखत ।**

१. सदवृत्तस्य गुणानां वर्णनं कुरुत।

२. भोजनविधिं सविस्तारं प्रतिपादयत।

३. सद्वृत्तानुसारं मलत्यागविधिः यथाधीतं वर्णयत।

४. अध्ययननिषेधनियमानां वर्णनं विस्तारपूर्वकं कुरुत।

●

# १५ द्रव्यगुणशास्त्रपरिभाषा

राजनिघण्टुः द्रव्यगुणशास्त्रं अष्टांग आयुर्वेदस्य एकम् अङ्गं मन्यते।

द्रव्याणां गुणकर्मणि प्रयोगा विविधास्तथा।

सर्वशो यत्र वर्ण्यन्ते शास्त्रं द्रव्यगुणं हि तत्।

आचार्य - प्रियव्रत - शर्मा

यच्छास्त्रं द्रव्यगुणकर्मप्रयोगसम्बन्धितंद वर्तते तत् द्रव्यगुणशास्त्रं कथ्यते।

द्रव्ये रसो गुणो वीर्यं विपाकः शक्तिरेव च।

पदार्थाः पञ्च तिष्ठन्ति स्वं स्वं कुर्वन्ति कर्म च ।

भावप्रकाशः

द्रव्यगुणशास्त्रे मुख्यं द्रव्यमेव। रसः, गुणः वीर्यम्, विपाकः, शक्तिः इत्यादयः स्वं स्वं कार्यं कुर्वन्ति सर्वद्रव्याश्रिताः च सन्ति।

**सप्तपदार्थानां सामान्यपरिचयो यथा**

द्रव्ये रसो गुणो वीर्यं विपाकः शक्तिरेव च ।

पदार्थाः पञ्च तिष्ठन्ति स्वं स्वं कुर्वन्ति कर्म च ॥

- भावप्रकाशः

श्लोकेऽस्मिन् द्रव्यादिपञ्चपदार्थाः प्रतिपादिताः । तदतिरिक्तस्य द्रव्यस्य गुणस्य च तत्र समावेशो भवति अनेन प्रकारेण संमिल्य सप्तपदार्थाः भवन्ति। (१) द्रव्यम् (२) रसः (३) गुणः (४) वीर्यम् (५) विपाकः (६) प्रभाव (शक्तिः) (७) कर्म।

(१) द्रव्यं - कारणकार्यादि । उदा - पञ्जमहाभूतम्।

(२) रसः - मधुरादिः।

(३) गुणः - गुर्वाशिरीरादिगुणाः ।

(४) वीर्यम् - शीतोष्णादि।

(५) विपाक - मधुराम्लकट्वादिः ।

(६) प्रभावः - शिरीष-विषघ्नादि ।

(७) कर्म - छेदनलेखनादि।

**स्वाध्यायः**

**१. योग्य विकल्प चित्वा उत्तराणि लिखत**

१. किं द्रव्यगुणशास्त्रं अष्टांगआयुर्वेदस्याङ्गम् मन्यते ?

(क) आचार्यचरकः (ख) आचार्यसुश्रुतः (ग) पतञ्जलिः (घ) राजनिघन्टुः

२. द्रव्यगुणशास्त्रे मुख्यं किम् ?

(क) द्रव्यम् (ख) गुणः (ग) वीर्यम् (घ) प्रभावः

३. रसगुणादिपदार्थाः कस्याश्रिताः सन्ति ?

(क) रसस्य (ख) प्रभावस्य (ग) द्रव्यस्य (घ) कर्मणः

**२. एकैकवाक्येन उत्तरं लिखत ।**

१. द्रव्यस्योदाहरणं लिखत।

२. रसस्योदाहरणं लिखत।

३. विपाकस्योदाहरणं लिखत।

४. प्रभावस्योदाहरणं लिखत।

५. कर्मणः उदाहरणं लिखत।

**३. लघूत्तरीयाः प्रश्नाः।**

१. द्रव्यगुणशास्त्रस्य व्याख्यां लिखत।

२. सप्तपदार्थानाम् नामानि लिखत।

**४. सविस्तरम् उत्तरम् लिखत।**

१. द्रव्यगुणशास्त्रपरिभाषायाः सामान्य परिचयो देयः।

# १६ द्रव्यम्

द्रु गतौ धातुत्वात् निष्पन्नोऽयं द्रव्यशब्दः।

यत्र गतौ अर्थात् गमनं प्राप्तिः ।

–यत्राश्रिताः कर्मगुणाः कारणं समवायि यत् तद् द्रव्यम् । च.सू. (१.५१)

–द्रव्यलक्षणं तु क्रियागुणवत् समवायिकारणम्। स.सू. ८०-३

–द्रव्यम् आश्रयलक्षणं पञ्चानाम् । र. वे. १-१६६

–रस – गुण – विपाक – वीर्य – कर्मेति – पञ्चानाम् आश्रयं द्रव्यम्।

–सर्वं द्रव्यं पाञ्चभौतिकम् अस्मिन् अर्थे। च. सू. २६-९०

संसारे असङ्ख्यद्रव्याणि सन्ति। अतः तेषां पृथगध्ययनं दुःसाध्यं वर्तते एवं च विभिन्नेषु दृष्टिगोचरद्रव्येषु किञ्चिदेकं स्वाभाविकं आन्तर्यं साधर्म्यं च भवति । अतः कस्यापि शास्त्रस्य वैज्ञानिकाध्ययनाय पदार्थानां सुव्यवस्थितकरणं परम् आवश्यकम्। तत्तु कार्यवर्गिकरणेन भवति। पदार्थानां विविधवर्गेषु विभागीकरणेन तेषां साधर्म्यवैधर्म्यानां ज्ञानं सरलं भवितुमर्हति।

अतः विभागीकरणं वैज्ञानिकाध्ययनाय प्रथमं सोपानम् वर्तते ।

–वैदिकवाङमये औषधेः चत्वारः प्रकाराः सन्ति।

आथर्वगीराङ्गिरसीः दैवी मनुष्यजा उत।

औषधयः प्रजायन्ते यदा तं प्राण जिन्वसि । (अथर्ववेद ११-८-१३)

(१) आथर्वणी (२) आङ्गिरसी (३) दैवी (४) मानुषी।

–कार्यकारणविभेदेन द्रव्यविभागीकरणम्।

द्रव्यस्य प्रकारद्वयं (१) कारणद्रव्यम्। (२) कार्यद्रव्यम्।

(१) कारणद्रव्यम् –कारणद्रव्यं सृष्टेः मौलिकत्वात् उत्पद्यन्ते तानि कारणद्रव्यानि कथ्यन्ते । तानि द्रव्याणि नवसंख्यकानि विद्यन्ते ।

(१) पृथ्वी (२) आपः (३) तेजः (४) वायुः (५) आकाशम् (६) आत्मा (७) मनः (८) दिक् (९) कालः

कारणद्रव्यात् समुत्पन्नानि द्रव्याणि कार्यद्रव्याणि सन्ति यथा घटः, पटः, गोघूमः, गुडूची इत्यादि द्रव्याणि।

–चेतनास्थित्यनुसारं कारणद्वयं

(१) चेतनद्रव्यम् (२) अचेतनद्रव्यम्।

(१) चेतनद्रव्यम् – यत्र चेतनायाः आत्मनः निवासो वा अभिव्यक्तिः भवति तत्द्रव्यम् चेतनद्रव्यम्। यथा – वृक्षाः जीवाः।

(२) अचेतनद्रव्यम् – यत्र चेतनायाः स्थित्यभिव्यक्तिः न भवति तत् अचेतनद्रव्यम्। यथा – स्वर्णादिधातवः।

–चेतनद्रव्यस्य भागद्वयं वर्तते ।

(१) अन्तश्चेतनम्

(२) बहिरन्तश्चेतनम्

(१) अन्तश्चेतनम् – यत्र चेतनायाः सम्पूर्णाभिव्यक्तिः न भवति एवं संवेदना प्रच्छन्ना वा अस्फुटरूपा चलति तत् अन्तश्चेतनम्।

यथा – औद्भिदस्थावरादि द्रव्याणां समावेशः भवति।

(२) बहिरन्तश्चेतनम् – यत्र अन्तश्चेतनायाः बाह्याभिव्यक्तिः स्फुटिता वा पूर्णा भवति । यथा – जाङ्गमम् द्रव्यम्।

**द्रव्यम्**

↓

चेतनम् | अचेतनम्

चेतनम् ↓

(१) अन्तश्चेतनम् (औद्भिदम्) | (२) बहिरन्तश्चेतनम् (जाङ्गमम्)

–द्रव्येषु पञ्चमहाभूतानाम् आधिक्यं भवति तर्हि अधुना पञ्चभौतिकसङ्घटनानुसारेण महाभूतानामुत्कर्षनानुसारेण च द्रव्याणां पार्थिवादि (पार्थिव–पृथ्वी) संज्ञा भवति। तदनुसारेण द्रव्यस्य पञ्चप्रकाराः

(१) पार्थिवः (२) आप्यः (३) तेजसः (४) वायव्यः (५) आकाशीयः

अनेन प्रकारेण यद्यत्द्रव्येषु तत्तन्त्महाभूतानां अधिकतानुसारेण तेषां गुणधर्मे विशेषता भवति ।

–योनिभेदेन द्रव्यवर्गीकरणम्। अस्याः विभेदेन द्रव्यस्य त्रयप्रकाराः सन्ति – (१) जाङ्गमम्। (२) औद्भिदम्। (३) भौमम्।

(१) जाङ्गमम् – जाङ्गमम् अर्थात् यज्जङ्गमजीवात् प्राप्यते। यथा – कस्तूरी, गोरोचनम्, दुग्धं, घृतम् इत्यादि।

(२) औद्भिदम्–औद्भिदम् वा वानस्पतिकम् द्रव्यमर्थात् भूमेः पटात् स्फुटति (समुद्भवति) यथा – गोधूमाः हरीतकी।

(३) भौम – भौम एवं पार्थिवद्रव्यम् अर्थात् यत् भूमेः प्राप्यतेः विकारमस्ति च। यथा – पारदः गन्धकः इत्यादि धातवः।

–जाङ्गमद्रव्यस्य पुनश्चत्वारः प्रकारास्सन्ति।

(१) जरायुजम् (२) स्वेदजम् (३) अण्डजम् (४) उद्भिजम्

(१) जरायुजम् – जरायुजमर्थात् ये गर्भावस्थायां जरावृताः भवन्ति । यथा – मनुष्याः, पशवः ।

(२) स्वेदजम् – स्वेदजमर्थात् ये पृथ्व्याः (भूमेः) बाष्पेन वा प्राणीनां स्वेदेन उत्पतन्ति, उत्पन्नाः भवन्ति। यथा –यूका, मशकाः च पिपीलिकादयः।

(३) अण्डजम् – ये अण्डात् उत्पतन्ति ते । यथा –पक्षी – सर्पादयः ।

(४) उद्भिजम् – ये भूम्यामन्तर्भागे स्थिताः किञ्चित्कालानन्तरं पृथ्वीं भेदयित्वा बहिरागच्छन्ति। यथा – मण्डूकः नीरबहूटी इत्यादयः ।

–एवमेव औद्भिजद्रव्यस्यापि चत्वारः प्रकाराः सन्ति । (१) वनस्पतिः (२) वीरूद्धः (३) वानस्पत्यः (४) औषधिः।

(१) वनस्पतिः – यत्र दृश्यपुष्पं न भवति सा वनस्पतिः। यथा – वटः, उदुम्बरः, प्लक्षः इत्यादि।

(२) वीरूद्धः – लता एवं गुल्म विरूद्धेन विजानाति। यथा – कुशाः, प्रसारिणी, इत्यादि।

(३) वानस्पत्यः – यत्र पुष्पफलानां समुद्भवो जायते सः वानस्पत्यः विद्यते। यथा – आम्रम्, जम्बूः इत्यादि।

(४) औषधिः– औषधिः अर्थात् ऽफलागमनेन वा फलपक्वेन विनष्टा भवति।

**–भौमद्रव्याणां प्रकारद्वयं भवति ।**

**प्रथम** :– यत्द्रव्यं प्राकृतावस्थायां भूमेः खनिजं निष्कासयति तद्द्रव्यं प्राकृतद्रव्येन वा खनिजद्रव्येन ज्ञायते। यथा लौहादिखनिजद्रव्याणि।

**द्वितीयम्**– यद्द्रव्यं कृत्रिमरीत्या वा कृत्रिमप्रक्रियाद्वारा क्रियते तद्द्रव्यं कृत्रिमम् कथ्यते। यथा क्षीरलवणादिकृत्रिमद्रव्याणि।

**द्रव्यम्**

(१) चेतनम् (२) अचेतनम्

(१) बहिरन्तश्चेतनम् (जाङ्गमम्) (२)अन्तश्चेतनम् (औद्भिदम्) (१) प्राकृतम् (२) कृत्रिमम्

(१) जरायुजम्
(२) स्वेदजम्
(३) अण्डजम्
(४) उद्भिजम्

(१) वनस्पतिः (२) वीरूधम् (३) वानस्पत्यम् (४) ओषधिः

(१) प्रतानिनी (२) गुल्मिनी

प्रयोगभेदेन द्रव्यस्य द्वौ भागौ स्तः - (१) औषधद्रव्यम्। (२) आहारद्रव्यम्।

(१) औषधद्रव्याणां प्रयोगेण शरीरे प्रमुखतः शीतोष्णादिगुणाधानं भवति। रसादिधातूनां पोषणं तथैव न भवति। यथा हरीतकी वा पिप्पल्यादी।

(2) आहारद्रव्यैः प्रमुखतया शरीरस्य रसादिधातूनां पोषणं भवति शीतोष्णादिगुणानामुत्पतिः गौणरुपेण भवति । यथा शालिः गौधूमादिः। इदमपि कथयितुं शक्यते यत् औषधद्रव्यं वीर्यप्रधानं वर्तते एवं आहारद्रव्यं रसप्रधानं वर्तते। तेन कारणेन औषधस्य प्रयोगः रोगनिवारणार्थं वा विशिष्टव्यवस्थायां विशेषोद्देश्यानुरूपं योजनानुसारेण भवति। तथा आहारद्रव्यस्य प्रयोगः शरीरस्य रक्षणार्थं वा वृध्यर्थं भवति।

**औषधद्रव्यस्य गुणाधिक्यानुसारेण त्रयः प्रकाराः सन्ति।**

(१) तीक्ष्णवीर्यम् - शुष्ठयादि तीक्ष्णवीर्यम्।

(२) मध्यवीर्यम् - बिल्वाग्निमन्यादि मध्यवीर्यम्।

(३) मृदुवीर्यम् - आमलकादिमृदुवीर्याणि द्रव्याणि सन्ति।

-अङ्गभेदेन प्रकारद्वयं (१) द्रव्यभूतम् (मूर्तस्वरुपम्) (२) अद्रव्यभूतम् (अमूर्तस्वरुपम्)

-रसभेदेन षडप्रकाराः सन्ति।

(१) मधुरस्कन्धः (२) अम्लस्कन्धः (३) लवणस्कन्धः (४) कटुकन्धः (५) तिक्तस्कन्धः (६) कषायस्कन्धः।

**वीर्यभेदेन प्रकारद्वयं - शीतोष्णम्।**

(१) शीतवीर्यम्- चन्दनंपद्मकं, उशीरम् - (२) उष्णवीर्यम्- स्वर्णधात्वादि।

(१) शमनम्, (२) कोपनम् (३) स्वस्थहितम्।

(१) शमनम् - यद्द्रव्यं कुपितदोषानां शमनं करोति - शमनम्।

(२) कोपनम् - यद्द्रव्यं दोषान् कापयति तत्कोपनम्।

(३) स्वस्थहितम् - यद्द्रव्यं कुपितदोषान् समावस्थायां स्थापयति तत्स्वस्थहितम्।

एतानि द्रव्याणि त्रिदोषस्य उपरि प्रभावं कुर्वन्ति तथा प्रतिकूलानि न भवन्ति। शमन-कोपनयोः द्रव्ययोः पुनः विभागत्रयं भवति।

शमने - वातशमनं, पित्तशमनं, कफशमनम्।

कोपने - वातकोपनं, पित्तकोपनं, कफकोपनम् ।

**द्रव्यम्**

↓

(१) शमनम् | (2) कोपनम् | (3) स्वस्थहितम्

(१) वातशमनम्
(२) पित्तशमनम्
(३) कफशमनम्

(1) वातकोपनम्
(2) पित्तकोपनम्
(3) कफकोपनम्

(१) वातसंशमनम् – देवदारः, कुष्ठः, हरिद्रा।
(२) पित्तसंशमनम् – चन्दनम्, रक्तचदनम्, मञ्जिष्ठा।
(३) कफसंशनमनम् – कालेयम्, अगरुः, नीलपर्णी।
(४) वातकोपनम् – शुष्कायांसः, उदालकम्।
(५) पित्तकोपनम् – तिलतैलम्, पिण्याकः।
(६) कफकोपनम् – यवाः, माषाः।
(७) स्वस्थहितम् – रक्तशालिः, मुद्गाः।

**सांस्थानिककर्मभेदेन द्रव्यविभागीकरणम्।**

द्रव्याणां शरीरस्य विभिन्नाङ्गेषु वा संस्थानेषु यत् कार्यं भवति तदनुसारेण अनेके वर्गाः निर्धारिताः भवन्ति। एतानि विभिन्नकर्माणि वर्गद्वये समाविशन्ति।

(१) संशोधनम् –शरीरस्थं मलं निष्कासयति।
(२) संशमनम् –शरीरस्थस्य कुपितदोषाणां शमनं करोति।
–आचार्यचरकेन सुश्रुतेन च कर्मानुसारेण द्रव्याणां अनेके वर्गाः नियुक्ताः सन्ति।
–चरकाचार्यकृतानाम् आहारद्रव्याणां द्वादशवर्गेषु विभागीकरणम्।

(१) शुकधान्यवर्गः –शालिः, यवाः, गौधूमादिः।
(२) शमीधान्यवर्गः –मुद्गाः, माषाः, कुलत्थादिः।
(३) मांसवर्गः –प्रसहः, भूमिरापः, आनूपादिः अष्टेव वर्गाः।
(४) शाकवर्गः –वास्तुकः, सुरणम्, पथेलादिः।
(५) कलादिवर्गः –मृद्विका, परुषकः, नारिकेलादिः।
(६) हरितवर्गः –आर्द्रकम्, नीम्बूः, मूलादिः।
(७) मद्यवर्गः –आसवः अरिष्ठः सूरादिः
(८) जलवर्गः –दिव्यः, भौमादिः
(९) गोरसवर्गः –गव्यम्, महिषम्, दधि, घृतादि।
(१०) इक्षुवर्गः –इक्षुरसः, गूडः, शर्करादिः।
(११) कृतान्नवर्गः –पेया, सक्त्वादि।
(१२) आहारयोगीवर्गः –तैलं, लवणं हिंगादि।

–सुश्रुताचार्येण द्रव्यस्य द्वौ भागौ कृतौ ।

(१) द्रव्यद्रव्याणि

(२) अन्नद्रव्याणि

(१) द्रव्यद्रव्याणि: – यथा (१) जलवर्ग: (२) क्षीरवर्ग: (३) दधिवर्ग: (४) तक्रवर्ग:, (५) घृतवर्ग: (६) तैलवर्ग: (७) पुष्पवर्ग: (८) कन्दवर्ग: (९) लवणवर्ग: (१०) क्षारवर्ग: (११) धातुवर्ग: (१२) रत्नवर्ग: (१३) कृतान्नवर्ग:।

चरकसंहितायां सूत्रस्थाने चतुर्थे अध्याये द्रव्याणां कर्मानुसारेण पञ्चाशत् महाकषायवर्गा: वर्णिता:। प्रत्येकं वर्गेषु दशद्रव्याणि सन्ति, अत: पञ्चंशतं द्रव्याणि सन्ति।

उदा – जीवनीयानि बृंहणीयानि, लेखनीयानि ।

आचार्यसुश्रुतानुसारेण संक्षेपत: सप्तत्रिंशत् द्रव्याणि सन्ति । यद्यपि एते वर्गा: कर्मानुसारिण: एव तथापि तेषां नामकरणं मुख्यद्रव्याधारेण भवति।

उदा – विदारिगन्धादि, आरग्वधादि, पिप्पल्यादि।

आचार्यवाग्भट्टेन अष्टांगहृदये द्रव्याणां त्रयस्त्रिंशत् (३३) वर्गा: कृता। उदा – वमनम्, विरेचनं, निरुहनम्।

**स्वाध्याय:**

**१. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

१. वैदिकवाङ्मयानुसारं औषधे: कति प्रकारा: सन्ति।

(क) एकम् (ख) द्वे (ग) त्रय: (घ) चत्वार:

२. वृक्षा: कीदृशंप्रकारकं द्रव्यम्?

(क) चेतनम् (ख) अचेतनम् (ग) जाङ्गम् (घ) भौमम्

३. करणद्रव्यं कतिविधम्?

(क) सप्त (ख) अष्ट (ग) नव (घ) दश

४. गोधूम: कीदृशं द्रव्यमस्ति ?

(क) जाङ्गम् (ख) औद्भिदम् (ग) भौमम् (घ) उद्भिजम्

५. पुष्पफलयुक्तानां नाम किम् ?

(क) वनस्पति: (ख) वानस्पत्य: (ग) उभौ (घ) किमपि न

६. रक्तशालि: कीदृशं द्रव्यमस्ति ?

(क) शमनम् (ख) कोपनम् (ग) स्वस्थहितम् (घ) किमपि न

७. शुण्ठी कीदृशं द्रव्यमस्ति ?

(क) मृदुवीर्यम् (ख) मध्यवीर्यम् (ग) तीक्ष्णवीर्यम् (घ) आहारवीर्यम्

८. भौतिकसङ्घटनानुसारं द्रव्याणां भेदा: कति सन्ति।

(क) त्रय: (ख) चत्वार: (ग) पञ्च (घ) षड्

**२. एकैकवाक्येन उत्तरं लिखत ।**

१. कारणद्रव्यमर्थात् किम् ?

२. चेतनद्रव्यमर्थात् किम् ?

३. पार्थिवद्रव्यमर्थात् किम् ?

४. औषधि: अर्थात् किम् ?

५. रसविभेदेन द्रव्यस्य कति भेदा: सन्ति ?
६. चरकसंहितायां कति महाकषायाणां वर्णनं कृतमस्ति ?
७. सुश्रुताचार्येण सक्षेपत: कति द्रव्याणि प्रतिपादितानि ?

**३. लघूत्तरीया: प्रश्ना:।**

१. द्रव्यवर्गीकरणम् किमर्थम् करणीयम् ?
२. कारणद्रव्याणि कति सन्ति ? कानि च तानि ?
३. जाङ्गमद्रव्यस्य वर्गीकरणं लिखत ।
४. सुश्रुताचार्यानुसारेण अन्नद्रव्यवर्गान् लिखत ।

**४. योजयत ।**

| अ | ब |
|---|---|
| (१) शुकधान्यवर्ग: | (अ) मृद्विका |
| (२) शमिधान्यवर्ग: | (ब) तैलम् |
| (३) कलवर्ग: | (क) मुद्गा: |
| (४) आहारयोगीवर्ग: | (ड) शालि: |

**५. विस्तृतप्रश्ना: समाधेया:।**

१. चेतनास्थित्यनुसारं द्रव्यप्रकाराणां विस्तृतं वर्णनं लिखत।
२. चरक-सुश्रुतोक्तवर्गाणाम् वर्णनं लिखत ।
३. दोषकर्मभेदानुसारं कर्म-वर्गीकरणं कुरुत।

# १७ गुणः

**( १ ) निरुक्तिः** – गुण आमन्त्रणे। इति धातुत्वात् निष्पनोऽयं गुणः शब्दः। गुण्यते आमन्त्र्यते लोकः अनेन इति गुणः। अर्थात् येन कारणेन जनाः द्रव्यं प्रति समाकृष्टाः भवन्ति स एव गुणः।

विविधकर्म सम्पादने द्रव्यस्य प्रयोगं करणरुपेण भवति। परन्तु द्रव्यं तु तदा एव समर्थं भवति यदा तत्र समुचितं गुणाधानं विद्यते । द्रव्याणाम् कर्माणि तदाश्रितेन गुणकारणेन भवन्ति अनेन कारणेन पत्र कर्मसम्बन्धो विद्यते तत्र गुणानां महत्त्वपूर्णं स्थानं अस्ति।

**( २ ) लक्षणम्** – समवायी तु निश्चेष्टः कारणं गुणः। च सू. १ । ५१।

यः समवायसम्बन्धेन द्रव्याश्रितः कर्मरहितः

कार्यं प्रति असमवायिकारणः स गुणः कथ्यते।

द्रव्याश्रय्यगुणवान् संयोगविभागेष्वकारणमनपेक्ष इति गुणलक्षणम्।

– वैशेषिक दर्शनम् १-१-१०

गुणः द्रव्याश्रितः निर्गुणः तथा संयोग – विभागेषु अकारकः अनपेक्षः च भवति।

**( ३ ) भेद :- विभागीकरणम्।**

आचार्यचक्रपाणिदत्तेन गुणानाम् त्रयविभागाः कृताः।

(१) वैशेषिकः (२) सामान्यः (३) आत्मगुणः

अनेन त्रिविधा अपि वैशेषिकासामान्याः आत्मगुणाश्चदिष्टाः। – च.सू. २८९ चक्रपाणि।

सामान्य गुणाः द्विविभागेषु विभक्ताः।

(१) गुर्वादिगुणाः (२) परादिगुणाः। गुर्वादिगुणाः, शारीरधातूनां तथा द्रव्यैः विशेषसम्बन्धकारणात् शारीरगुणाः अपि कथ्यन्ते।

एते च सामान्यगुणाः पृथिव्यादीनां साधारणत्वात् । च. सू. १.४९ चक्रपाणि।

गुर्वादिगुणाः परादिगुणाः पृथिव्यादिभूतेषु सामान्यतः सन्ति। तेन कारणेन ते गुणाः सामान्यगुणाः कथ्यन्ते। शब्दादिगुणाः भूतानां विशिष्टगुणाः सन्ति तेन कारणेन ते विशिष्टगुणाः सन्ति।

वैशेषिकगुणानां एवं सामान्यगुणानां परस्पर भौतिक संसारेण सह सम्बन्धकारणेन एते आदिभौतिकगुणाः सन्ति एवञ्ज आत्मगुणानां आत्मीकसंसारेण सह सम्बन्धकारणेन एते आध्यात्मीकगुणाः कथ्यन्ते।

तस्य गुणाः शब्दादयो गुर्वादयश्च द्रवान्ताः। च. सू. रध–२०

**गुणाः**

- (१) आधिभौतिकाः
  - (१) सामान्यगुणाः
    - गुर्वादि (शारीरविंशति)
    - परादि
  - (२) विशिष्टगुणाः
    - (१) शब्दः
    - (२) स्पर्शः
- (२) आध्यात्मिकाः
  - (१) इच्छाः
  - (२) द्वेषः
  - (३) सुखम्
  - (४) दुःखम्
  - (५) प्रयत्नः

| | | | |
|---|---|---|---|
| (१) गुरुः - लघुः | (१) परत्वः | (३) रुपः | (६) बुद्धिः |
| (२) शीतः - उष्णः | (२) अपरत्वः | (४) रसः | |
| (३) स्निग्धः - रुक्षः | (३) युक्तिः | (५) गंधः | |
| (४) मन्दः - तीक्ष्णः | (४) संख्याः | | |
| (५) स्थिरः - सरः | (५) संयोगः | | |
| (६) मृदुः - कठिनः | (६) विभागः | | |
| (७) पिच्छिलः - विशदः | (७) पृथकत्वः | | |
| (८) श्लक्ष्णः - खरः | (८) परिमाणः | | |
| (९) स्थूलः - सूक्ष्मः | (९) संस्कारः | | |
| (१०) सान्द्रः - द्रवः | (१०) अभ्यासः | | |

-**आध्यात्मिकगुणाः** - इच्छा द्वेषः, सुख, दुःख, प्रयत्नः, चेतना (बुद्धिः) एते आत्मगुणाः वा आध्यात्मिकगुणाः सन्ति।

गुरुर्मन्दहिमस्निग्धश्लक्ष्णसान्द्रमृदुस्थिरः।
गुणाः ससूक्ष्म विशदा विंशतिः सविपर्ययाः॥

अ.ह.सू. १-१८

यथा - गुरुः लघुः, शीतः - उष्णः, स्निग्धः - रुक्षः, मन्दः - तीक्ष्णः, स्थिरः- खरः, मृदुः कठिनः, विशदः - पिच्छिलः, श्लक्ष्णः - खरः, स्थूलः - सूक्ष्मः, सान्द्रः द्रवः, अनेन प्रकारेण दशयुग्मं भवति तत्र प्रत्येकयुग्मे द्वयोः परस्परविरुद्धगुणयोः सम्मिल्य विंशति गुणाः भवन्ति।

परत्वापरत्वे युक्तिश्च सङ्गख्या संयोग एव च ।
विभागश्च पृथकत्वं च परिणामं तथापि च ॥
संस्कारोऽभ्यास इत्येते गुणा ज्ञेया परादयः।
सिद्ध्युपायाश्चिकित्यासायाः लक्षणैस्तान् प्रचक्ष्महे॥

च. सू. २६ २९ - ३० ॥

सामान्यगुणानामन्यवर्गे परदिगुणाः सन्ति। ये गुणाः दशसंख्यात्मकाः। परः, अपरः, युक्तिः, संडख्या, संयोगः विभागः, पृथक्त्वः, परिणामः, संस्कारः तथा अभ्यासः। चिकित्सायां सिद्धयर्थं एते परमावश्यकाः सन्ति।

**विशिष्टगुणाः** - अर्थाः शब्दादयो ज्ञेया गोचरा विषया गुणाः। च. शा. २ - ३२

भूतानां ये विशिष्टगुणाः एवं इन्द्रियविशिष्टविषयान् विशिष्टगुणाः वा शब्दादिगुणाः कथ्यन्ते । एते पञ्चसङ्ख्यात्मकाः विद्यन्ते। क्रमशः (१) आकाशम् (२) वायुः (३) अग्निः (४) जलम् (५) पृथ्वी एते भौतिकगुणाः तेषां श्रोत्रं, त्वक्, चक्षुः, रसना घ्राणमिति - इन्द्रियविशिष्टगुणाः विषयाश्रिताः सन्ति।

### गुर्वादिगुणाः

**(१) गुरुः** - यः गुरुपाकः शरीरे गौरवं उत्पन्नं करोति सः गुरुः विद्यते।

**(२) लघुः** - यः लघुपाकः यस्य शरीरे लघुता उत्पन्ना भवन्ति स लघुः इति।

**(३) शीतम्** - येन शरीरे शैत्योत्पन्नं भवति स शीतगुणः ।

**(४) स्निग्धतागुणः** - येन शरीरे स्निग्धता वा मृदुता उत्पन्ना भवति स स्निग्धगुणः।

**(५) उष्णगुणः** - येन शरीरे उष्णता वर्धते स उष्णगुणः।

**( ६ ) रुक्षगुणः** - येन शरीरे रुक्षता वा शुष्कता उत्पन्ना भवति स रुक्षगुणः ।

**( ७ ) मन्दगुणः** - यस्य शमने शक्तिः स मन्दः ।

अ. हृ. सू १ - १८

मन्दो यात्राकरः स्मृतः।

सु.सू. ४३-५

-यः गुणः शरीरे गत्वा विषमगुणानां शमनं करोति स मन्दगुणः। स सामान्यगत्या शरीरे यापनं करोति।

**( ८ ) तीक्ष्णगुणः** - यस्य शोधने शक्तिः सः तीक्ष्णः।

अ. हृ. सू १ - १८

यः शरीरे प्रयुक्ते सति शोधनकर्म करोति स तीक्ष्णगुणः।

**( ९ ) स्थिरगुणः** - यस्य धारणे शक्तिः सः स्थिरः । अ. हृ. सू १ - १८

यः गुणः धातुषु स्थिरतां उत्पन्नां करोति।

शरीरं च धारयति स स्थिरगुण इति कथ्यते।

**( १० ) सरगुणः** - यः धातूनां नाशं कृत्वा शरीरस्य स्थिरता विनष्टा करोति स सरः इति कथ्यते।

**( ११ ) मृदुगुणः** - यस्य श्लथने शक्तिः स मृदुः। अ. हृ. सू १ - १८

यः शारिरीकाङ्गेषु मृदुता एवं शिथिलतां उत्पन्नां करोति स मृदुगुणः।

**( १२ ) कठिनगुणः** - यस्य दृढने शक्तिः स कठिनः। अ. हृ. सू १ - १

येन शरीरे कठोरता एवं दृढता उत्पन्ना भवति (हेमाद्रि) स कठिनगुणः कथ्यते।

**( १३ ) विशदगुणः** - यस्य क्षालने शक्तिः स विशदः। अ. हृ. सू. १ - १८ (हेमाद्रि)

यस्मिन् क्षालनस्य (पिच्छिलता नष्टीकरणाय) शक्तिः भवति स विशदगुणः।

**( १४ ) पिच्छिलगुणः** - यस्य लेपने शक्तिः स पिच्छिलः । अ. हृ. सू. (हेमाद्री) १ - १८

यः शरीरे गत्वा लेपनकर्म करोति स पिच्छिलगुणः कथ्यते।

**( १५ ) श्लक्ष्णगुणः** - यस्य रोपणे शक्तिः स श्लक्ष्णः । अ. हृ. सू १ - १८

यस्य रोपने शक्ति स श्लेक्ष्णगुणः।

**( १६ ) खरगुणः** - यस्य लेखने शक्ति सः खरः। अ. हृ. सू १ - १८ (हेमाद्रि)

लेखने यस्य शक्तिः स खरगुणः।

**( १७ ) सूक्ष्मगुणः** - सूक्ष्मस्तु सौक्ष्म्यात् सूक्ष्मेषु स्रोतः स्वनुसरः स्मृतः। सु.सू. ४६.५२४ यः (गुणः) सूक्ष्मताकारणेन समस्तशरीरस्य स्रोतेषु प्रविष्टो भवति प्रसरति च तथा च तेषां उद्घाटनं च करोति स सूक्ष्मः।

**( १८ ) स्थूलगुणः**- यस्य संवरणे शक्तिः स स्थूलः। अ. हृ. सू. १ - १८ हेमाद्रि

यः गुरुपाको विद्यते तथा स्थूलतायाः कारणेन स्रोते अवरोधं कारयति स स्थूलगुणः कथ्यते।

**( १९ ) सान्द्रगुणः** - यस्य प्रसादने शक्तिः स सान्द्रः । अ. हृ. सू. १ - १८। हेमाद्रि

यः शरीरे गत्वा अवयवानां प्रसादनं करोति स सान्द्रः कथ्यते ।

**( २० ) द्रवगुणः** - यस्य विलोऽने शक्तिः स द्रवः। अ. हृ. सू - १ - १८ (हेमाद्रि)

यस्मिन् गुणे आर्द्रतायाः वा विलीनतायाः शक्तिः भवति स द्रवगुणः।

## परादिगुणाः

**(१) परत्वं** - परत्वं प्रधानत्वम्। च.सू. २ चक्रपाणि।

परत्वमर्थात् प्रधानता।

**(२) अपरत्वं** - तद्विपर्ययः अपरत्वम्। च. सू. २६ - ३१।

परत्वविपरीत्वात् अपरत्वम् अर्थात् अप्रधानता।

**(३) युक्तिः** - युक्तिश्च योजना यातु उच्यते। च. सू. २६ - ३१

दोषादीनां विचारं कृत्वा सम्यक् औषधकल्पना एव युक्तिः इति कथ्यते।

**(४) सङ्ख्या** - सङ्ख्या स्यात् गणितम्। च.सू. २६ - ६२

गणनाव्यवहारे एकं द्वे ..... इत्यादयगणना भवति सा सङ्ख्या कथ्यते।

**(५) संयोगः** - संयोगः पुनर्द्वयोर्बहुनां वा द्रव्याणां संहतिभावः । च. वि. १ - २२

युग्मं वा युग्माधिकद्रव्याणां परस्परसम्मेलनेन संयोगं भवति।

**(६) विभागः** - विभागस्तु विभक्तिः स्याद् वियोगो गणशो ग्रहः। च.सू. २६ - ३३।

द्रव्यानां विभाजनमिति विभागः कथ्यते।

**(७) पृथकत्वं** - यः गुणः एकद्रव्यात् अन्यद्रव्यं भिन्नं करोति तत् पृथकत्वं इति उच्यते।

**(८) परिमाणः** - परिमाणं पुनर्मानम्। च. सू. २६ - ३४।

मापनं, तुलना इत्यादि मानव्यवहारस्य कारणभूताः गुणाः परिमाणेन ज्ञायते।

**(९) संस्कारः** - येन कारणेन द्रव्यस्य गुणे परिवर्तनं कारयते सः संस्कारः।

**(१०) अभ्यासः**- भावाभ्यसनमभ्यासः शीलनं सततक्रिया। च.सू. २६ - ३४।

पदार्थस्य निरन्तरं सेवनं अभ्यासः कथ्यते।

## स्वाध्याय

**१. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

१. कस्मात् धातुत्वात् गुणः शब्दः निष्पन्नः ?

(क) गुण - गुण्यते (ख) गुण-गणनायां (ग) गुण-आमन्त्रणे (घ) गुण - गणने

२. प्रदत्तेषु कः गुणः विभागः चक्रपाणिना न प्रदतः।

(क) वैशेषिकः (ख) सामान्यः (ग) विशिष्टः (घ) आत्मगुणाः

३. गुर्वादिगुणाः कति सन्ति ?

(क) अष्टगुणाः (ख) दशगुणाः (ग) विंशतिगुणाः (घ) चतुर्विंशतिगुणाः

४. यस्य शमने शक्ति सः कः ?

(क) शमनः (ख) स्निग्धः (ग) स्थिरः (घ) मन्दः

५. यस्य धारणे शक्तिः सः.......... ? रिक्तस्थानं पूरयत।

(क) सरगुणः (ख) स्थिरगुणः (ग) कठिनगुणः (घ) खरगुणः

६. परादि कति गुणाः सन्ति ?

(क) पञ्चगुणाः (ख) दशगुणाः (ग) द्वादशगुणाः (घ)षोडशगुणाः

७. सङ्ख्या स्यात् ................ । रिक्तस्थानं पूरयत।

(क) गणना (ख) क्रम (ग) विभाजनम् (घ) गणितम्

**२. एकैकवाक्येन उत्तरं लिखत ।**

१. वैशेषिक-दर्शनानुसारं गुणलक्षणं लिखत।

२. विशिष्टगुणाःकति सन्ति? के च ते ?

३. के आद्यात्मिकगुणाः सन्ति?

४. तीक्ष्णगुणलक्षणं लिखत।

५. पिच्छिलगुणलक्षणं लिखत।

६. युक्तेः लक्षणं लिखत।

**३. लघूत्तरीयाः प्रश्नाः।**

१. गुर्वादिविंशतिगुणाः के ? सश्लोकं लिखत।

२. परादिगुणान् प्रतिपादत।

३. गुर्वादिविंशतिगुणेषु केचन पञ्चगुणाः विलिख्यताम्।

४. परादिगुणेषु पञ्चगुणाः विलिख्यताम्।

**४. सविस्तरम् उत्तराणि ददत ।**

१. सामान्य - विशिष्टगुणानां भेदद्वयं प्रतिपादयत।

२. गुर्वादि-परादिगुणानां भेदद्वयं प्रतिपादयत।

**5. विस्तृतप्रश्नाः समाधेयाः।**

१. गुणस्य व्याख्यां विलिख्य लक्षणञ्च भेदान् प्रतिपादयत।

२. गुर्वादिगुणाः सविस्तरेण प्रतिपाद्यताम्।

३. परादिगुणान् सविस्तरेण लिखत।

●

# १८ रसः

- **निरुक्तिः** - रस्यते आस्वाद्यते अनेन इति रसः । च. सू. १-६४ - चक्रपाणि

अर्थात् रसनेन्द्रियद्वारा यस्य विषयस्य ग्रहणं भवेत् स रसः कथ्यते। निरुक्तानुसारं द्रव्ये ये मधुरकट्वादयः षड् आस्वादनयुक्ताः ते रसाः कथ्यन्ते।

- **लक्षणम्** - रसनार्थो रसः। - च. सू. १-६४
- रसनेन्द्रियग्राह्यो योऽर्थः स रसः । द्र. गु. सं. १-१-शि.
- रसलक्षणम् आस्वादः । - र. वे. २.२३७

अर्थात् रसनार्थो, रसनेन्द्रियग्राह्यो योऽर्थः एवं च आस्वादनयुक्तः स रसः इति।

- **भेदाः** - रसानाम् षड् भेदाः सन्ति।

(१) मधुररसः ।

(२) अम्लरसः ।

(३) लवणरसः ।

(४) कटुरसः ।

(५) तिक्तरसः ।

(६) कषायरसः ।

- षड्सु ऋतुषु पंचमहाभूत्वेन रसाविभागीकरणम्।

| **क्रम** | **रसाः** | **पंचमहाभूतत्त्वानि** | **ऋतुः** |
|---|---|---|---|
| (१) | मधुररसः | जलम् + अग्निः | हेमन्तः |
| (२) | अम्लरसः | पृथ्वी + अग्निः | वर्षा |
| (३) | लवणरसः | जलम् + अग्निः | शरद |
| (४) | कटुरसः | वायुः + अग्निः | ग्रीष्मः |
| (५) | तिक्तरसः | वायुः + आकाशम् | शिशिरः |
| (६) | कषायरसः | वायुः + पृथ्वी | वसन्तः |

कोष्ठके प्रदतानां पञ्चमहाभूतानां परस्परसम्मेलनेन विविधरसानां प्रादुर्भावः सम्भवति तथा च ऋत्वनुसारेण महाभूतानां आधिक्येन च विविधरसानां समुद्भवः जायते।

भोजने प्रथमत्वेन मधुरं, मध्यमे अम्ल-लवणयोः, अन्ते च कटु-तिक्त-कषाय - रसानां सेवनं परं हितकारकं भवति कारणम् यथा -

शरीर भोजनपूर्वे कोष्ठः रिक्तोऽस्ति। तदा कोष्ठे वातस्य बाहुल्यं वर्तते। मधुरसेन वातशमनं भवति, तदनन्तरं तदा तत्र कफस्य वृद्धिर्भवति, आहारस्य सम्यक् क्लेदनं च भवति तदनन्तरं अम्ललवणरसयोः प्रयोगः भवति कारणम् लवणाम्लरसयोः अग्नितत्वस्य बाहुल्यं (अधिकता) वर्तते। तेन कारणेन जठराग्निः प्रदीप्तो भवति। पाचनमारभ्यते, तदनन्तरं तत्र कटुकषाययतिक्तानां रसयुक्तपदार्थानां सेवनं करणीयम् तेन अग्नेः दीपनं भवति एवं च भोजनान्ते सद्यः कफस्य नियंत्रणमपि भवति।

कदाचिद् – असामान्यवस्थायां रसक्रमे विपर्यय: अपि दरिदृश्यते। यथा अरुच्याग्निमांद्ये वा अन्यकफविकारे प्रथमं लवणमार्द्रकम् सेवि सेवितव्यम्। तेन कटुरसेन च कफशमनं भवति तथा च लवणरसेन क्लेदनं वातशमनं इति प्रक्रिया: भवन्ति। रसानां सेवनं पूर्वं भवति। तदा विदाहो भवति। तदन्तरं मधुररसस्य सेवनं कर्तव्यम् तेन पित्तवृद्धि: न भवति एवच विदाहशमनमपि भवति। इति रसयुक्तद्रव्याणां भोजनप्रक्रिया।

तात्पर्यमिदमेवयत् भोजनं षड्रसयुक्तं क्रमबद्धं भवेत् यत्र सर्वदोषा: समावस्थायां भवन्तिति।

| **क्रम** | **रसाः** | **विविधरसयुक्तपदार्थानाम् वर्णनम्। (द्रव्याणाम्)** |
|---|---|---|
| (१) | मधुररस: | शर्करा, घृतं द्राक्षा, मधु: |
| (२) | अम्लरस: | निम्बु:, अम्लिका |
| (३) | लवणरस: | सैन्धव:, सामुद्रिकम् |
| (४) | कटुरस: | मरीचिका, पिप्पली |
| (५) | तिक्तरस: | चिरायता, कारवेल्लम् |
| (६) | कषायरस: | हरीतकी, बर्बुर: |

## विविधरसलक्षानि

**(१) मधुररसलक्षणम्** – तेषां विद्याद्रसं स्वादुं यो वक्त्रमनुलिम्पति। आस्वाद्यमानो देहस्य ह्लादनोऽक्षप्रसादन:॥ प्रियपिपीलिकादीनाम् ........... । – अष्टांगहृदय. सू – १०-२

षड्सु रसेषु य: रस: वक्त्रमनुलिम्पति, यस्यास्वादने आनन्दो जायते, इन्द्रियाणि प्रसन्नानि भवन्ति तथा पिपीलिकादीनां कृते य: प्रिय: रस: वर्तते स एव मधुररस: कथ्यते।

**(२) अम्लरसलक्षणम्** – अम्ल: क्षालयते मुखम्।

हर्षणो रोमदन्तानामक्षिभ्रुवनिकोचन: ॥

अ. हृ. सू. १०-३

अम्लरसेन मुखं क्षालयते । शरीरे रोमहर्षणं भवति, दन्ता: आलम्बिता: भवन्ति। अक्षभ्रूकुटि: संकोचयति इति अम्लरस: ।

**(३) लवणरसलक्षणम्** :-

लवण: स्यन्दयत्यास्यं कपोलगलदाहकृत्। अ. हृ. सू. १०-८

– लवणरस: मुखे जलं प्रसारयति तथा च कपोलगलदहनं करोति।

**(४) तिक्तरसलक्षणम्** –

तिक्तो विशदयत्यास्यं रसनं प्रतिहन्ति च । अ. सू. १०-८

तिक्त: मुखं विशदयति तथा च अन्यरसस्य ग्रहणशक्तिं नाशयति।

**(5) कटुरसलक्षणम्** –

उद्वेजयति जिह्वाग्रं कुर्वश्चिमिचिमां कटु: ।

श्रवत्यक्षिनासास्यं कपोलो दहतीव च ॥ अ. हृ. सू. १०-५

कटुरससेवनेन जिह्वाग्रं (अग्रभागं) उद्वेजयति, मुखे च चिमचिमां (ज्वलनं) भवति। मुखे च जलस्रावो जायते। कपोलम् आस्यं च दहति।

**( ६ ) कषायरसलक्षणम् :-**

कषायो जऽयेज्जिह्वां कण्ठस्रोतो विबन्धनकृत्। अ.हृ.सू. १०-६

कषायरससेवने जिह्वायां स्वादशक्तेः मंदता (वडता) भवति तथा च कण्ठस्रोतः विबन्धयति।

**विविधरसानां कार्याणि एवमतियोगस्य परिणामः ।**

**( १ ) मधुररसकार्याणि :**

आजन्मसात्म्यात्कुरुते धातूनां प्रबलं बलम् ।

बालवृद्धक्षतक्षीण - वर्णकेशेन्द्रियौजसाम्॥

प्रशस्तो बृहणः कण्ठयः स्निग्धः पित्तानीलविषापहः॥

कुरुतेऽत्युपयोगेन स मेदः श्लेष्मजान् गदान्।

स्थौल्याग्निसादसन्यासमेहगण्डार्बुदादिकान्॥ अ. हृ. सू. १०-७-९

भावार्थः - मधुररसः जन्मतः सात्म्योऽस्ति। स धातूनां बलं प्रबलं करोति। बालकानां वृद्धानां क्षतक्षीणानाम् कृते श्रेष्ठ तथा च वर्णकेशेन्द्रियौजसां कृते श्रेष्ठः, बृहणं करोति, कष्ढस्य कृते श्रेष्ठः, स्तन्यवर्धकः, संधानकारकः, गुरुः, आयुवर्धकः, जीवनः, स्निग्धः पित्तवायुविषावहः च भवति।

अस्य रसस्यातिसेवनात् मेदः, श्लेष्मजान् विकारान् स्थौल्याग्निसादः, संन्यासः, मेहगण्डार्म्बुदादि रोगानां समुत्पत्तिः भवति।

- **अम्लरसकार्याणि -**

अम्लोऽग्निदीप्तिकृत्स्निग्धो हृद्यः पाचनरोचनः।

उष्णवीर्यो हिमस्पर्शः प्रीणनः क्लेदनो लघुः ॥

करोति कफपित्तांस्र मूढवातानुलोमनः।

सोऽत्यभ्यस्तस्तनोः कुर्याच्छैथिल्यं तिमिरं भ्रमम्॥

कण्डुपाण्डुत्ववीसर्पशोफ - विस्फोट -तृड् - ज्वरान्॥ - अ.हृ. सू. १०-१०-१२।

भावार्थः - अम्लरसः, अग्निप्रदीपकः, स्निग्धः, हृदयहितकारी पाचकः, रुच्योत्पादकः, उष्णवीर्यः, हिमस्पर्शः, प्रीणनकारकः, क्लेदकः, लघुः, कफपित्तरक्तवर्धकः मूढवायुनानुलोमकः अस्ति।

अस्य रसस्यातिसेवनात् शरीरे शिथिलता, चक्षुषि तिमिरदोषः, भ्रमम्, कण्डुः, पाण्डुः, विसर्पः- शोफ - विस्फोट-तृष्णा-ज्वरान् इत्युपपद्यन्ते।

- **लवणरसकार्याणि :-**

लवणः स्तभ्भसङ्गात् बन्ध विध्मापनोऽग्निकृत्।

स्नेहनः स्वेदनस्तीक्ष्णो रोचनश्छेदभेदकृत्॥

सोऽति युक्तोऽस्रपवनं खलतिं पलितं वलिम्।

तृट्कुष्ठविषविसर्पान् जनयेत्क्षपयेद्बलम्॥ अ. हृ. सू १०-१२-१३

भावार्थः- लवणरसः स्तम्भः संघातः एवं बन्धनाशकः, अग्निप्रदीपकः, स्नेहनः, स्वेदनः तीक्ष्णः, रोचनः छेदकः भेदकश्चास्ति। लवणरसस्याति सेवनेन, वातरक्तं खलितं, पलितं, वलिम् तृट्कुष्ठविषविसर्पादि रोगाः भवन्ति।

- **तिक्तरसकार्याणि** -

तिक्तः स्वयमरोचिष्णुः अरुचिं कृमितृडविषम्।

कुष्ठमूर्च्छाज्वरोत्क्लेशदाहपित्तकफान् जयेत्॥

क्लेदमेदोवसामज्जसकृन्मूत्रोपशोषणः ।

लघुर्मेध्यो हिमो रुक्षः स्तन्यकण्ठविशोधनः॥

धातुक्षयाऽनिलव्याधीनति - योगत्करोति सः ॥ अ.हृ.सू. १० -१८ - २६

भावार्थः- तिक्तरसः स्वयं अरुचिकारकः तथापि भोजनं प्रति रुचिमुत्वादयति अरुचिं च शाम्यति। कृमितृडविषम् तथा कुष्ठ - मूर्च्छा - ज्वरोत्क्लेश - दाह - पित्त - कफेति दोषान् नाशयति । तथा च क्लेद - मेद - वसा, मज्जा - मल - मूत्रादि शोषयति। अपरं च तिक्तरसः लघुः, मध्यः, हिमः, रुक्षः स्तन्यः कण्ठ - विशोधकश्चास्ति।

तिक्तरसस्यातिसेवनात् धातुक्षयं वा वातदि विकारोत्पत्तिः भवति।

**( ५ ) कटुरसकार्याणि :**

कटुर्गलामयोदर्दकुष्ठालसफशोकजित्।

वर्णावसादनः स्नेहमेदक्लेदोपशोषणः ॥

दीपनः पाचनो रुच्यः शोधनोऽन्यस्य शोषणः ।

छिनत्ति बन्धान् स्त्रोतांसि विवृणोति कफापहः॥

कुरुते सोऽतियोगेन तृष्णां शुक्रबलक्षयम्।

मूर्च्छाकुञ्चनं कम्पं कटिपुष्ठादिषु व्यथाम्॥ अ. हृ, सू. १० - १७ -२३

भावार्थः- कटुरसः गलामयोदर्द - कुष्ठ अलसकः शोथनाशकः व्रणावसादकः, स्नेहक्लेदमेदशोषकः, अग्निप्रदीपकः, पाचकः, रुचिकारकः, शोधकः, अन्नशोषकः, कफनाशकः, बन्धनछेदकः, स्त्रोतसोद्धाटकः, कफापहश्चास्ति।

- रसस्यातिसेवनात् तृष्णां, शुक्रबलक्षयम्, मूर्च्छा आकुञ्चनं, कम्पनं, कटिपृष्ठादिषु व्यथाम् इत्यादयः रोगाः सम्भवन्ति।

**( ६ ) कषायरसकार्याणि** -

कषायः पित्तकफहा, गुरुरस्रविशोधनः।

पीडनो रोपणः शीतः क्लेदमेदोविशोषणः॥

करोति शीलितः सोऽति विष्टम्भाध्मानहृद्रुजः।

तृट्कार्श्यपौरुषभ्रंशस्त्रोतोरोधमलग्रहान् ॥ अ. हृ. सू. २०-२१

भावार्थः- कषायरसः पित्तकफनाशकः, गुरुः, रक्तशोधकः पीडनः रोपणः, व्रणपूरकः, शीतः, कलेदमेदोविशोषकः आमावरोधकः, ग्राहीरुक्षः, त्वचानिर्मलकारकः विद्यते।

रसस्यातिसेवनात् विष्टम्भः आध्मानः, हृदयरुजा तृष्णा, कार्श्यः, पौरुषभ्रंशः, स्त्रोतोरोधः मलग्रहश्च विद्यते।

**रसानां द्रव्याणि गुणाः च**

**( १ ) मधुररसद्रव्याणि गुणाः** - मधुरं श्लेष्ममलं प्रायो जीर्णाच्छालियवादृते। अ.हृ.सू. १०-३३

मुद्गात्गोधूमतः द्रात्सिताया जाङ्गलाभिषात्॥

भावार्थः - मधुररसयुक्तानि द्रव्याणि यथा - जीर्णशालियवाः मुद्गाः, गोधूमः, मधुः, शर्कराः, (वनजीवानां मांसः) इति मधुररसद्रव्याणि।

जीर्णशालिः एवं यवं विहाय सामान्यतया

कफकारकोऽयं विद्यते। अ. हृ. सू. १०-३४

**( २ ) अम्ल-लवणयोः ( ३ ) द्रव्याणि गुणाश्च :** प्रायोऽम्लं पित्तजननं दाडिमामलकादृते अपथ्यं लवणं प्रायश्चक्षुषोऽन्यत्र सैन्धवात्॥ अ. हृ. सू. १०

भावार्थः - दाडिमं एवं च आमलकं विहाय सर्वे अम्लपदार्थाः पित्तकारकाः सन्ति। तदैव सैन्धवं विहाय अन्ये लवणद्रव्याणि अचक्षुषाणि सन्ति॥ अ. हृ. सू. १० - ३३।

**( ५ ) तिक्त कटु, ( ६ ) कषाय रसानां, ( ७ ) द्रव्यगुणानां वर्णनम् :-** तिक्तोकटु च भूयिष्ठमवृष्यं वातकोपनम्। ऋतेऽमृता पटोलीभ्यां शुण्ठीकृष्णारसो नतः॥ कषायं प्रायशः शीतं स्तम्भनं चाऽभयां विना॥ अ. हृ. सू. १०-३४-३५

भावार्थः - सामान्यतया अमृतां - पटोलं विहाय अन्यकटुद्रव्याणि तथा शुण्ठी - मरीचं - रसोनं च विहाय अन्य तिक्त द्रव्याणि तथा अवृष्यानि वातकोपश्च कुर्वन्ति। प्रायशः हरीतकी विहाय अन्यकषायद्रव्याणि शीतवीर्यकाणि तथा स्तम्भकानि सन्ति।

### रसानां वीर्य-स्निग्ध-रुक्षादि द्रव्यगुणानां निरुपणम्

**श्लोका :-**

- **रसाः** - कट्वम्ललवणा वीर्योष्णा यथोत्तरम्।

तिक्तः कषायो मधुरस्तद्वदेव च शीतलाः॥

**तिक्तः** कटुः कषायश्च रुक्षा बद्धमलास्तथा।

पट्वम्ललमधुराः स्निग्धाः सृष्टविष्मूत्रमारुताः॥

**पटोः** कषायस्तस्माच्च मधुरः परमं गुरुः ।

लघुरम्लः कटुस्तस्मात्तस्मादपि च तिक्तकः॥ अ. हृ. सू. १० - ३६ -३८

**भावार्थ** - कट्वम्ललवणरसा उत्तरोत्तराः उष्णवीर्याः भवन्ति तथा च तिक्तकषायमधुररसाः क्रमशः अत्युष्णगुणवीर्ययुक्ताः उत्तरोतरशीतवीर्याः सन्ति।

कटुरसापेक्षया अम्लरसः, अम्लरसापेक्षया लवणरसः अतीव उष्णः विद्यते। तदैव तिक्तरसापेक्षया कषायरसः, कषायरसापेक्षया मुधररसः उत्तरोत्तरः अतीव शीतलअस्ति। तिक्तः कटुः तथा कषायरसः रुक्षः तथा बद्धमलकारकाः भवति। लवणाम्लमधुररसाः मारुतकारकाः उत्तरोतराः अतीवस्निग्धाः तथा सृष्टविण्मूत्रमारुतकारकाः सन्ति। लवणापेक्षया कषाय कषायापेक्षयापि मधुररसः अधिकः गुरुः वर्तते च अम्लापेक्षया कटु तथा कटुरसापेक्षया तिक्तः रसः अतीव लघु भवति।

### स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

१. रसनेन्द्रियगाह्यो योऽर्थः स............ ?

(क) रसः (ख) वीर्यम् (ग) विपाकः (घ) प्रभावः

२. जलम् + पृथ्वी कस्य रसस्य पाञ्चभौतिकत्वम् ?

(क) मधुररसस्य (ख) अम्लरसस्य (ग) तिक्तरसस्य (घ) कटुरसस्य

३. रसानाम् कति भेदाः सन्ति ?

(क) चत्वारः (ख) षड् (ग) अष्ट (घ) नव

४. कः रसः हृद्यरसः ?

(क) कटुरसः (ख) अम्लरसः (ग) तिक्तरसः (घ) मधुररसः

५. कः रसः सर्वाधिकः उष्णवीर्यः वर्तते ?

(क) कटुरसः (ख) अम्लरसः (ग) तिक्तरसः (घ) लवणरसः

६. आजन्मसात्म्यरसः कः ?

(क) मधुररसः (ख) अम्लरसः (ग) तिक्तरसः (घ) लवणरसः

७. अमृता कस्य रसस्य द्रव्यमस्ति ?

(क) तिक्तरसस्य (ख) कटुरसस्य (ग) अम्लरसस्य (घ) मधुररसस्य

८. पिपीलिकादीनां कृते कः प्रियः रसः ?

(क) कटुरसः (ख) अम्लरसः (ग) मधुररसः (घ) लवणरसः

९. कषायरसस्य द्रव्यं किम् ?

(क) मरीचिका (ख) चिरायना (ग) हरीतकी (ड) शर्करा

**२. एकैकवाक्येन उत्तरं लिखत ।**

१. रसस्य निरुक्तिं लिखत ?

२. शिशिरऋतौ कस्य रसस्योत्पतिः भवति?

३. मधुररसस्य द्रव्याद्रव्यं (पदार्थद्वयं) लिखत।

४. कषायरसस्य द्रव्याद्रव्यं (पदार्थद्वयं) लिखत।

५. कफविकारे भोजनपूर्वे प्रथमं किं सेवनं कर्तव्यम् ?

६. गोधूमः कस्य रसस्य द्रव्यं विद्यते ?

७. कस्य रसस्य सेवनेन मुखे जलस्रावो जायते ?

**३. लघुत्तरीयाः प्रश्नाः।**

१. षड्रसानां पाञ्जभौतिकत्वं ऋत्वनुसारं लिखत।

२. आहारे रसप्रयोगक्रमं लिखत।

३. अम्ल-लवण-कटुरसानां द्रव्याणि लिखत।

४. मधुररसस्य लक्षणं सम्यक् प्रतिपादयत।

**४. सविस्तरम् उत्तराणि ददत ।**

१. मधुर-तिक्तरसयोः भेदं प्रतिपादयन।

**५. विस्तृतप्रश्नाः समाधेयाः।**

१. षड्रसानां लक्षणं विस्तरेण लिखत।

२. षड्रसानां कार्याणि सम्यक् प्रतिपादयत।

३. षड्रसानामतियोगेन (अधिकसेवनेन) किम् - किम् भवति।

●

# १९ विपाकः

– निरुक्तिः –विशिष्टः जरणनिष्ठाकाले द्रव्यस्य पाकः परिणितः विपाकः। च. सू. २६ - ५७ - ५८ गंगाधर टीकायाम् च)

अर्थात् पाचनक्रियान्ते द्रव्यस्य परिणित– विपाकः कथ्यते। पाचनस्यान्ते अर्थात् घनिष्ठा (अन्तिमकाले) प्रक्रिया भवति तेन कारणेन निष्ठापाक इति अपरं नाम विद्यते।

– व्याख्या – परिणामलक्षणो विपाकः (र.वै. १.१.७०)

जठरेणाग्निनना योगाद्यदुदेति रसान्तरम्।

रसानां परिणामान्ते स विपाक इति स्मृतः॥ (अ. ह.सू. ९ - २०)

जठराग्निव्यापारसमाप्त्यन्तरम् पाचनक्रियान्ते यत् द्रव्यस्य वा रसमय परिणामं भवति सः विपाक इति कथ्यते। आयुर्वेदे आहारस्य पाकस्य च प्रकारद्वयम्

(१) अवस्थापाकम्।

(२) निष्ठापाकम्

**( १ ) अवस्थापाकम्** – प्रथमत्वेन आहारद्रव्याणाम् अवस्थापाकः भवतति अतः प्रपाक (प्रथमः पाकः – प्रपाकः)इति कथ्यते।

आहारं महास्त्रोतगम्यानन्तरं जठराग्निसम्पर्केन तस्य रुपरसयोः परिवर्तने विभिन्नता च भवति। क्रमशः पाचनकारणात् तत्र अनेकमलानामं प्रादुर्भावो भवति तदा अन्ते मलमूत्रयोः पृथ्थकरणं सञ्जातम् पाचनव्यापारोऽयं अवस्थापाक इति कथ्यते कारणम् महास्रोतस्य अवस्थानुसारम् परिवर्तनं भवति। युक्ताहारस्य महास्रोतस्य विभिन्नविभागे अवस्थिकाः पाकाः सम्भवन्ति स एव अवस्थापाकः कथ्यते।

अन्नस्य भुक्तमात्रस्य षड्रसस्य प्रपाकतः।
मधुराद्यात् कफाभावात् फैनभूतं उदीर्यते॥
परं तु पच्यमानस्य विदग्धास्याम्लभावतः।
आशयाञ्च्यवमानस्य पित्तम् अच्छमुदीर्यते॥
पक्वाशयं तु प्राप्तस्य शोष्यमाणस्य वहिना।
परिपिण्डितपक्वस्य वायुः स्यात् कटुभावतः॥ च. चि. १५ - ९ - ११

**अवस्थापाकस्य त्रिविधावस्था**

(१) प्रथमावस्था – आमाशये सम्पन्ना भवति यत्र मधुररसबाहुल्यात् मलभूतकफस्योत्पतिः भवति।

(२) द्वितीयावस्था – पच्यमानाशये भवति यत्र अम्लरसाधिक्यात् मलभूतपित्तस्य प्रादुर्भावो भवति॥

(३) तृतीयावस्था – पक्वाशये भवति यत्र कटुरसाधिक्यात् मलभूतवायोः प्रादुर्भावो भवति।

**( २ ) निष्ठापाकः ( विपाकः )** – आहारौषधद्रव्यानां जठराग्निना पाकानन्तरं तस्मात् यस्य रसस्योत्पतिः भवति स एव पाकेन वा निष्पाकेन ज्ञायते। आहारौषधद्रव्यानां स्वस्य स्वाभाविकरसं विहाय अन्यरसस्योत्पतिः भवति। रस एव निष्ठापाकः।

- रसो निपाते द्रव्याणां विपाको कर्मनिष्ठया। च. सू. २६ - ६६
- विद्यात् विपाकं द्रव्याणां कर्मणः परिनिष्ठया। अ.सं.सू. १७

द्रव्येषु कः रसः वर्तते स तु द्रव्यस्य जिह्वार्स्पर्शेन एव ज्ञायते परन्तु तस्य विपाकः (निष्ठापाकः) तु तस्य पाचनान्तरे शरीरात् वा दोषवृद्धिक्षयात् वा तस्य क्रियोपलब्धत्वात् एव ज्ञायते।

**विषाकस्तु रसामलविवेकसमकालो ।** चक्रपाणि विपाकस्योत्पतिसमयस्तु आहारपाचनस्य तृतीये क्रमे सारकिट्टविभजनस्य वा शोषणस्यास्ति।

**अवस्थापाके निष्ठापाके च भिन्नता**

अवस्थापाके एवं निष्ठापाके समयात् उत्पतिस्थानात् कर्मणश्च भेदः दरिदृश्यते। मधुरादि अवस्थापाकाः क्रमशः भोजनानन्तरं अन्नस्यपच्यमानावस्थायाम् एवम् आहारपचनस्यान्ते उत्पन्नाः भवन्ति। किन्तु निष्ठापाकाः आहारसम्पूर्णपचनान्तरं सारकिट्टविभाजने उत्पन्नाः भवन्ति। अवस्थापाकस्य स्थानं अनुक्रमेण अमाशयः, पच्यामाशय तथा पक्वाशयः वर्तते तदा निष्ठापाकस्य स्थानं पच्यामाशयः अस्ति अवस्थायाः प्रभावः पूर्वोक्तस्थानेषु विशेषमस्ति। अवस्थापाकेन स्थानिकदोषाणां वृद्धिः एवं प्रकोपं भवति यदा निष्ठापाकः सर्वशरीरगतदोषाणां वृद्धिकर्ता क्षयकर्ता च विद्यते।

अवस्थापाकस्य प्रभावः मलमूत्राणां विसर्जनेन वा बिबंधकारकं कर्म प्रति नास्ति यदा निष्ठापाकस्य बद्ध एवं सृष्टविष्णूत्रत्वम् इति क्रियां दर्शयति। अवस्थापाकस्य प्रभावः स्थानिकः, स्वल्पबलात्। विविधदोषद्वारा समुद्भूताः रोगानां वेगवर्धितत्वात् वा वेगोदयकर्तारं प्रति मर्यादितं, प्रत्यक्षं, प्राथमिकं च भवति । यथा निष्ठापाकस्य प्रभाः सार्वदेहिकः, प्रबलः, यस्य कस्यापि पदार्थस्य वृद्धिक्षयकर्तारुपेण, अप्रत्यक्षश्चास्ति।

यदा अवस्थायाः प्रभावः स्वल्पकालेन भवति तदा निष्ठापाकस्य प्रभावः अपेक्षाकृतः चिरकालपर्यन्तं भवति॥

**विपाकप्रकार**

विपाकविषये - तेषां प्रकारविषये आचार्याणां अनेके मतभेदाः सन्ति। संहितानुसारं केचनप्रकाराः प्रदर्शिताः।

(१) षड्विधविपाकवादः

(क) यथारसविपाकवादः

(ख) अनियतविपाकवादः

(२) पञ्चविधविपाकवादः

(३) त्रिविधविपाकवादः

(४) द्विविधविपाकवादः

**( १ ) षड्विधविपाकवादः** :- यथारसविपाकवाद एवं अनियतविपाकवादः एतयोः द्वयोः वादयोः मतेन षड्विधिविपाकवादः विद्यते।

**( क ) यथारसविपाकवादः** (सु-सू. ४० - १० च - सू २६ - ५८ योगीन्द्रनाथ सेन)

- अस्य सम्प्रदायस्य कथनमिदं यत्

मधुरादिषड्ररसानां नियतरूपेण स्वतः विपाको भवति। यथा - मधुरस्य मधुरविपाकः, अम्लस्य अम्लविपाकादि। येन प्रकारेण क्षीरस्य पाकेन सः मधुरएव भवति तथा शालियवमुद्गा एव प्रजायन्ते तेन प्रकारेण मधुरादिषड्ररसविपक्वेन स्वमाधुर्यस्वभावस्य परित्यागं न करोति। अतः मधुरसस्य विपाकः मधुरं भवति अम्लस्य अम्ल इत्यादयः षड्विपाकाः सन्तिं

(२) ख - अनियतविपाकवादः (द्रव्यगुणसंग्रहः - १ - १० शिवदासेन)

अस्य सम्प्रदायानुसारेण विपाककाले प्रबलरसाः दुर्बलरसान् नुदन्ति। अतः विपाकस्य स्वरुपं प्रबलरसानुसारं निर्धारितं भवति परन्तु कस्य रसस्य प्रबलता कदा भवति इति किञ्चित् कठिनं भवति। येन कारणेन प्रकारेण च रसस्य प्रबलता अनियता वर्तते तेन प्रकारेण रसाश्रितं विपाकमपि अनियतम् अस्ति।

मधुरसस्य विपाको मधुर एव भवति तद् अनियतं तद् तेन विपोकोऽपि अनियतो वर्तते। अस्य सम्प्रदायानुसारं विपाकस्य सङ्ख्या षड् वर्तते किन्तु विपाकस्य निर्धारणं निश्चितं नास्ति।

**( २ ) पञ्चविधविपाकपाद -**

-पञ्चभूतात्मके देहे ह्याहार: पाञ्चभौतिक:।

विपक्व: पञ्चधा सम्यग्गुणान् स्वानिभिवर्धयेत्॥ (सु. सू. ४६-५२६)

-पाञ्चभौतिकदृष्टयानुसारं आहारस्य - पञ्चधा - विपाका: सन्ति।

यथा (१) पार्थिव: (२) आप्य: (३) तेजस: (४) वायव्य: (५) नाभस:

**( ३ ) त्रिविधविपाकवाद: -**

कटुतिक्तकषायानां विपाक: प्रायश: कटु:।

अम्लोऽम्लं पच्यते स्वादुर्मधुरं लवणस्तथा ॥ (च. सू. २६ - ५८)

-आचार्याग्निवेशेन एवं आचार्यवाग्भटेन।

विपाकस्य त्रय: प्रकारा: कथिता:॥

(१) मधुरम् (२) अम्लम् (३) कटु:

-मधुररसस्य एवं लवणरसस्य विपाकं मधुरविपाक:।

-अम्लरसस्य विपाकं अम्लविपाकम् एव च।

-तिक्तकटुकषायानां विपाक: कटुविपाक: भवति।

**( ४ ) द्विविधविपाकवाद:** - सुश्रुतनागार्जुनाचार्यौ द्रव्यस्य विपाकस्य प्रकारद्वयं मन्वाते। (१) गुरु: (२) लघु:। विपाकसमये महाभूतानां गुणा: प्रकटिता: भवन्ति तेषाम् द्वौ वर्गौ स्त:। गुरूलघू भूमि: एवं जलम् गुरु: विद्यते, अन्ये शेषा: त्रयमहाभूता: (वायु: + आकाशम् + अग्नि:) लघु:।

-द्रव्येषु पच्यमानेषु येत्वम्बुपृथिवीगुणा:।

निर्वर्तन्तेऽधिकास्तत्र पाको मधुर उच्यते ॥

तेजोऽनिलाकाशगुणा: पच्यमानेषु येषु तु ।

निर्वर्तन्तेऽधिकारश्च पाक: कटुक उच्यते॥ (सु. स. ४०-२०-१२)

गुणा: विपाकयो: कारणं शीतस्निग्धगुरुपिच्छिलानि।

गुरुविपाकस्य लघुरुक्षविशदतीक्ष्णानि लघुविपाकस्येति॥ (रसवैशेषिक -१-१२३ भाष्य)

अत: विपाके महाभूतप्रधान्यानुसारं गुणानां द्रष्टयूनुसारं विभागीकरणं भवति।

यथा-

(१) शीतस्निग्धगुरुपिच्छिलादिगुणानां कारणेन गुरु: विपाको भवति।

(२) लघुरुक्षविशदतीक्ष्णादीनां गुणानां कारणेन लघु: विपाको भवति।

-गुरुविपाको मधुर एवं लघुविपाक: कटु चेति कथ्यते

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

१. रसविपाकवादीनाम् अनुसारेण कति विपाकाः सन्ति।

(क) द्वौ (ख) चत्वारः (ग) षड् (घ) अष्टौ

२. प्रथमावस्थापाके कस्य दोषोत्पत्तिः भवति।

(क) वायोः (ख) पित्तस्य (ग) कफस्य (घ) त्रिदोषस्य

३. परिणामलक्षणो ............ ।

(क) विपाकः (ख) रसः (ग) वीर्यम् (घ) अवस्थापाकः

४. अनियतविपाकवादानुसारेण मधुरस्य विपाकः कः ?

(क) मधुरम् (ख) कटुः (ग) अनिश्चितः (घ) अम्लम्

५. वाग्भटाचार्यानुसारं विपाकस्य कति प्रकाराः सन्ति

(क) त्रयः (ख) चत्वारः (ग) पञ्च (घ) षड्

६. द्विविधपाकवादं कः मनुते ?

(क) नागार्जुनः (ख) सुश्रुतः (ग) चरकः (घ) अ एवं ब

७. लघुविपाक इति ...........।

(क) मघुरविपाकः (ख) कटुविपाकः (ग) अम्लविपाकः (घ) अ एवं ब

**२. एकैकवाक्येन उत्तरं लिखत ।**

१. विपाकस्य निरुक्तिं कथयतु।

२. विपाकस्य व्याख्यां लिखत्।

३. यथारसविपाकानुसारं विपाकस्य सङ्ख्या कतिविधा ?

४. स्निग्धपिच्छिलकारणात् कः विपाको भवति ?

५. रुक्षविशदकारणात् कः विपाकः भवति ?

**३. टिप्पणीं लिखतः।**

१. अवस्थापाकस्य श्लोकान् लिखत।

२. पञ्चविधविपाकवादं लिखत।

३. त्रिविधविपाकवादं लिखत।

४. द्विविध विपाकवादं लिखत।

**४. सविस्तरम् उत्तराणि ददत ।**

१. अनियतनियतविपाकयोः भेदं प्रदर्शयत।

**५. विस्तृतप्रश्नाः समाधेयाः।**

१. विपाकप्रकाराणां वर्णनम् कुरुत।

२. अवस्थापाकस्य एवं विपाकस्य वर्णनं कुरुत।

●

| २० | वीर्यम् |
|---|---|

- **निरुक्तिः** – ''वीर विक्रान्तौ'' धातुत्वात् निष्पन्नोऽयं ''वीर्यम्'' शब्दः। अतः वीरयते विक्रान्तः कर्मसमर्थो भवति अनेन इति वीर्यम् अर्थात् येन द्रव्यं कर्मसम्पादनं समर्थं भवति तत् वीर्यम्।
- **लक्षणम्** – येन कुर्वन्ति तद् वीर्यम्। च. सू. – २६ - १३, सु.सू. – ४२ - ५

  वीर्यं द्रव्यकर्तुके कर्मणि कारणभूतो द्रव्यगुणः। सि.प्र. ९ - ३
- **स्वरुपम्** – शारीरदोषधातुमले द्रव्याणां यानि कर्माणि भवन्ति तानि कर्माणि तन्मध्ये एकाशक्तिविशेषेण सम्भवन्ति कारणं द्रव्यं वा द्रव्यकल्पना बहुदिनपर्यन्तं कर्महीना भवति वा तत्रेप्सितकर्म तु नैव दरिदृश्यते ।
- द्रव्याण्यभिनवान्येव प्रशस्तानि क्रियाविधो । (प. प्र. १ - ५३)

अतः द्रव्याणाम् अभिनवावस्थायां प्रयोगकरणस्य विधानमस्ति। तथा घृततैलकषायादि द्रव्यकल्पनायाः निश्चितसमयान्तरे निर्वीर्यम् अभवत्। तदतिरिक्तस्य द्रव्यस्य सर्वेषाम् अङ्गानाम् समानकर्म न भवति तथा च विशिष्टकर्मणि द्रव्यस्य विशिष्टाङ्गस्य प्रयोगः भवति। यथा तिल्वादेः त्वचा। दशमूलादिमूलानि एवं त्रिफलादि फलानि।

तत्र कोविदारपूर्वाणां फलानि कोविदारादीनां मूलानि। सु. सू. ३९ - ३

यदि जलेन वा आतपेन तथा अन्य अप्राकृतिकविधिपूर्वकं या शक्तिः विनष्टा भवेत् तर्हि द्रव्यस्य अभीष्टकर्म न भवति तथा च एतस्याः शक्तेः नाशः क्रियते तदापि अभीष्टकर्म न भवति।

- वीर्यस्यस्वरुपे विविधमतानि – (१) गुणवीर्यवादः ।
  (२) कर्मवीर्यवादः ।
  (३) द्रव्यवीर्यवादः ।

**(१) गुणवीर्यवादः** -

वीर्यं तु क्रियते येन या क्रिया
नावीर्यं कुरुते किञ्चित् सर्वा वीर्यकृता क्रिया ॥ च. सू. २६ - ६५

चरकाचार्यः मनुते यत् शक्तिमात्रं वीर्यम्। अनया शक्त्या एव द्रव्यगतरसविपाकादीनां कर्माणि भवन्ति। अतः एतेषु यत् प्रबलं विद्यते एवं यौः कर्मसम्पादितं भवति तेष्वैव शक्त्याः आधिक्यमिति।

सुश्रुताचार्यः एवं वाग्भटाचार्यः उत्कृष्टशक्तिसम्पन्नगुणं वीर्यं मन्वाते।

यदा गुरुलघ्वादि गुणाःशक्तिसम्पन्नाः भवन्ति तदा तेषां संज्ञा वीर्यमिति भवति। अनेन प्रकारेण गुणवीर्यवादस्य शाखाद्वयं प्रसिद्धा भवति।

(१) शक्तिमात्रवीर्यवादः (चरकाचार्यः)

(२) पारिभाषिकवीर्यवादः (सुश्रुताचार्यः, वाग्भटाचार्यः)

**(२) कर्मवीर्यवादः** – नागार्जुनाचार्यः रसान् वा गुणान् वीर्यं न मनुते कारणं रसगुणसमानत्वादपि कर्मविशिष्टं संदृश्यते अतः कर्मलक्षणशक्ति एव वीर्यमिति कथ्यते। तदतिरिक्तं रसगुणस्थिते सति वीर्यस्याभावे कर्माभावः, तथा च रसाः एवञ्च गुणाः न भवन्ति तदापि कार्यसिद्धि तु भवत्यैव यथा – मन्त्रे । अतः वीर्यस्य नाम गुणाधारेण गुरुलघ्वादि प्रस्थापितम्। अतः वीर्यस्य स्वरुपं तुं कर्मात्मकम् अतः अन्याचार्यैः यत्र वीर्यस्य नाम गुणाधारेण गुरुलघ्वादि प्रस्थापितम्। तत्र च नागार्जुनाचार्यः कर्माधारेण वीर्यस्य नाम ''छर्दनीयः'' वा ''अनुलोमनीयः'' इति प्रस्थापयति।

**(३) द्रव्यवीर्यवाद** :- वीर्यं शक्तिः सा च पृथिव्यादीनां भूतानां यः सारभागस्तदतिशयरुपा बोध्या, सा च द्विविद्या चिन्त्याचिन्त्यक्रियाहेतुत्वेन तत्र चिन्त्यक्रियाहेतुर्या द्रव्यरसादीनां स्वस्वकर्मणि स्वभावसिद्धाशक्तिः, अचिन्त्यक्रियाहेतुश्च प्रभावापरपर्याया द्रव्याणां रसाद्यननुरुपकार्यकरणशक्तिः।

उक्तं च

भूतप्रसादातिशयो द्रव्ये पाके रसे स्थितः ।
चिन्त्याचिन्त्यक्रियाहेतुः वीर्यं धन्वन्तरेर्मतम्॥

– द्रव्यगुणसंग्रह १ - ८ शिवदाससेन।

- वीर्यस्य भेदाः, प्रकाशः, संड्ख्या विविधमतानि।
- शक्तिरुपवीर्यवादी आचार्यचरकः वीर्यस्य संड्ख्या अनेका इति मनुते अतः तं बहुविधवीर्यवादी इति कथ्यते। अनेन मतानुसारेण द्रव्ये अनेकविधाः शक्तयः सन्ति यत् पदार्थेन यादृशं कार्यं भवति तादृशी शक्तेः कल्पना भवति।
- मृदु–तीक्ष्णगुरुलघुस्निग्धरुक्षोष्णशीतलम्।
  वीर्यमष्टविधं केचित् केचित् द्विविधमास्थिताः॥
  शीतोष्णमिति.......। – च. सू. २६ - ६४
  पारिभाषिकवीर्यवादस्य वा गुणवीर्यवादस्य सम्प्रदायस्य शाखाद्वयमस्ति।
  (१) अष्टविधवीर्यवादः।
  (२) द्विविधवीर्यवादः।
- गुर्वाद्या वीर्यमुच्यन्ते शक्तिमन्तोऽन्यथा गुणाः।
  परसामर्थ्यहीनत्वात् गुणा एवेतरे गुणाः ॥ अ. सं. सू. १७ - ४४

अष्टविधवीर्यवादीनां मतानुसारेण सर्वोत्कृष्टशक्ति सम्पन्नं गुणं वीर्यम् इति कथ्यते परन्तु शक्तेः उत्कृष्टता एतेषु अष्टविधगुणेषु मिलति। अतः वीर्यस्य सड्ख्या अष्टविधा वर्तते। यथा – (१) गुरुः (२) लघुः (३) शीतम् (४) उष्णम् (५) स्निग्धः (६) रुक्षः (७) मृदुः (८) तीक्ष्णम्।

गुर्वादीविंशतिगुणाः सन्ति तथापि एते अष्टौ गुणा एव उत्कर्षं प्राप्नुवन्ति वीर्यसंज्ञां च भवितुमर्हन्ति तत्सम्बन्धिनः श्लोकाः यथा –

गुर्वादिष्वेव वीर्याख्या तेनान्वर्थेऽति वर्ण्यते।
समग्रगुणसारेषु शक्त्युत्कर्षविवर्तिषु॥
व्यवहाराय मुख्यत्वाद बहवग्रग्रहणादपि।
अतश्च विपरीतत्वात् सम्भवत्यपि नैव सा,
विवक्ष्यते रसाद्येषु वीर्यं गुर्वादयो ह्यतः॥ अ. हृ. सू. ९ - १८ -२६

**( १ ) समग्रगुणसारता** :– द्रव्येषु स्थिताः, सर्वपदार्थेषु सारभूताः गुर्वादयः अष्टगुणाः सन्ति। ये गुणाः अधिकसमयेन संस्थिताः सन्ति तथा च जठराग्निसंयोगादपि तेषां स्वरुपं परिवर्तितं न भवति परन्तु रसेषु पर्याप्तं परिवर्तनं भवति।

(२) शक्त्युत्कर्षः – रसादेः एवम् अन्यगुणानामपेक्षा अत्र शक्तिविशेषरुपेण विराजते। येन रसादीन् अभिभूतं कृत्वा कार्यं करोति।

(३) व्यवहारमुख्यता – व्यवहारे गुर्वादीगुणानामेव प्रधानता दरिदृश्यते अन्यगुणानां न ।

(४) बहुलता – द्रव्येषु अन्यगुणापेक्षया एते गुणाः एव बाहुल्येन मिलन्ति।

(५) उपयोगिता – शारीरदृष्टया गुर्वादीगुणा एव अधिका उपयुक्ताः भवन्ति।

(६) प्रबलता – शक्त्युत्कर्षकारणेन प्रबलतया रसविपाकद्रव्यरसादिगुणान् अभिभूतं करोति यथा मधुररसे तीक्ष्णगुणः भवेत् तत्र मधुररसस्य कार्यं न उत्पतति।

- द्विविधवीर्यवादः – गुणवीर्यवादीनाम् एकसम्प्रदायः द्विविधवीर्यवादी वर्तते यः शीतम् उष्णम् इतिद्वयं वीर्यरुपेण स्वीकरोति। मतम् यथा संसारमिदं पाञ्चभौतिकं तथापि अग्नेः सोमस्य च तत्वद्वयस्य प्राबल्यं (प्रबलता) विद्यते। अतः जगदिदम् अग्निसोमीयं कथ्यते। कालः सूर्यचन्द्रानुसारेण आदानविसर्गयोः द्वयोः भागयोः विभक्तोऽस्ति।

त्रिदोष्वपि पित्ताग्नेयं, कफसौम्यं वातः विक्षेपगुणकारणात् योगवाहीं च मन्यते । कारणमिदं यत् शीतवस्तुसम्पर्केन शीतम् भवति, उष्णवस्तुम्पर्केन उष्णम् भवति अतः त्रिदोषस्यापि द्वयोः वर्गयोः विभाजनं कृतमस्ति। गुर्वादीगुणानामपि एतौ द्वौ वर्गौ स्तः। एतेन प्रकारेण अष्टविधवीर्यखण्डनपूर्वकं द्विविधवीर्यमण्डनं भवति।

संसारः व्यक्ताव्यक्तावस्थयोः विभक्तः। तदतिरिक्ता तृतीया नास्ति तद्वदेव वीर्यस्य द्वौ प्रकारौ स्तः।

कर्मलक्षणवीर्यवादीनां मध्ये नागार्जुनाचार्येण न कापि सङ्ख्या प्रदत्ता। कर्मानुसारेण वीर्यस्य सङ्ख्या अनेकविधा भवितुं शक्यते। चरकाचार्यवत् नागार्जुनाचार्यमपि बहुविधवीर्यवादी भवति।

**आचार्य निमिकृत वीर्यस्य पञ्चदशप्रकाराः**

(१) अधोभागहरम् = जलम् + भूमिः

(२) उर्ध्वभागहरम् = अग्निः + वायुः

(३) उभयतोभागहरम् = भूमिः + अग्निः + वायुः

(४) सांग्रहिकम् = भूमिः + वायुः

(५) संशमनम् = वायुः + जलम् + भूमिः

(६) दीपनम् = भूमिः + अग्निः

(७) जीवनीयम् = भूमिः + जलम्

(८) प्राणघ्नम् = वायुः + अग्निः

(९) मादनम् = वायुः + अग्निः

(१०) शीतीकरणम् = जलम्

(११) शोथकर = भूमिः + जलम्

(१२) शोथघ्न = आकाशम् + वायुः

(१३) पाचनम् = अग्निः

(१४) दारणम् = वायुः + अग्निः

(१५) रोपणम् = भूमिः + जलम् + वायुः

तथा च पूर्वकथितमन्यवीर्याणां पाञ्चभौतिकत्वम्।

(१६) शीतम् – भूमिः + जलम्

(१७) उष्णम् – अग्निः

(१८) स्निग्धः – जलम्

(१९) रुक्षः – वायुः

(२०) गुरुः – भूमिः + जलम्

(२१) लघुः – अग्निः + वायुः + आकाशम्

(२२) मृदुः – जलम् + आकाशम्

(२३) तीक्ष्णम् – अग्निः

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

१. येन कुर्वन्ति तद् .............. ।

(क) रसः (ख) वीर्यम् (ग) विपाकः (घ) प्रभावः

२. कर्मसम्पादने समर्थं किं भवति ?

(क) रसः (ख) वीर्यम् (ग) विपाकः (घ) प्रभावः

३. शक्तिमात्रं वीर्यम् कस्य मतमस्ति ?

(क) चरकः (ख) सुश्रुतः (ग) वाग्भटः (घ) नागार्जुनः

४. कर्मवीर्यवादी कः वर्तते ?

(क) चरकः (ख) सुश्रुतः (ग) वाग्भटः (घ) नागार्जुनः

५. आचार्यनिमिः वीर्यस्य कति प्रकारान् मनुते।

(क) द्वादशः (ख) पञ्चदशः (ग) षोडशः (घ) अष्टादशः

६. जलम् + पृथ्वी इति संघटनेन किम् वीर्यम् भवति ?

(क) अधोभागहरः (ख) उर्ध्वभागहरः (ग) उभयतोभागहरः (घ) सांग्रहिकः

७. अग्निः + वायोः इति संघटनेन किम् वीर्यम् भवति ?

(क) अधोभागहरः (ख) उर्ध्वभागहरः (ग) उभयतोभागहरः (घ) सांग्रहिकः

८. दीपनम् इति वीर्यस्य भौतिकसंघटनं किम् ?

(क) अग्निः + वायोः (ख) वायुः + जलम् (ग) भूमिः + अग्निः (घ) जलम् + वायुः + आकाशम्

**२. एकेन वाक्येन उत्तरं लिखत ।**

१. वीर्यलक्षणं लिखत ।

२. वीर्यस्य निरुक्तिं लिखत।

३. गुर्वादिगुणेषु सर्वाधिकाः सारभूताः गुणाः कति सन्ति ?

४. पाचनवीर्यस्य महाभूतसंघटनं किम् ?

५. दारणवीर्यस्य महाभूतसंघटनं किम् ?

६. लघुवीर्यस्य महाभूतसंघटनं किम् ?

७. चरकचार्यवत् कः बहुविधवीर्यवादी अस्ति ?

**३. टिप्पणीं लिखतः।**

१. गुणवीर्यवादं लिखत।

२. कर्मवीर्यवादं लिखत।

३. द्रव्यवीर्यवादं लिखत।

**४. सूचनानुसारं कुरुत ।**

**१. योग्ययुग्मं योजयत**

| अ | ब |
|---|---|
| (१) स्निग्धः | (अ) अग्निः |
| (२) रुक्षः | (ब) जलम् |
| (३) तीक्ष्णम् | (क) वायुः |
| (४) गुरुः | (ड) पृथ्वी जलम् |

**५. विस्तृतप्रश्नाः समाधेयाः।**

१. वीर्यप्रकारभेदविषये विस्तृतचर्चां कुरुत।

२. वीर्यस्वरुपविषये विविधभेदान् प्रदर्शयत।

| २१ | प्रभावः |
|---|---|

- **निरुक्तिः**- प्रभवति विशिष्टकर्मसमर्थं भवति द्रव्यमनेन इति प्रभावः। अर्थात् येन द्रव्येषु विशिष्टसामर्थ्यं भवति सः प्रभावः इत्युच्यते।

- **लक्षणम्** - रसादिसाम्ये यत् कर्म विशिष्टं तत्प्रभावजम्। - अ. हृ. सू. ९ - २६

रसवीर्यविपाकानां सामान्यं यत्र लक्ष्यते।

विशेषः कर्मणां चैव प्रभावस्तस्य सः स्मृतः ॥ च. सू. २६ - २७

यत्र रसवीर्यविपाकानां सामान्यं लक्ष्यते तथापि कर्मसु विशेषता प्रतीयते एवं च तस्य कारणम् एका विशिष्टा शक्तिः मन्यते एषैव शक्तिः प्रभा कथ्यते।

उदाहरणम् यथा - चित्रकस्य एवं दन्त्याः रसः कटुः, विपाकः कटुः, एवं च वीर्यम् उष्णम् इति समानरुपेणास्ति तथापि दन्ती रेचनमस्ति किन्तु चित्रकं नास्ति कारणमिदमेव यत् दन्त्याम् एका विशिष्टा शक्तिः अस्ति या चित्रके नास्ति स एव प्रभावोऽस्ति।

अनेन प्रकारेण विषस्य विषघ्नक्रिया वमनम् एवं विरेचनद्रव्यानां विशिष्टकर्म विविधमणीनाम् तथा औषधीनां कर्म प्रजाजन्यं भवति।

तिलम् एवं मदनफलं एते द्वे मधुरे स्तः। एते द्वे कषायतिक्तस्निग्धपिच्छिलयुक्ते स्तः।

किन्तु प्रभावकारणेन मदनफल वामकमस्ति तिलं न।

- मधुयष्टी एवं मृद्विका एते द्वे मधुरसयुक्ते, शीतवीर्ययुक्ते भवतः तथापि मृद्विका विरेचना यष्टिमधुः न।
- दुग्धम् एवं घृतम् एतयोः द्वयोः रसः मधुरः, शीतः च वीर्यम् समानं तथापि घृतम् प्रभावतः दीपनम् दुग्धम् न।
- अनेन प्रकारेण लशुनम् कटुरसविपाकः तथा स्निग्धगुरुवीर्यत्वात् कफवातशामकः न तु वर्धकः कारणम् प्रभावः एव।

**प्रभावस्य अन्योदाहरणानि।**

(१) आमलकी एवं रक्तशालिः - त्रिदोषहरः।

(२) यवकः - त्रिदोषकोपनम्।

(३) शिरीषः - विषघ्नः।

(४) निद्रा - विषवर्धनम्।

(५) अगददर्शनान् - विषहरणम्।

(६) वाजीकरणम् - शीघ्र शुक्रोत्पत्तिः।

(७) शङ्खपुष्पी - मेध्यः

(८) रक्षोघ्न-इत्यादि

स्वरुपं, प्रभावः अमीमांस्य एव अचिन्त्यास्ति।

## स्वाध्याय:

**१. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

१. रसादिसाम्ये यत्कर्म विशिष्टं तत् ............... ?

(क) वीर्यजम् (ख) रसजम् (ग) विपाकजम् (घ) प्रभावजम्

२. अधोलिखितेषु विरेचकद्रव्यं किम् ?

(क) चित्रकम् (ख) दन्ती (ग) मदनफलम् (घ) शिरीष:

३. अधोलिखितेषु दीपनद्रव्यं किम् ?

(क) धृतम् (ख) दुग्धम् (ग) उभयो: (घ) किमपि न

४. विरेचकं द्रव्यं किम् ?

(क) मृद्विका (ख) यष्टिमधु: (ग) उभयो: (घ) किमपि न

५. प्रभाव: ................ अस्ति।

(क) अमीमांस्य (ख) अचिन्त्य: (ग) चिन्त्य (घ) अ एवं ब

**२. एकैकेन वाक्येन उत्तरं लिखत ।**

१. प्रभावस्य निरुक्तिं लिखत ?

२. प्रभावस्य स्वरुपं लिखत ?

३. प्रभावकारणेन शिरीषकर्म लिखत ?

४. प्रभावकारणेन शङ्खपुष्पीकर्म लिखत ?

५. त्रिदोषहर: कस्य प्रभावेन भवति ?

**३. टिप्पणीं लिखत।**

१. प्रभावस्य त्रीणि उदाहरणानि प्रतिपादयत।

२. प्रभावस्य लक्षणं सम्यक् प्रतिपादयत।

**४. योग्ययुग्मं योजयत**

| | **अ** | | **ब** |
|---|---|---|---|
| (१) | यवक: | (अ) | शीघ्रशुक्रोत्पत्ति: |
| (२) | निद्रा | (ब) | मेध्य: |
| (३) | वाजीकरणम् | (क) | विषवर्धनम् |
| (४) | शङ्खपुष्पी | (ड) | त्रिदोषकोपनम् |

●

# २२ कर्म

- **निरुक्ति:**- क्रियते इति कर्म।

अत्र कर्म इति शब्द: कारकसम्बन्धि न किन्तु क्रियासम्बन्धि विद्यते।

- **लक्षणम्** -

संयोगे च विभागे च कारणं द्रव्यमाश्रितम्।

कर्तव्यस्य क्रिया कर्म कर्म नान्यदपेक्षते ॥ च. सू. १ - ४२

- एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणमिति कर्म लक्षणम्। वै. - सू - १ - १ - १७

संयोगे विभागे यत्कारणम् द्रव्याश्रितं भवति तत्कर्मेत्युच्यते। येन प्रकारेण लोके संयोग: विभाग: च (परिवर्तनं) कर्म विना न भवति। अन्यशब्देषु यथा शरीरे परिवर्तनकर्तार: द्रव्यगतपदार्था: कर्म इति कथ्यन्ते।

स्वरुपं - क्रियालक्षणं कर्म। (र. वै. - १ - १७१)

- कर्तव्यस्य क्रिया कर्म। (च. सू. २ - ५२)
- प्रयत्नादि कर्म चेष्टितमुच्यते। (च. सू. २ - ४९)

कर्मस्वरुपं क्रिया इति। द्रव्येण शरीरे वमनादि क्रिया भवति तत्कर्म कथ्यते। आयुर्वेदे अदृष्टस्य कृतेऽपि यत्र - तत्र द्रव्यशब्दस्य प्रयोग: विद्यते। अत: तस्य व्यावृत्यर्थे लिखितं यथा चिकित्सामध्ये प्रयुज्यमाना या क्रिया वर्तते सा एव क्रिया कर्म इति।

- प्रवृत्ति: खलु चेष्टा कार्यार्था सैव क्रिया

कर्म यत्न: कार्यसमारम्भ: च । च. वि. ८.७७

नामैवास्य प्रवृत्ति:, क्रिया, कर्म, यत्न: कार्यसमारम्भ: च अस्ति। वैशेषिकदर्शने उत्पेक्षणापक्षेपणादि चेष्टा कर्मस्वरुपं ज्ञायते । तत्र च संयोग-विभाग-वेगा: कर्मजन्या: सन्ति इति मतम्। द्रव्यगुणशास्त्रे कर्मशब्दात् द्रव्यस्य वमनादि कर्म अभिप्रेतं विद्यते।

## कर्मभेदा: प्रकाराश्च

- अधिष्ठानभेदात् द्रव्यस्य कर्मविषये प्रकारा:

(१) स्थानिककर्म।

(२) सार्वदैहिककर्म।

(३) विशिष्टकर्म।

- नाडीसंस्थानकर्मप्रकारा:

(१) मेध्यकर्म ।

(२) मदकारिकर्म।

(३) निद्राजननकर्म ।

- इन्द्रियाधिष्ठानाम् कर्मप्रकारा:

(१) नेत्रम् - चक्षुष्य:

(२) कर्ण: - कर्ण्य:

(३) नासिका - शिरोविरेचनम्

(४) त्वक् - स्वेदनम्, रोमशातन, वर्ण्य: कण्डूघ्न।

- **संस्थानकर्मप्रकाराः**
    - (१) रसवहसंस्थानस्य कर्म।
    - (२) रक्तवहसंस्थानस्य कर्म।
    - (३) श्वसनसंस्थानस्य कर्म।
    - (४) प्रजननसंस्थानस्य कर्म।
    - (५) मूत्रवहसंस्थानस्य कर्म।
    - (६) सार्वदैहिकं कर्म।
    - (७) धातुकर्म।
    - (८) दोषकर्म।

### ॥ दीपन- पाचनद्रव्याणां लक्षणानि॥

### दीपनलक्षणम्

- पचेन्नामं वह्निकृच्च दीपनं तद्यथा मिशिः शा. पू. खं - ४ - १
- या औषधिः आमं न पाचयति किन्तु जठराग्निं प्रदीप्तं करोति वा पाचनशक्तिं वर्धयति सा औषधिः दीपनमिति कथ्यते। उदा - मिशिः। जठराग्नौ मन्दे जाते सति गृहीतभोजनं वा कृतभोजनं यदा सम्यक् न पचति एवं अपक्वमेव तिष्ठति तदा आमरस इत्युच्यते।

श्लोकः- आहारस्य रसः सारो यो न पक्वोऽग्निलाघवात्।
समूलं सर्वरोगाणामाम इत्याभिधीयते॥

आमरसः अर्थात् अपक्वमन्नं सर्वदोषान् कुपितान् करोति। मिशिः जठराग्निं प्रदीप्तं करोति। किन्तु अपक्वभोजनं पाचयितुं न शक्नोति। एतादृशं केवलं प्रभावस्य कारणात् भवति।

उदाहरणरुपेण - चुल्लीमध्ये प्रक्षिप्तं काष्ठं अग्निं तु प्रदीप्तं करोति किन्तु पात्रे स्थितान् ओदनकणान् अपि पक्ष्यति एतत् आवश्यकं नास्ति।

### पाचनद्रव्याणां लक्षणम्

- पचेत्यामं न वह्निं च कुर्याद्यतद्धि पाचनम्।
  नागकेसरवाद्वद्याच्चित्रो दीपन-पाचनः॥ शा. पू. खं - ४ - २

भावार्थः - यत्द्रव्यं अपक्वमन्नं पाचयति किन्तु जठराग्निं प्रदीप्तं न करोति तत् पाचनद्रव्यं कथ्यते। उदाहरणम् - नागकेसरः।

यत्द्रव्यं जठराग्निं प्रदीप्तं करोति अपक्वम् अन्नम् अपि पाचयति तत् द्रव्यं दीपन-पाचनद्रव्यं कथ्यते।

उदाहरणम् - चित्रकः।

### संशमनं द्रव्यलक्षणम्

- न शोधयति न द्वेष्टि समान्दोषास्तथोद्धता।
  समीकरोति विषमाञ्शमनं तद्यथामृता । शा. पू. खं - ४ - ३

भावार्थः- यत् द्रव्यं शरीरमध्ये वर्धितदोषान् संशोधनप्रक्रियाद्वारा बहिर्न निष्कासयति न तु सम्प्रमाणे समुपस्थितवातदोषान् वर्धयति वा न्यूनीकरोति किन्तु न्यून-वर्धितवातादि दोषान् सम्प्रमाणं करोति तत्द्रव्यं शमनं कथ्यते।

उदाहरणम् - अमृता।

### अनुलोमनद्रव्यलक्षणम्

- कृत्वा पाकं मलानां यद्भित्वा बन्धमधो नयेत्।
  तच्चानुलोमनं ज्ञेयं यथा प्रोक्ता हरीतकी॥ शा. पू. खं - ४ - ४

भावार्थः- यत् द्रव्यं वातमूत्रपुरूषादीन् पाकं कृत्वा अर्थात् कोष्ठबद्धतां भीत्वा वायुम् अधोमार्गं नीत्वा गुदामार्गेण बहिर्निष्कासयति तद् अनुलोमनम् औषधम् इति उच्यते।

उदाहरणम् - हरीतकी।

### स्रंसनम् - औषधम्

- पक्तव्यं यदपक्त्यैव श्लिष्ठं कोष्ठे मलादिकम्।

नयत्यधः स्रंसनं तद्यथा स्यात्कृतमालकः। शा. पू. खं - ४ - ५

भावार्थः- यदौषधं पाकयोग्यं वा कोष्ठाश्चिवातमूत्रमलादीन् पाचनं विना अधोभागेन गुदामार्गेण च निष्कासयति तत् स्रसनम् इति उच्यते।

उदाहरणम् - कृतमालकः ।

### भेदनम् - औषधम्

- मलादिकमबद्धं यद्बद्धं वा पिण्डितं मलैः।

भित्वाऽधः पातयति यद्भेदनं कटुकी यथा॥ शा. पू. खं - ४ - ६

**भावार्थः**- मलमूत्रादिबद्धं - अबद्धं वा पिण्डरुपेण भेदनं कृत्वा यत् द्रव्यं गुदामार्गेण बहिः निष्कासयति तत् भेदनमुच्यते॥

उदाहरणम् - कटुकी।

### रेचनम् - औषधम्

- विपक्वं यदपक्वं वा मलादि द्रवतां नयेत्।

रेचयत्यपि तज्ज्ञेयं रेचनं त्रिवृता यथा॥ शा. पू. खं - ४ - ७

भावार्थः - पक्वं, अपक्वं मलमूत्रादीन् द्रव्यस्वरूपे परिणम्य अधोमार्गे नीत्वा गुदामार्गेण यद् द्रव्यं बहि - निष्कासयति तत् द्रव्यं रेचन - औषधम् इति उच्यते। उदा - त्रिवृता।

### वामक - औषधम्

- अपक्वं पित्तश्लेष्माणो बलादूर्ध्वम् नयेत्तु यत्।

वमनं विज्ञेयं च तथा मदनस्य फल तथा॥ शा. पू. खं - ४ - ८

भावार्थः- यत् औषधम् अपक्वं, पित्तं, श्लेषं च स्वप्रभावेण बलात् उर्ध्वं नीत्वा मुखमार्गेण बहिः-निष्कास्यति तत् वमनं इत्युच्यते। उदा. मदनफलम्।

### संशोधनम् ओषधम्

- स्थानाद् बहिर्नयेदूर्ध्वमधो वा मलसंचयम्।

देहसंशोधनं तत्स्याद् देवदालीफलं यथा॥ शा. पू. खं - ४ - ९

भावार्थः- स्वस्थाने संचितमलं (एकत्रितं मूलं) यत् औषधं उर्ध्वं नीत्वा मुखेन नासिकया वा तथा अधोमार्गं नीत्वा गुदामार्गेण बहिर्निष्कासयति तथा च शरीरं शुद्धंकरोति तत् संशोधनं द्रव्यमुच्यते।

उदाहरणम् - देवदालीफलम्

### छेदन - औषधम्

- शिलष्ठान्कफादिकान्दोषानुन्मूलयति यद्बलात्।

छेदनं तद्यथा क्षारा मरिचानि शिलाजतु ॥ शा. पू. खं - ४ - १०

भावार्थः- यदौषधं परस्परमिलितान् कफादिदोषान् स्वशक्त्या भिन्नं, करोति, तस्य उन्मूलनं करोति तत् छेदनं औषधम् इति उच्यते॥

उदाहरणम्- क्षारं, मरिचम्, शिलाजित्।

### लेखन - औषधम्

- धातून्मलान्वा देहस्य विशोष्योल्लेखयेच्च यत्।

लेखनं तद्यथा क्षौद्रं नीरमुष्णं वचा यवाः ॥ शा. पू. खं - ४ - ११

भावार्थः- यत् औषधं रस-रक्तादिधातून् तथा वात-पित्त-कफादिदोषान् शोषयित्वा शरीरं निर्मलं करोति तत् लेखनौषधम् कथ्यते।

उदाहरणम् - मधु, उष्णजलं, यवाः।

**ग्राही - औषधम्**

दीपनं पाचनं यत्स्यादुष्णत्वाद् द्रवशोषकम्।

ग्राही तच्च यथा शुण्ठी जीरकं गजपिप्पली॥ शा. पू. खं - ४ - १२

भावार्थः- यदौषधं जठराग्निं प्रदीप्तं करोति तथा आमस्य पाचनं करोति एवम् उष्णवीर्ये सति जलस्य शोषणमपि करोति तत् ग्राही औषधमुच्यते।

उदाहरणम् - शुण्ठी, जीरकं, गजपिप्पली।

**स्तम्भक-औषधम्**

- रौक्ष्यात्छैत्यात्कषायत्वाल्लघुपाकाच्च यद्भवेत्।

वातकृत्स्तम्भनं तत्स्याद्यथा वत्सकटुण्कुकौ ॥ शा. पू. खं - ४ - १३

भावार्थः- यत् औषधं रुक्षं शीतं कषायम् एवं पाचने लघुः अस्ति तत् वायोः प्रतिलोमनं कृत्वा अधोगामीमलादीन् स्तम्भनं करोति अर्थात् अवरोधयति तत् स्तम्भकम् औषधम् कथ्यते। उदा - वत्सकः टुण्टुकः।

**रसायनम् औषधम्**

रसायनं च तज्ज्ञेयं यज्जराव्याधिनाशम्

यथाऽमृता रुदन्ती च गुग्गुलुश्च हरीतकी॥ शा. पू. खं - ४ - १४

भावार्थः- यदौषधं शरीरस्य जरां रोगं च नाशयति तत् रसायनम् इति उच्यते।

उदाहरणम् - अमृता, सदन्ती, गुग्गुलः, हरीतकी।

**वाजीकरम् औषधम्**

यस्माद् द्रव्याभ्दवेत्स्त्रीषु हर्षो वाजीकरं च तत्।

यथा नागबलाऽऽद्याः स्युर्बीजं च कपिकच्छुजम्॥ शा. पू. खं - ४ - १५

भावार्थः- यत् औषधं पुरूषाय स्त्रीसम्भोगसमये हर्षयुक्तशक्तिं प्रददाति तत् वाजीकरं उच्यते । उदा : नागबला, कपिकच्छुबीजम्।

**शुक्रल - औषधम्**

यस्माच्छुक्रस्य वृद्धिः स्याच्छुक्रलं हि तदुच्यते।

यथाऽऽश्वगन्धा मुसली शर्करा च शतावरी ॥ शा. पू. खं - ४ - १६

भावार्थ :- येन औषधेन शुक्रस्य अभिवृद्धिः भवति तत् शुक्रलम् कथ्यते।

यथा - अश्वगंधा, मुसली, शतावरी, शर्करा।

**शुक्रजनकम् औषधम्**

दुग्धं माषाश्च भल्लातफलमज्जाऽऽमलानि च।

प्रवर्तकानि कथ्यन्ते जनकानि च रेतसः॥ शा. पू. खं - ४ - १७

भावार्थः- दुग्धं, माषाः, भल्लातक, फलमज्जा आमलकादि च शुक्रस्य प्रवर्तकानि एवं जनकानि (उत्पत्तिकारकाणि) भवन्ति।

**वाजीकरण - द्रव्यविशेषम्**

- प्रवर्तनी स्त्री शुक्रस्य रेचनं बृहती फलम्।

जातीफलं स्तम्भकं च शोषणी च हरीतकी ॥ शा. पू. खं - ४ - १८

भावार्थ :- स्त्री (दर्शनालिंगनस्पर्शसंभाषणेन) वीर्यप्रवर्तनं कुर्वती भवति अर्थात् स्त्रियां प्रवृत्यां स्थिते सति शीघ्रं हि शुक्रधातुमध्ये पुरूषाणां कृते चेतना उद्भवति।

उदाहरणम् - बृहतीफलम् - वीर्यस्य रेचनं - जातीफलम् स्तम्भकं - हरीतकी - शोषणकारकं भवति।

**सूक्ष्म - औषधम्**

- देहस्य सूक्ष्मछिद्रेषु विशेद्यत्सूक्ष्ममुच्यते।

  तद्यथा सैन्धवं क्षौद्रं निम्बतैलं रुबूद्भवम्॥ शा. पू. खं - ४ - १९

  भावार्थः- यदौषधं शरीरस्य सूक्ष्मातिसूक्ष्मछिद्रेषु प्रविशति तत् सूक्ष्मौषधम् उच्यते।

  यथा - सैन्धवम्, मधु, नीम्बतैलम् इत्यादयः।

**व्यवायी औषधम्**

- पूर्व व्याप्याखिलं कायं ततः पाकं च गच्छति।

  व्यवायी तद्यथा भङ्गा फेनं चाहिसमुद्भवम्ष॥ शा. पू. खं - ४ - २०

  भावार्थः- यत द्रव्यं आमाशयं प्राप्य पाचनस्य पूर्वमेव सम्पूर्णे शरीरे व्याप्यते तत्पश्चात् तस्य पाचनं भवति तत् व्यवायी औषधमुच्यते।

  उदाहरणम् - भङ्गा।

**प्रमाथि औषधम्**

- निजवीर्येण यद् द्रव्यं स्रोतोभ्यो दोषसञ्चयम्।

  निरस्यति प्रमाथि स्यात्तद्यथा मरिचं वचा॥ शा. पू. खं - ४ - २४

  यदौषधं निजवीर्वेण स्रोतेषु संस्थितेषु कफादि दोषान् दूरीकरोति तत् प्रमाथि औषधम्। यथा - मरिचं, वचा।

**अभिष्यंदि - द्रव्यम्**

- पैच्छिल्यादगौरवाद् द्रव्यं रुद्ध्वा रसवहाः शिराः।

  धत्ते यद्गौरवं तत्स्यादभिष्यन्दि यथा दधि॥ शा. पू. खं - ४ - २५

  भावार्थः- यदौषधम् पैच्छिल्यात् गुरुत्वाद् रसवाहिशिराणां मार्गम् अवरोध्य शरीरं भाररूपं करोति तत् अभिष्यंदि द्रव्यम् उच्यते।

यथा - दधि।

**विकाशि औषधम्**

- सन्धिबन्धांस्तु शिथिलान्यन्करोति विकाशि तत्।

  विश्लेष्यौजश्च धातुभ्यो यथा क्रमुककोद्रवाः शा. पू. खं - ४ - २१

  भावार्थः- यदौषधं शरीरस्य सन्धिबन्धान् शिथिलीकृत्य रसादिधातुभ्यः समुत्पन्नं ओज अपि शिथिलीकरोति।

  यथा - पूंगीफलम्।

**मदकारि औषधम्**

- बुद्धिं लुम्पति यद् द्रव्यं मदकारि तदुच्यते।

  तमोगुणप्रधानं च यथा मद्याऽऽसुरादिकम्॥ शा. पू. खं - ४ - २२

  भावार्थः- यस्य सेवनेन बुद्धिः विलुप्ता भवति, तत् द्रव्यं मदकारी द्रव्यम् उच्यते।

  एतानि औषधानि तमोगुणप्रधानानि भवन्ति बुद्धिं च आच्छादयन्ति।

  उदाहरणम्- मदिरा, सुरा।

**प्राणहारकं द्रव्यम्**

- व्यवायि च विकाशि स्यात्सूक्ष्मं छेदि महावहम्।

  आग्नेयं जीवितहरं योगवाहि स्मृतं विषम्॥ शा. पू. खं - ४ - २३

  भावार्थ :- व्यवायि - विकाशि - सूक्ष्म - छेदक - मदाकाद्रिव्याणि आग्नेयं तथा योगवाहि भूत्वा प्राणहरणमौषधम् इत्युच्यते।

## दशेमानीगणाः चरकसंहिताधारेण

(१) जीवनीय - महाकषायः
(२) बृंहणीयमहाकषायः
(३) लेखनीयमहाकषायः
(४) भेदनीयमहाकषायः
(५) सन्धानीयमहाकषायः
(६) दीपनीयमहाकषायः
(७) बल्य - महाकषायः
(८) वर्ण्यमहाकषायः
(९) कंण्ठ्यमहाकषायः
(१०) हृद्यमहाकषायः
(११) तृप्तिघ्न- महाकषायः
(१२) अर्शोघ्नमहाकषाय
(१३) कुष्ठघ्नमहाकषायः
(१४) कण्डूघ्नमहाकषायः
(१५) कृमिघ्नमहाकषायः
(१६) विषघ्नमहाकषायः
(१७) स्तन्यजननमहाकषायः
(१८) स्तन्यशोधनमहाकषायः
(१९) शुक्रजननमहाकषायः
(२०) शुक्रशोधनमहाकषायः
(२१) स्नेहोपगमहाकषायः
(२२) स्वेदोपगमहाकषायः
(२३) वमनोपगमहाकषायः
(२४) विरेचनोपगमहाकषायः
(२५) आस्थापनोपगमहाकषायः
(२६) अनुवासनोपगमहाकषायः
(२७) शिरोविरेचनोपगमहाकषायः
(२८) छर्दिनिग्रहणमहाकषायः
(२९) तृष्णानिग्रहणमहाकषायः
(३०) हिक्कानिग्रहणमहाकषायः
(३१) पुरीषसंग्रहणीयमहाकषायः
(३२) पुरीषविरजनीयमहाकषायः
(३३) मूत्रसंग्रहणीयमहाकषायः
(३४) मूत्रविरजनीयमहाकषायः
(३५) मूत्रविरेचनीयमहाकषायः
(३६) कासहरमहाकषायः
(३७) श्वासहरमहाकषायः
(३८) शोषहरमहाकषायः
(३९) ज्वरहरमहाकषायः
(४०) श्रमहरमहाकषायः
(४१) वातप्रशमनमहाकषायः
(४२) शीतप्रशमनमहाकषायः
(४३) उदर्दप्रशमनमहाकषायः
(४४) अङ्गमर्दप्रशमनमहाकषायः
(४५) शूलप्रशमनमहाकषायः
(४६) शोणितस्थापनमहाकषायः
(४७) वेदनास्थापनमहाकषायः
(४८) संज्ञास्थापनमहाकषायः
(४९) प्रजास्थापनमहाकषायः
(५०) वयस्थापनमहाकषायः

### ॥ चरकोक्त- अग्र्यसंग्रहः ॥

- चरकसंहिता - सूत्रस्थानं २५ सर्वश्रेष्ठं आहार-औषधद्रव्यं हितकरं अहितकरं च।

| क्रम | भोज्यं( आहार ) द्रव्यम् औषधद्रव्यम् च। | एतेषां सर्वश्रेष्ठकर्मक्षेत्रं कृते हितकरम् ( श्रेष्ठ ) कृते | एतेषां सर्वश्रेष्ठकमक्षेत्रं अहितकरम् |
|---|---|---|---|
| (१) | अन्नम् | वृत्तिकाराणाम् | |
| (२) | उदकम् | आश्वासकाराणाम् | |
| (३) | सुरा | श्रमहरणाम् | |
| (४) | क्षीरम् | जीवनीयानां | |
| (५) | मांसरसः | बृंहणीयानाम् | |
| (६) | मांसरसः | तर्पणीयानाम् | |
| (७) | लवणम् | अन्नद्रव्यरुचिकराणाम् | |

| | | | |
|---|---|---|---|
| (८) | अम्लम् | हृद्यानाम् | |
| (९) | कुक्कुटो | बल्यानाम् | |
| (१०) | नक्ररेत: | वृष्याणाम् | |
| (११) | मधु | श्लेष्मपित्तप्रशमनानाम् | |
| (१२) | घृतं | वातपित्तप्रशमनानाम् | |
| (१३) | तैलम् | वातश्लेष्मप्रशमनानाम् | |
| (१४) | क्षार: | पुरूषत्वोपघातीनाम् | पुंस्त्वोपधानीनाम् |
| (१५) | तिन्दुकम् | | अन्नद्रव्यारुचिकराणाम् |
| (१६) | आमं, कपित्थम् | | अकण्ठयानाम् |
| (१७) | अजाक्षीरम् | शोषघ्नस्तन्यस्यात्मरक्त सांग्रहिकरक्तपित्तप्रशमनानाम् | |
| (१८) | अविक्षीरम् | श्लेष्मपित्तजनानाम् | |
| (१९) | आविकसर्पि: | अहृद्यानाम् | |
| (२०) | महिषीक्षीरम् | स्वप्नजननानाम् | |
| (२१) | मन्दकं दधि | | अभिष्यन्दकराणाम् |
| (२२) | गवेधुकान्नम् | | कर्शनीयानाम् |
| (२३) | उदलकान्नम् | | विरुक्षणीयानाम् |
| (२४) | इक्षु: | मूत्रजननानाम् | |
| (२५) | यवा: | पुरीषजननानाम् | |
| (२६) | जाम्बवम् | | वातजननानाम् |
| (२७) | शष्कुल्य: | | श्लेष्मपित्तजननानाम् |
| (२८) | कुलत्थ | | अम्लपित्तजननानाम् |
| (२९) | माषा: | | श्लेष्मपित्तजननानाम् |
| (३०) | मदनफलं | वमनास्थापनानुवासयोगिनाम् | |
| (३१) | त्रिवृत् | सुखविरेचनानाम् | |
| (३२) | चतुरङ्गगुल: | मृदुविरेचनानाम् | |
| (३३) | स्नुक्पय: | तीक्ष्णविरेचनानाम् | |
| (३४) | प्रत्यक्पुष्पा | शिरोविरेचनानाम् | |
| (३५) | विडंङ्गम् | कृमिघ्नानाम् | |
| (३६) | शिरीष: | विषघ्नानाम् | |
| (३७) | खदिर: | कुष्ठघ्नानाम् | |
| (३८) | रास्ना | वातहराणाम् | |
| (३९) | आमलकम् | वय:स्थापनानाम् | |
| (४०) | हरीतकी | पथ्यानाम् | |
| (४१) | एरण्डमूलम् | वृष्यवातहराणाम् | |
| (४२) | पिप्पलीमूलम् | दीपनीय-पाचनीयानाहप्रशमनानाम् | |
| (४३) | चित्रकमूलम् | दीपन-पातनगुद्दशौयार्शशूलहराणां | |

| | | |
|---|---|---|
| (४४) | पुष्करमूलम् | हिक्काश्वासकासपार्श्वशूलहराणाम् |
| (४५) | मुस्तम् | सांग्रहिक दीपन-पाचनीयानाम् |
| (४६) | उदीच्यम् | निर्वापणदीपन-पाचनछदीअतिसारक्राणाम् |
| (४७) | कट्वङ्गाम् | सांग्रहिकपाचनदीपनीयानाम् |
| (४८) | अनन्ता | साग्रहिकरक्तपित्तोपशमनानाम् |
| (४९) | अमृता | साग्रहिकदीपनश्लेष्मशोणितवातहरविबन्धप्रशमनानां |
| (५०) | बिल्वम् | सांगहिक-दीपनीयवातकफप्रशमनानाम् |
| (५१) | अतिविषा | दीपनपाचनी सांग्राहिकसर्वदोषहराणाम् |
| (५२) | उत्पलकुमुदपद्मकिञ्जल्कः | रक्तपित्तप्रशमनानाम् (सांग्राहिकः) |
| (५३) | दुरालभा | पित्तश्लेष्मप्रशमनानाम् |
| (५४) | गन्धप्रियङ्गाः | शोणितपित्तातियोगप्रशमनानाम् |
| (५४) | कट्जत्वम् | श्लेष्मपित्तरक्तसांग्रहिककोपशोषणानाम् |
| (५५) | काश्मर्यफलम् | रक्तसंग्राहिकरक्तपित्तप्रशमनानां |
| (५६) | पृश्निपर्णी | सांग्रहिकवातहरदीपनीयवृष्याणाम् |
| (५७) | विदारिगन्धा | वृष्यसर्वदोषहराणाम् |
| (५८) | बला | सांग्रहिकबल्यवातहरणाम् |
| (५९) | गोक्षुरकः | मूत्रकृच्छानिलहराणाम् |
| (६०) | हिङ्गुनिर्यास | छेदनीयदीपतीयानुलोपनीयवातकफप्रशममनानाम् |
| (६१) | अम्लवेतसः | भेदनीयदीपनीयानुलोमनीकवातश्लेष्महराणाम् |
| (६२) | यावशूकः | स्रसनीयपाचनीयार्शोध्यानानां |
| (६३) | तक्राभ्यासः | ग्रहणीदोषशोफार्शोघृतव्यापत्प्रशमनानां |
| (६४) | क्रव्यन्मांसरसभ्यासः | ग्रहणीदोषशोष - र्शोघ्नानां |
| (६५) | क्षीरघृताभ्यासः | रसायनानाम् |
| (६६) | समघृतसक्तु-प्राशाभ्यासः | वृष्योदावर्तहराणाम् |
| (६७) | तैलगण्डूषाभ्यासः | दन्तबलरुचिकराणाम् |
| (६८) | चन्दनम् | दुर्गन्धहरदाहनिर्वापणप्रलेपानाम् |
| (६९) | रास्नागुरुणी | शीतपनयनप्रलेपनानाम् |
| (७०) | लामज्जकोशीरम् | दाहत्वक्दोषस्वेदापनयनप्रलेपनानाम् |
| (७१) | कुष्ठम् | वातहराभ्यङ्गोपनाहोपयोगिनाम् |
| (७२) | मधुकम् | चक्षुष्यवृष्यकेश्यकण्ठवर्णविरजनीयरोपणीयानाम् |
| (७३) | वायुः | प्राणसंज्ञाप्रदानहेतूनाम् |
| (७४) | अग्निः | आमस्तम्भशीतशूलोद्वेपनप्रशमनानाम् |
| (७५) | जलम् | स्तम्भनीयानाम् |
| (७६) | मृद्रभृष्टलोष्ट्र-निर्वापितमुदकम् | तृष्णाच्छर्द्यतियोगप्रशमनानाम् |
| (७७) | अतिमात्राशनम् | आमप्रदोषहतूनाम् |
| (७८) | यथाग्न्यभ्यव्यवहारः | अग्निसन्धुक्षणानां |
| (७९) | यथासात्म्यम् | चेष्टाभ्यवहारो सेव्यानां |

| | |
|---|---|
| (८०) कालभोजनम् | आरोग्यकराणाम् |
| (८१) तृप्तिः | आहारगुणानाम् |
| (८२) वेगसन्धारणम् | अनारोग्यकाराणाम् |
| (८३) मद्यम् | सौमनस्यजननानाम् |
| (८४) मद्याक्षेपः | धितिस्मृतिहराणाम् |
| (८५) गुरूभोजनम् | दुर्विपाककराणाम् |
| (८६) एकाशनभोजनम् | सुखपरिणामकराणाम् |
| (८७) स्त्रीष्वतिप्रसङ्गः | शोषकराणाम् |
| (८८) शुक्रवेगनिग्रहः | षाण्ढयकराणाम् |
| (८९) पराघातनम् | अन्नाश्रद्धाजननानाम् |
| (९०) अनशनम् | आयुषोह्रासकराणाम् |
| (९१) प्रमिताशनम् | कर्शनीयानाम् |
| (९२) अजीर्णाध्यशनम् | ग्रहनीदूषणानाम् |
| (९३) विषमाशनम् | अग्निवैषम्यकराणाम् |
| (९४) विरुद्धवीर्याशनम् | निन्दितव्याधिकराणाम् |
| (९५) प्रशमः | पथ्यानाम् |
| (९६) आयासः | सर्वापथ्यानाम् |
| (९७) मिथ्यायोगः | व्याधिकराणाम् |
| (९८) रजस्वलाभिगमनम् | अलक्ष्मीमुखानाम् |
| (९९) ब्रह्मचर्यम् | आयुष्याणाम् |
| (१००) परदाराभिगमनम् | अनायुष्यानाम् |
| (१०१) सङ्कल्पः | वृष्याणाम् |
| (१०२) दौर्मनस्यम् | अवृष्याणाम् |
| (१०३) अयथाबलमारम्भः | प्राणोपरोधिनाम् |
| (१०४) विषादः | रोगवर्धनानाम् |
| (१०५) स्नानम् | श्रमहराणाम् |
| (१०६) हर्षः | प्रीणनानाम् |
| (१०७) शोकः | शोषणानाम् |
| (१०८) निवृत्तिः | पुष्टिकराणाम् |
| (१०९) पुष्टिः | स्वप्नकराणाम् |
| (११०) अतिस्वप्नः | तन्द्राकराणाम् |
| (१११) सर्वरसाभ्यासः | बलकराणाम् |
| (११२) एकरसाभ्यासः | दौर्बल्यकराणाम् |
| (११३) गर्भशल्यम् | आहार्याणाम् |
| (११४) अजीर्णम् | उद्धार्याणाम् |
| (११५) बालः | मृदुभेषजीयानाम् |
| (११६) वृद्धः | याप्यानाम् |

| | | |
|---|---|---|
| (११७) | गर्भिणी | तीक्ष्णौषशधव्यवायव्यायामवर्जनीयानाम् |
| (११८) | सौमनस्यम् | गर्भधारणानाम् |
| (११९) | सन्निपातः | दुश्चिकित्सानाम् |
| (१२०) | आमः | विषमचिकित्सानाम् |
| (१२१) | ज्वरः | रोगाणाम् |
| (१२२) | कुष्ठम् | दीर्घरोगाणाम् |
| (१२३) | राजयक्ष्मा | रोगसमूहानाम् |
| (१२४) | प्रमेहः | अनुषङ्गिणाम् |
| (१२५) | जलौकसः | अनुशस्त्राणाम् |
| (१२६) | बस्तिः | तन्त्राणाम् |
| (१२७) | हिमवानौषधिः | भूमिनाम् |
| (१२८) | सोमः | औषधीनाम् |
| (१२९) | मरूभूमिः | आरोग्यदेशानाम् |
| (१३०) | आनूपः | अहितदेशानाम् |
| (१३१) | निर्देशकारित्वम् | आतुरगुणानाम् |
| (१३२) | भिषक् | चिकित्साङ्गानाम् |
| (१३३) | नास्तिकः | वर्ज्यानाम् |
| (१३४) | लौल्यम् | क्लेशकराणाम् |
| (१३५) | अनिर्देश्यकारित्वम् | अरिष्टानाम् |
| (१३६) | अनिर्वेदः | वार्तलक्षणानाम् |
| (१३७) | वैद्यसमूहः | निःसंशयकराणाम् |
| (१३८) | योगः | वैद्यगुणानाम् |
| (१३९) | विज्ञानम् | औषधीनाम् |
| (१४०) | शास्त्रसहितः | तर्कःसाधनानाम् |
| (१४१) | सम्प्रतिपतिः | कालज्ञानप्रयोजनानाम् |
| (१४२) | अव्यवसायः | कालातिपत्तिहेतूनाम् |
| (१४३) | दुष्टकर्मता | निःसंशयकराणाम् |
| (१४४) | असमर्थता | भयकारणाम् |
| (१४५) | तद्विद्यसम्भाषा | बुद्धिवर्धनानाम् |
| (१४६) | आचार्यः | शास्त्राधिगमहेतूनाम् |
| (१४७) | आयुर्वेदः | अमृतानाम् |
| (१४८) | सद्वचनम् | अनुष्ठेयानाम् |
| (१४९) | असद्ग्रहणम् | सर्वाहितानाम् |
| (१५०) | सर्वसन्यासः | सुखानाम् |

## स्वाध्यायः

**१. योग्यं विकल्पं चित्वा उत्तराणि लिखत ।**

१. क्रियते इति ............ ।

(क) द्रव्यम् (ख) गुणः (ग) कर्म (घ) करणम्

२. कः भेदः नाडीसंस्थानकर्मणः न विद्यते ?

(क) मेध्यकर्म (ख) सार्वदेहिककर्म (ग) मदकारिकर्म (घ) निद्राजननकर्म

३. मिशेः कर्म किम् ?

(क) दीपनम् (ख) पाचनम् (ग) संशमनम् (घ) संशोधनम्

४. त्रिवृता कस्योदाहरणं विद्यते ?

(क) भेदनस्य (ख) छेदनस्य (ग) रेचनस्य (घ) वामकस्य

५. कृष्णजलस्य कर्म किम् ?

(क) ग्राहि (ख) स्तम्भनम् (ग) पाचनम् (घ) दीपनम्

६. ''संशोधनम्'' औषधस्य उदाहणम् किम्?

(क) पूगीफलम् (ख) मदनफलम् (ग) देवदालीफलम् (घ) आमफलम्

७. किमौषधम् सन्धिबन्धान् शिथिलीकोरति ?

(क) मदकारि (ख) रेचनम् (ग) विषम् (घ) विकाशि

८. ............ आश्वासकराणाम्।

(क) अन्नम् (ख) उदकम् (ग) सुरा (घ) दुग्धम्

९. .......... अमृतानाम्।

(क) आचार्यः (ख) देवः (ग) सद्वचनम् (घ) आयुर्वेदः

**२. एकैकवाक्येन उत्तरं लिखत ।**

१. कर्मनिरुक्तिं लिखत।

२. नाडीसंस्थानस्य कर्मप्रकारान् लिखत।

३. अधिष्ठानभेदात् द्रव्यस्य कर्मप्रकारान् लिखत।

४. संशमनम् द्रव्यलक्षणम् किम् ?

५. हरीतकी कस्य द्रव्यस्य उदाहरणम् ?

६. छेदनद्रव्यस्य उदाहरणानि लिखत।

७. चरकसंहितायां कतीनां महाकषायानां वर्णनम् ?

**३. लघूत्तरीयाः प्रश्नाः।**

१. कर्मलक्षणं विलिख्य स्वरुपं प्रतिपादयत।

२. संस्थानकर्मभेदान् प्रदर्शयत।

३. संशोधनमौषधम् लिखत।

**४. योजयत**

| | अ | | ब |
|---|---|---|---|
| (१) | मधु | (अ) | वात-पित्तनाशकम्। |
| (२) | घृतम् | (ब) | ककपित्तनाशकम्। |
| (३) | तैलम् | (क) | वात-कफनाशकम्। |
| (४) | मांसः | (ड) | कफवातनाशकम्। |

**५. विस्तृतप्रश्नाः समाधेयाः।**

१. अग्र्यसंग्रहेषु पञ्चविंशति द्रव्याणि सन्ति तेषां कर्म च लिखत।

२. दीपन-पाचनद्रव्येषु पञ्चद्रव्याणां विवेचनं कुरुत।

३. कर्मणः लक्षणं स्वरुपं भेदान् च प्रदर्शयत।

● ● ●